श्रीदुर्गापूजापद्धतिः

मङ्गलबनी (मंगरौनी) ग्रामवास्तव्येन काव्य-व्याकरणतीर्थेन
साहित्यशिरोमणिना स्व० पण्डितताराचरणझाशर्म्मणा
१९२८ ई० बर्षे निर्मिता । स्व० महामहोपाध्याय-
पण्डितप्रवरमुरलीधरझाशर्म्मणा संशोधिता ।

चतुर्वेदोपाध्यायसाहित्याचार्यपण्डितकालीचरणझाशर्म्मणा
१९२९ ई० ईसवीये वर्षे प्रकाशिता ।

आत्मजेन पण्डितश्री-आद्याचरणझाशर्म्मणा १९७८ ईसवीये
वर्षेऽनेकानेकपरिशिष्टादिसहितं
द्वितीयसंस्करणं प्रकाशितम्

प्राप्तिस्थानम् :—

श्री घूरन झा, ग्राम पो० मंगरौनी
जिला—मधुबनी (विहार)

चौखम्बा विद्या भवन, तथा
चौखम्बा सुरभारती प्रकाशन
वाराणसी-१

मूल्यम् १०) दश रूप्यकाणि

सजिल्द १३) त्रयोदश रूप्यकाणि

एतत् संस्करणं
वाराणसीस्थ श्री तारा प्रिन्टिंग मुद्रणालये मुद्रितम्

विषय-सूची

श्रीः

द्वितीयसंस्करणप्रसङ्गे निवेदनम्

समस्ते भारतवर्षे विशेषतो मिथिलायां वङ्गप्रदेशे च शारदीय-नवरात्रपूजायाः सर्वथा सनातनं प्राशस्त्यमस्ति। १९२८ ईसवीये वर्षे सर्वाङ्गीणेयं पद्धतिः मम स्वर्गीयपितृचरणेन पण्डितताराचरणझा-महोदयेन चिरश्रमपरिणामरूपा भागलपुरनगरे वनैलीराज्याधिपतेः स्व० कुमाररमानन्दसिंहमहोदयस्य संपूर्णद्रव्यसाहाय्येन प्रकाशयितु-मारब्धा। प्रकाशनमध्य एव सहसा १९२८ ईसवीयवर्षे सितम्बरमासे पितृचरणः ३५ वर्षदेशीय एव कालकबलितः।

तदनन्तरं तदनुजेन प्रख्यातविदुषा मम पितृव्येन स्व० पण्डित-कालीचरणझाशर्म्मणा १९२९ ईसवीये वर्षे भागलपुरस्थे युनाइटेड-प्रेसनामके मुद्रणालये ब्रह्मपत्रात्मकेषु पृष्ठेषु भव्याकर्षकमुद्रणादियुक्तेयं पद्धतिः प्रकाशिता। स्व० कुमाररमानन्दसिंहाज्ञया पद्धतिरियं संपूर्णदेशे निःशुल्कं वितरिता। लेखकप्रकाशकेभ्यः पञ्चाशत् (५०) मुद्रितानि पुस्तकानि तैः प्रदत्तानि। एतन्मध्येऽल्पीयसि वयस्येव १९४५ ईसवीये वर्षे पितृव्यचरणोऽपि दिवं गतः।

एतावति महति दीर्घकाले सत्यामपि महत्यामुत्कण्ठायां विविध-बाधाविघ्नैरियं पद्धतिर्न पुनर्मुद्रिता। शतशः पत्राणि तदर्थं मदन्तिके समागतान्यद्यापि स्थितानि।

प्रायः पञ्चाशद् (५०) वर्षानन्तरं चिराभिलषितमेतस्याः पद्धतेः द्वितीयसंस्करणं येनकेनापि रूपेण स्वद्रव्येणैव सम्पूर्णं व्ययं विधाय प्रकाशितम्।

अस्मिन् संस्करणे परिशिष्टरूपेण मिथिलायां प्रचलिता श्री १०८ तारापूजापद्धतिः, श्रीश्यामापूजापद्धतिः, कोजागारायां श्रीलक्ष्मीपूजा-पद्धतिश्च यथायोग्यं यथामति संकलय्य समावेशिता। महानवम्यां श्रीहनुमद्ध्वजदानविधिश्च सन्निवेशितः। संस्करणेऽस्मिन् परिशिष्टे श्रीसूक्तं दुर्लभसुधारधारास्तोत्रं विशिष्टतारास्तोत्रं च सौविध्याय

विनिवेशितमाराधनाय। एतस्मिन् संकलने पुरश्चर्यार्णव-शाक्त-प्रमोद-वर्षकृत्यादिग्रन्थानां सहायता गृहीता। मङ्गरौनीग्रामवास्तव्य-पं श्रीनागेन्द्रझापार्श्वे हस्तलिखितैका जीर्णशीर्णा प्राचीना श्रीतारा-पूजापद्धतिर्वर्तते। अस्यां श्रीतारापूजापद्धतौ ततोऽपि सहायता गृहीता। अतस्ते सर्वे ग्रन्थकाराः संग्रहकर्त्तारश्चाभिनन्दनीयाः।

प्रथमसंस्करणस्य भूमिकायामेव पद्धतेर्विशेषता प्रदर्शिता वर्तते। पद्धतिरियं वेदोक्ततन्त्रोक्तपुराणोक्तपद्धतित्रयपथविनिर्मिता वर्तते। न्यासजालस्तु चमत्कारपूर्णोऽद्भुतः। अद्यापि वयमाश्चर्यिताः यत्कथं स्वल्पेनैव कालेन केनालौकिकचमत्कारेण ग्रन्थोऽयं विनिर्मितः। भूमिकायां च द्वैततिथिनिर्णयादयः सर्वे प्रशस्ताप्रशस्तादिविषयाश्च साधुसन्निविष्टाः सन्ति।

"नहि कस्तूरिकामोदः शपथेन विभाव्यते" इति न्यायेन पद्धति-विषये नाधिकं किञ्चिद्वक्तव्यम्।

श्रद्धालवो भक्ताः पूजका उपासकाश्च एकयैव पद्धत्यानया समस्ते कृत्ये निर्णयं विधास्यन्ति, नात्र कश्चन सन्देहलवः।

पुनर्मुद्रणे सर्वाधिकप्रेरणादायिका मम धर्मपत्नी श्रीमती इन्द्रकला झा, या स्वयमपि पूजायां सर्वथा सर्वदाऽनुरक्ता।

ममानुजः आयुष्मान् श्रीघूरन झा (स्व० पितृव्यचरणस्यैक-मात्रपुत्रः) तथा मम कनिष्ठात्मजः कल्याणभाजनश्रीसुशीलकुमारझा पुनर्मुद्रणार्थमुत्साहं वर्धितवान्। पाण्डुलिप्यादिकार्ये च श्रीसुशीलस्य श्रमोऽभिनन्दनीयः। सर्वथा सर्वत्र बीजमन्त्रजालान्वितायाः पद्धतेरस्याः पुनर्मुद्रणे डॉ० श्रीश्रीनारायणमिश्रेण (संस्कृत-पालि-विभाग, काशी हिन्दू विश्वविद्यालय) कृता तत्परता सर्वथाऽविस्मरणीया वर्तते।

आशासे विश्वसिमि च यद्भगवत्याः समाराधकाः लाभान्विता भवेयुरस्मान् संवर्धयेयुश्चेति—

विद्वच्चरणचञ्चरीकः
आद्याचरणझा

पटना, गङ्गादशमी
१६.६.१९७८
शुक्रवासरः।



प्रथमसंस्करणस्य प्रकाशकः—स्व० पण्डित कालीचरण झा



पद्धति प्रणेता—स्व० पण्डित ताराचरण झा



महानिशापूजां कुर्वन्—पण्डित आद्याचरण झा

॥ श्रोः ॥

भूमिका

श्रुत्यादिशास्त्रेषु सम्यगभिहितं यत् सकलचराचरसत्त्वभूता सुरसमष्टितेजःशक्तिस्वरूपाद्या शक्तिरेव संसारसृष्टिस्थित्यन्तकारणमिति। यथोक्तं ब्रह्मवैवर्त्ते—

"आद्या नारायणी शक्तिः सृष्टिस्थित्यन्तकारिणी।
करोति च यया सृष्टिं यया ब्रह्मादिदेवताः॥
यया जयति विश्वश्च यया सृष्टिः प्रजायते।"

सा सर्वजननी निखिलवस्तुषु तत्तद्वस्तुगतगुणशक्तिरूपेण सर्वत्र सर्वदा सन्तिष्ठतोत्यपि सर्वं शास्त्रसम्मतमेव। तथोक्तं तत्रैव—

"सा वाणी सा च सावित्री विप्राधिष्ठातृ देवता।
वह्नौ सा दाहिका शक्तिः प्रभाशक्तिश्च भास्करे॥
सस्यप्रसूतिशक्तिश्च देवशक्तिः सुरेषु सा।
पारे संसारसारे सा त्रयी दुस्तरतारिणी॥"

सर्वशक्तिस्वरूपा सर्वज्ञानात्मिका परमा प्रकृतिः सा दुष्टदुर्गविनाशनाद् दुर्गेतिनाम्ना प्रसिद्धा जातेति पुराणादिषु शास्त्रेष्वभिहितम्। यथा—

"बुद्ध्यधिष्ठातृदेवी या सर्वशक्तिस्वरूपिणी।
सर्वज्ञानात्मिका सर्वा सा दुर्गा दुर्गनाशिनी॥"

दुर्गाशब्दव्युत्पत्तिस्त्वेवं दृश्यते

"दैत्यनाशार्थवचनो दकारः परिकीर्त्तितः।
उकारो विघ्ननाशस्य वाचको वेदसम्मतः।
रेफो रोगघ्नवचनो गश्च पापघ्नवाचकः।
भयशत्रुघ्नवचनश्चाकारः परिकीर्त्तितः।
स्मृत्युक्तश्रवणाद्यस्या एते नश्यन्ति निश्चितम्।
ततो दुर्गा हरेः शक्तिर्हरिणा परिकीर्त्तिता॥"

जगत्कल्याणकारिणी सा मदोद्धतैर्दैत्यैर्बाधिते सुरसमूहे दिव्यं, तेजः शक्तिप्रधानशरीरं धृत्वा यथाऽवसरे सुरशत्रून्दानवदुष्टान्विनिपातयति। यथोक्तं मार्कण्डेयपुराणे—

"इत्थं यदा यदा बाधा दानवोत्था भविष्यति।
तदा तदाऽवतोर्याहं करिष्याम्यरिसंक्षयम्॥"

यथावसरं च कृतं तया स्वप्रतिज्ञापालनं प्रोद्दामबलादिमदमत्तान्महिषदुर्गत्रिपुरशुम्भनिशुम्भादीन्निहत्य। यथाह स्वयं शिवा—

"तेजःसु सर्वदेवानां पुरा सत्ये तवाज्ञया।
अधिष्ठानं कृतं तत्र धृतं दिव्यं शरीरकम्।
शुम्भादयश्च दैत्याश्च निहताश्चावलीलया।
दुर्गं निहत्य दुर्गाहं त्रिपुरा त्रिपुरे वधे।
निहत्य रक्तबीजं च रक्तबीजविनाशिनी॥"

तस्या धर्मार्थकाममोक्षचतुर्वर्गफलार्थिभिर्जगन्मातुः पूजनमहोत्सवो यथाविधि विधेय एव। तथोक्तं श्रीमद्देवीभागवते—

"य एवं पूजयेद्देवीं श्रीमद्भुवनसुन्दरीम्।
न तस्य दुर्लभं किञ्चित् कदाचित्क्वचिदस्ति हि।
देहान्ते तु मणिद्वीपं मम यात्येव सर्वथा।
ज्ञेयो देवीस्वरूपोऽसौ देवा नित्यं नमन्ति तम्।"

दुर्गापूजनमहोत्सवस्य नवरात्रमित्यपि नाम। तन्नामकरणकारणन्तूक्तं रुद्रयामले—

"नवशक्तिसमायुक्तं नवरात्रं तदुच्यते।
एकैव देव देवेशी नवधा परिनिष्ठिता॥"

तन्नवरात्रं द्विप्रकारकम्—शयनाख्यं बोधनाख्यं च। तथोक्तं तत्रैव—

"शयनं बोधनाख्यं च नवरात्रं द्विधा भवेत्।
शयनं चैत्रमासीयमाश्विनस्थं च बोधनम्॥"

किन्तु शयनाख्यचैत्रमासीयनवरात्रादधिकं शारदीयनवरात्रस्य प्राशस्त्यम्। यथोक्तं स्वयं श्रीदेव्या—

"शरत्कालीनपूजां ये कर्त्तारो भक्तिभाविताः ।
तेषां दारान्सुतान्भोगान् वित्तमारोग्यमुन्नतिम् ।
तुष्टा दास्याम्यहं शम्भो स्वर्लोके वसति सदा ।।"

उक्तं च बृहत्सारसिद्धान्तेऽपि—

"आश्विनस्य सिते पक्षे नानाविधमहोत्सवैः ।
प्रसादयेयुः श्रीदुर्गां चतुर्वर्गफलार्थिनः ।।"

अकृतायां शारदीयार्चायां महादोषः । यथोक्तं महाकालसंहितायाम्—

"त्रिपुरघ्नाय यद्वाक्यं पुरोवाच महेश्वरी ।
शारदीयामिमां पूजां न करिष्यन्ति ये नराः ।
ते पतिष्यन्ति निरये पापाः पूजापहारकाः ।।"

अतएव सुरसमूहसम्पूजिताद्यशक्तेः सकलसम्भूतिसम्प्राप्तये निखिलोपद्रवप्रशान्तये च सोत्साहं सर्वथा शारदीयार्चा जनैर्मनोवाक्कायकर्मभिः कर्त्तव्यैव क्रियते च परम्परया । **तत्पूजोत्सवनिदानन्त्वेवमुक्तम्महाकालसंहितायाम्—**

"आसीत्पूर्वं महापूजा वासन्त्येव जगत्त्रये ।
रामरावणयोर्युद्धे जाते त्रेतायुगान्तरे ।।
कालिकाङ्गीकृतत्वेन हन्तुं रामोऽशकन्न तम् ।
ततो वै चिन्तितो भूत्वा ब्रह्मा सुरगणैर्वृतः ।
कालिकां बोधयामास हिमालयकृतालयाम् ।
त्वदुपासकयोर्देवि युद्ध्यतोर्घोरमाहवे ।
अस्त्रशिक्षां लाघवं च समागत्यावलोकय ।
एवमभ्यर्थिता देवी अकाले बोधिता तथा ।
जगाम ब्रह्मणा सार्द्धं लङ्कां द्रष्टुं रणं तयोः ।
शुक्लप्रतिपदीशस्य प्राप्ता तं देशमीश्वरी ।
सप्तरात्रं निराहारं महद्युद्धमहर्निशम् ।
तयोर्दिव्यास्त्रप्रयोगसंहारपरयोरभूत् ।
रामः शशाक नो हन्तुं राक्षसं कल्युपासकम् ।
स चापि नाशकद्रामं स्वयं विष्णुमुपागतम् ।

समीक्ष्य रक्षसो वाहुवलं देवी तुतोष ह ।
स्वभक्त इतिकृत्वाऽस्मिन् पक्षपातं चकार ह ।
रक्षस्यनुग्रहं दृष्ट्वा ब्रह्मा सर्वैः सुरैः सह ।
सन्तुष्टाव स्तवैर्दिव्यैर्भक्त्या प्रणतकन्धरः ।।
काकूक्त्या प्रणिपातैश्च नमस्कारैः स्तवैरपि ।
तुष्टा ब्रह्माणमूचे सा हृत्स्थं वत्स वरं वृणु ।
वरं बव्रे ततः सार्द्धं त्रिदशैश्च चतुर्मुखः ।
त्वत्पादयोर्भक्तमपि त्यजैनं दुष्टराक्षसम् ।
मय्यनुग्रहलेशेन विष्णोर्मान्यतयापि च ।
कृपादृष्ट्या च देवेषु धर्मसंस्थापनाय च ।
त्रिलोकी जायतां सुस्था देवाः सन्तु मखाशिनः ।
तपस्तप्यन्तु मुनयश्चातुर्वर्ण्यं प्रवर्धताम् ।
एष वीरजितॉंल्लोकान् शस्त्रपूतश्च गच्छतु ।
पूजां प्रवर्त्तयिष्यामि तव देव्यमरैः सह ।
तिथिमाद्यां समारभ्य यावद्रक्षोव ो भवेत् ।
दिनानि नव ते पू ा भविष्यन्ति जगत्त्रये ।
नवम्यां निहते वीरे रावणे विश्वकण्टके ।
प्रीतिमुत्पादयिष्यामः प्रभूतबलिभिस्तव ।
अपरेऽह्नि दशम्यां ते नीराजनमहोत्सवम् ।
गीतैर्नृत्यैस्तथावाद्यैर्जलकर्दमकेलिभिः ।
आनन्दप्रेमवचनैः शस्त्रास्त्ररचनैरपि ।
रथद्विरदवाहानां सज्जनाविधिभिस्तथा ।
सुराः प्रवर्त्तयिष्यन्ति मनुष्याश्च महीतले ।
भक्तोऽयं रावणो यद्वत्पादयोस्तव कालिके ।
रामो भविष्यति तदा सदैव तव पूजकः ।
मन्त्रः कोऽपि च ते देवि रामोपासितसंज्ञया ।
सद्यस्तव प्रीतिकरः ख्यातिं जगति यास्यति ।
इत्युक्ता ब्रह्मणा काली बभूवास्य पराङ्मुखी ।
ततो जघान दिव्यास्त्रै राघवो रावणं रणे ।
तत आरभ्य देवेशि शारद्यर्चा प्रवर्तिता ।।"

एतदतिरिक्तं ऋतुपरिवर्त्तनजन्यरोगभयापनोदनमपि शारदीया-

चर्याः कारणं सम्भाव्यते यतो गजाश्वादिजन्तूनामपि तात्कालिक-सम्भावितरोगबाधाप्रशमनोपायः क्रियते। यथोक्तं महाकाल-संहितायाम्—

"स्वातीनाम रवेः पत्नी वरदा रूपिणी रथम्।
वहन्ती साश्विने मासि सूर्यरश्मिसमाश्रिता।
सप्ताहं पीडयेदश्वांस्ततः स्नानार्चितान् गृहे।
रेवन्तं पूजयित्वाऽथ बद्ध्वा पोटलिकां गले॥"

इत्यादयः। वस्तुतस्तु सकलप्राणिनां प्रत्यक्षरोगबाधाप्रशमनो-पायपरिदर्शनादन्यपूजापेक्षयाऽस्याः प्राशस्त्यं सर्वप्राधान्यं प्रचारश्च सर्वत्र सन्दृश्यते। अस्तु। अत्र कतिचित्तदुपयुक्ता विषयाः संक्षेपतः संलिख्यन्ते॥

तत्र प्रथमं प्रतिस्थापनविधौ दिङ्नियमः—

"याम्यासा शुभदा दुर्गा पूर्वास्या जयवर्द्धिनी।
पश्चिमाभिमुखी नित्यं न स्थाप्या सौम्यदिङ्मुखी॥"

अथ दशभुजास्त्रशस्त्रविधानम्।

"त्रिशूलं दक्षिणे दद्यात् खड्गं चक्रं क्रमादधः।
तीक्ष्णं बाणं च शक्तिं च वामतः सन्निवेशयेत्।
खेटकं पूर्णचापं च पाशमङ्कुशमूर्ध्वतः।
घण्टां वा परशुं चापि वामतोऽपि निबोधत॥" (मात्स्ये)

वेदीमानाधिकारे—

"वालुका गृह्य यत्नेन नदीनदसमुद्भवाः।
वेदीं कुर्यात्प्रयत्नेन चतुरस्रां शुभावहाम्।
द्विहस्ता चोत्तमा वेदी मध्यमा सार्द्धहस्तका।
अधमा हस्तमात्रा च न्यूनाधिक्यं न कारयेत्॥"

नवपत्रिकाः—

"रम्भा कची हरिद्रा च जयन्तो विल्वदाडिमौ।
अशोको मानकश्चैव धान्यानि नवपत्रिकाः॥" (भविष्यपुराणे)

महौषधनामानि--

"सहदेवी तथा व्याघ्री बला चातिबला तथा।
शङ्खपुष्पी च सिंही च वचा चैव सुवर्चसा।
महौषध्यष्टकं प्रोक्तं महास्नाने नियोजयेत्॥" (मात्स्ये)

नवपत्रिकादानकारणन्तु-- तत्पत्रिकाधिष्ठातृदेवीप्रीतिजनकत्वमेव। यथोक्तं महाकालसंहितायाम्—

"आदौ तु समधिष्ठात्री ब्रह्माणी परिकीर्तिता।
कालिका कच्च्यधिष्ठात्री त्रिपुरघ्नेन भाषिता।
दुर्गा हरिद्राधिष्ठात्री जयन्त्यां कार्तिकी तथा।
शिवा च बिल्वाधिष्ठात्री दाडिमाधिष्ठिता तथा।
शत्रुसंक्षयकरी विज्ञेया रक्तदन्तिका।
मुनिभिः शोकरहिताऽशोकाधिष्ठात्र्युदीरिता।
तथैवं मानाधिष्ठात्री चामुण्डा परिकीर्तिता।
लक्ष्मीश्च धान्याधिष्ठात्री नन्दीशेनोपपादिता।
नवपत्रिकाधिष्ठात्री कात्यायन्यप्युदीरिता॥"

बलिदानाधिकारे बलिदानावश्यकता—

"तस्मान्नैमित्तिकार्चायां बलिरावश्यकः प्रिये।
बलिं विना नैव देवी पूजामङ्गीकरोति हि॥"

बलिदानफलम्--

"बलिभिर्वर्द्धते ह्यायुर्बलिभिः शाम्यते रुजा।
जयत्यरातीन्बलिभिः प्राप्यते बलिभिर्धनम्।
सिद्धिमाप्नोति बलिभिर्बलिभिस्त्रिदिवं व्रजेत्॥
निष्कामाणां बलौ दत्ते प्राप्यो मोक्षोऽपि यज्ञवत्॥"

तत्र छागमहिषयोः प्राशस्त्यम्। तथोक्तम्—

"तत्राप्युभौ प्रशस्येते महिषश्छाग एव च॥"

प्रशस्तपशुलक्षणम्--

"ऊर्ध्वशृङ्गो लम्बकर्ण एकवर्णोऽतिपीवरः।
नीरोगः पुष्टकायश्च सदर्पोऽतिबलोर्जितः।

नाधिकाङ्गो न हीनाङ्ग एकद्वित्र्यादिहायनः ।
प्रशस्तपशुरोदृक्षो देवीप्रीतिकरः शुभः ।
कृष्णवर्णश्छागलस्तु पृष्ठवंशे सितो यदि ।
प्रशस्तं तं विजानीयात् विपरीतं विवर्जयेत् ।।"

निषिद्धपशुलक्षणम्—

"भग्नशृङ्गं भग्नदन्तं छिन्नलाङ्गलमेव च ।
काणं व्यङ्गं रोगिणं च शृङ्गाहितनरं तथा ।
दुष्टं गलितरोमाणं क्षीरपं च गलद्विशम् ।
पशुं न दद्यादीदृक्षं तथाचैव विहायसम् ।।"

तथा च—

"कृष्णवर्णो बलिर्यस्तु श्वेतपुच्छो यदा भवेत् ।
छागलं तादृशं विद्वान् दूरतः परिवर्जयेत् ।
एवं सितं कृष्णपुच्छं वर्जयेन्मतिमान्सदा ।।

बलिच्छेदनसाधनशस्त्राणां विषये तु तन्त्रान्तरे एवमुक्तम्—

"सर्वेषामुत्तमः खड्गश्चन्द्रहासः सुखावहः ।
अथवा कुब्जखड्गेन दण्डखड्गेन भेदयेत् ।।"

महाकालेऽपि

"चन्द्रहासेन खड्गेन छिन्द्यादेकप्रहारतः ।
उत्थाय हननं कुर्यान्नोपविश्य कदाचन ।।"

वित्तबाहुल्ये बहुबलिदानसम्भवेऽपि अल्पसङ्ख्यकानेव बलीन् दद्यादिति शास्त्रादेशः । यथोक्तं महाकालसंहितायाम्—

"सहस्रायुतलक्षाणां बलीनां सम्भवे सति ।
द्वौ त्रीन् पञ्च तथाष्टौ वा दश वा द्वादशापि वा ।
एभ्योऽधिकान् नैव कुर्याद्देवीभावतया स्थितान् ।।"

अस्तु, अत्र विवादस्थानानां प्रतिपत्षष्ठ्यादितिथीनां संक्षेपतो निर्णयः सँल्लिख्यते परमावश्यकत्वात् । **तत्राश्विनशुक्लप्रतिपन्निर्णीयते**—सा तु परविद्धा ग्राह्या, न पूर्वविद्धा । तथोक्तं देवीपुराणे—

"अमायुक्ता न कर्त्तव्या प्रतिपत्पूजने मम ।।
मुहूर्त्तमात्रा कर्त्तव्या द्वितीयादिगुणान्विता ।।"

तत्रैवोक्तं परविद्धायाः प्राशस्त्यम्—

"या चाश्वयुजि मासे स्यात् प्रतिपद् भद्रयान्विता ।
शुक्ला ममार्चनं तस्यां शतयज्ञफलप्रदम् ।।"

पूर्वविद्धानिषेधवचनञ्च तत्रैवोक्तम्—

"पूर्वविद्धा तु या शुक्ला भवेत्प्रतिपदाश्विनी ।।
नवरात्रव्रतं तस्यां न कार्य्यं शुभमिच्छता ।।"

स्कान्देऽपि—

"वर्जनीया प्रयत्नेन अमायुक्ता तु पार्थिव ।
द्वितीयादिगुणैर्युक्ता प्रतिपत्सर्वकामदा ।।"

शक्तिसङ्गमे च—

"घटिकाः षोडश त्याज्या आद्याः प्रतिपदस्तु याः ।
कलशस्थापनं कुर्यात्कल्याणं जायते ध्रुवम् ।।"

इत्यादिवचनैः परविद्धैव ग्राह्या । तथाच चित्रावैधृतियुक्तापि प्रतिपद्द्वितीयायुक्ता चेन्न दुष्टा । तथोक्तं दुर्गोत्सवे—

भद्रान्विता चेत्प्रतिपत्तु लभ्यते विरुद्धयोगैरपि सङ्गता सती ।
सा वै पराह्णे विबुधैर्विधेया श्रीपुत्रराज्यादिविवृद्धिहेतुः ।।

अथ षष्ठीसप्तमीनिर्णयः ।

ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां सायाह्ने विल्वाभिमन्त्रणं कार्य्यम् । यथोक्तं देवीपुराणे—

"ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां विल्वाभिमन्त्रणम् ।।"

तथा,

"सायाह्ने विल्वशाखायां षष्ठ्यां देवीं प्रबोधयेत् ।।"

इति महाकालसंहितायाम् ।। वस्तुतस्तु यस्मिन् दिने सायंकाले षष्ठीतिथियोगस्तद्दिने एव विल्वाभिमन्त्रणं विधेयम् । उभयदिने सन्ध्यायां षष्ठ्यलाभे तु युग्मादरेण व्यवस्थेति पुरश्चर्यार्णवकारः । दिनद्वये सन्ध्यायां षष्ठ्यभावे तु प्रदोषादिसमये षष्ठ्यामिति कौमुदी-

कृन्मतमेवादरणीयं गौणकालव्याप्तेः सत्वादित्यपि स एव ।। तथाच मूलयुक्तायां सप्तम्यां तिथौ पत्रिकाप्रवेशनं कुर्यात् । यथोक्तं देवी-पुराणे—

"सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम् ।।
पत्रीप्रवेशात्पूर्वेद्युः सायाह्ने विल्ववासिनीम् ।
चण्डीमामन्त्रयेद्विद्वान्नात्र षष्ठी पुरस्क्रिया ।।"

किन्तु मूलाभावेऽपि पत्रिकां प्रवेशयेत् । यथोक्तं नन्दिकेश्वर-पुराणे—

"मूलाभावेऽपि सप्तम्यां केवलायां प्रवेशयेत् ।।"

नक्षत्रानुरोधेन रात्रौ पत्रिकायाः प्रवेशनं विसर्जनं च कथमपि न कर्त्तव्यमित्यवधार्यम् । यथोक्तं दुर्गाभक्तितरङ्गिण्याम्—

"ऋक्षयोगानुरोधेन रात्रौ पत्रीप्रवेशनम् ।
विसर्जनं चरेद्यस्तु सराष्ट्रः स विनश्यति ।।"

पत्रिकाप्रवेशादौ सप्तमी उदयव्यापिनी ग्राह्या । यथोक्तं तिथि-तत्त्वादिषुग्रन्थेषु—

"भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः ।
तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुधः ।।"

तथाच कृत्यतत्त्वे—

"युगाद्या पर्ववृद्धिश्च सप्तमी पार्वतीप्रिया ।
रवेरुदयमिच्छन्ती न तत्र तिथियुग्मता ।।"

तथाच मत्स्यसूक्ते—

सप्तम्यामस्तगायां यदि विशति गृहं पत्रिका श्रीफलाद्या
राज्ञा सप्ताङ्गराज्यं जनसुखसहितं हन्ति मूलानुरोधात् ।
तस्मात्सूर्योदयस्थां नरपतिशुभदां सप्तमीं प्राप्य देवीं
भूपालो वेशयेत्तां सकलजनहितां राक्षसर्क्षं विहाय ।।

अथ महाष्टमीनिर्णयः ।

"तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ।
अतोऽर्थं पूजनीया सा तस्मिन्नहनि मानवैः ।।"

साष्टमी द्विधा—शुद्धा विद्धा च । शुद्धायां विवादाभावो विद्धायां निर्णयः यथोक्तं ब्रह्मवैवर्त्ते—

"शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुता ।"

स्मृतिसंग्रहे—

"शरन्महाष्टमी पूज्या नवमीसंयुता सदा ।
सप्तमीसंयुता नित्यं शोकसन्तापकारिणी ।
जम्भेन सप्तमी विद्धा पूजिता तु महाष्टमी ।
इन्द्रेण निहतो जम्भस्तस्माद्दानवपुङ्गवः ।
तस्मात्सर्वप्रयत्नेन सप्तमीमिश्रिताष्टमी ।
वर्जनीया प्रयत्नेन मनुजैः शुभकाङ्क्षिभिः ।।"

तथा वाचस्पतिकृततिथिनिर्णये—

"सप्तमीं शल्यसंयुक्तां मोहादज्ञानतोऽपि वा ।
महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते ।
सप्तमी कलया यत्र परतश्चाष्टमी भवेत् ।
तेन शल्यमिदं प्रोक्तं पुत्रपौत्रक्षयप्रदम् ।।"

तथा, देवीपुराणे—

"सप्तमी वेधसंयुक्ता यैः कृता तु महाष्टमी ।
पुत्रदारधनैर्हीना रटन्तीह पिशाचवत् ।।"

वेधश्च त्रिमुहूर्त्तकालः । तथोक्तं भुवनप्रदीपे—

एकस्यैव तु खण्डस्य समस्ते भास्करोदयः ।
त्रिमुहूर्ते भवेत्पूर्णः स कालो वेधसंज्ञकः ।।

तथा कृत्यरत्नदीपे—

"वेधविद्धा तिथिः सर्वा त्वनर्हा सर्वकर्मसु ।
स्नानं दानं विना चैव गर्हिता परिकीर्तिता ।।"

स्कन्दपुराणे च—

"षष्ठयैकादश्यमावास्या पूर्वविद्धा तथाष्टमी ।
सप्तमी परविद्धा च न पूज्यं तिथिपञ्चकम् ।।"

देवीपुराणेऽपि—

"नवमीसंयुता कार्या सदा दुर्गाष्टमी बुधैः ।।
सप्तमीसहिता हन्ति पूर्वपुण्यफलं ध्रुवम् ।।"

तत्र निशीथे देव्या विशेषपूजनं भवति । यथोक्तं पद्मपुराणे—

"शरत्काले महाष्टम्यां निशीथे परमेश्वरीम् ।
पूजयित्वा बलिं दद्यात् सर्वसिद्धिसमृद्धये ।।"

स्कान्दे च—

"अष्टमीयुक्तकाले तु निशार्धे परमेश्वरीम् ।
समभ्यर्च्य बलिं दद्यात् सर्वाभीष्टफलाप्तये ।।"

एतेन निशीथकाले श्रीभगवतीम्पूजयित्वा तोषयेदिति व्रतादौ सूर्योदयव्यापिनी ग्राह्येति ग्रन्थकारविवेकः ।। यथाह जाबालिः—

"यदा सूर्योदये न स्यादष्टमी च परेऽहनि ।
तदाष्टमीं प्रकुर्वीत सप्तम्या सहितां नृप ।।"

तथाचोक्तं निर्णयामृते—

"उत्तरास्तिथयो यत्र क्षयं यान्ति नराधिप ।
तदा पूर्वाष्टमीं कुर्यादन्यथा त्वशुभं भवेत् ।।"

रात्रिकृत्ये रात्रियोगो विशिष्यते । तथोक्तं समयप्रदीपे—

"रात्रिकृत्येषु सर्वेषु रात्रियोगः प्रशस्यते ।।
दिवाकृत्ये दिवायोगो भास्करोदयसंगतः ।।"

यद्युभयदिनं निशीथकालव्यापिनी स्यात्तदा परेऽहनि निशापूजा कार्या । तद्यथा कृत्यमहार्णवे—

"पूर्वेद्युरपरेद्युश्चेन्निशीथव्यापिनी तिथिः ।
परेद्युरेव सा ग्राह्याष्टमी न सप्तमीयुता ।।
अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता ।
अतीव सा प्रशस्ता स्याद्देव्याः पूजनकर्मणि ।।"

यद्युभयदिने निशीथव्यापिनी न स्यात्तदापि परदिने कार्या । तथोक्तं योगिनीतन्त्रे—

"उभयत्र दिने न स्यान्निशीथव्यापिनी यदा ।
तदा परैव संग्राह्या रवेरुदयगामिनी ।।
भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः ।
रवेरुदयगामिन्यां ताः सर्वाः कारयेद्बुधः ।।"

इति नन्दिकेश्वरः ।

अथ महानवमीनिर्णयः ।

सा (नवमी) तु अष्टमीयुतैव ग्राह्या । यथोक्तं ब्रह्मवैवर्त्ते—

"अष्टम्या नवमी विद्धा कर्त्तव्या फलकांक्षिभिः ।"

मात्स्ये च—

"अष्टम्या सहिता रिक्ता प्रकर्त्तव्या सदा बुधैः ।।"

पाद्मेऽपि—

"अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता ।"

बलिदाने हि मध्याह्नकाले यद्दिने लभ्यते सैव ग्राह्या । तन्निर्णयो यथा ग्रन्थसमुच्चये—तत्रोदयं समारभ्य मध्याह्नव्यापिनी उत्तमा । उदयं विना मध्याह्नादिसंयुता मध्यमा । वेधसमन्विताऽधमा । पूर्वाभावे ह्युत्तरोत्तरा ग्राह्येति शिष्टसम्मतम् । उत्तमोत्तमा तु कदाचिल्लभ्यते । तत्र घटिकातो न्यूना कर्मानर्हा न देवकृत्यादिषु ग्राह्या । तद्यथा धर्मसारप्रदीपे—

"घटिकातो यदा न्यूना तदानर्हा तिथिः स्मृता ।
देवकृत्यादिकार्येषु स्नाने दाने प्रशस्यते ।"

तथोक्तं तिथिचिन्तामणौ,

"कन्यां गते सवितरि शुक्लपक्षेऽष्टमीयुता ।
मूलोत्तरर्क्षसंयुक्ता सा महानवमी स्मृता ।।"

तथा च धर्मसारप्रदीपे—

"अष्टमी प्रथमे यामे नवमी च ततः परा ।
भौममन्दसमायुक्ता तथोत्तरसमन्विता ।

उमामहेश्वरी नाम योगोऽयं खलु दुर्लभः।
एषोत्तमोत्तमा प्रोक्ता नवमी बहुपुण्यदा।"

तथा च निर्णयसिन्धौ—

"आवर्तनात्पूर्वकाले नवमी स्यात्परेऽहनि।
दुर्गार्चा तत्र पूर्वेद्युः पूर्वाह्ले त्वष्टमी यदि।"

यदि पूर्वदिने मध्याह्नव्यापिनी परदिने तु उत्तरर्क्षसहिता स्वल्प-कालव्यापिनी तदा परेद्युरेव बलिदानं कार्यम्। तथोक्तं देवीपुराणे—

"उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवाम्।
योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि॥"

तथैव योगिनीतन्त्रे—

"पूर्वाह्ले ह्यष्टमी चैव मध्याह्ने नवमीतिथिः।
उत्तरर्क्षसमायुक्ता बलिदाने प्रशस्यते।
दिनद्वयेऽपि चेन्न स्यादक्षयोगः कथञ्चन।
केवलायां नवम्यान्तु बलिं दद्यात्तदा परे।
ऋक्षाभावे तिथिर्ग्राह्या रवेदरुदयगामिनी।
नवमी बलिदाने तु दशमीं तत्र वर्जयेत्॥"

कृत्यमहार्णवेऽपि—

"वैष्णवर्क्षेण युक्तायां दशम्यां जातु मानवः।
बलिं दद्यान्महादेव्यै सर्वनाशमवाप्नुयात्॥"

इत्यादिनिषेधवचनैः सर्वथा दशमी बलिदाने वर्जनीयेत्यलम्॥

अथ दशमीनिर्णयः।

इयं विजययोगकारणाद्विजया दशमीत्युच्यते। यथोक्तं ज्योतिर्निबन्धे—

"ईषत्सन्ध्यामतिक्रान्तः किञ्चिदुद्भिन्नतारकः।
विजयो नाम कालोऽयं सर्वकार्यार्थसिद्धिदः॥"

हेमाद्रौ च—

"उदये दशमी किञ्चित्सम्पूर्णैकादशी यदि ।
श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा ।
श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः ।
उल्लङ्घयेयुः सीमानं तद्दिनर्क्षे ततो नराः ॥"

यदा पूर्वदिने श्रवणायोगाभावः परदिने चाल्पापि तद्योगिनी तदा परेव ग्राह्या । तथोक्तं ग्रन्थान्तरे—

"श्रवणर्क्षसमोपेता भास्करोदयगामिनो ।
तत्राल्पार्चां विधायैव प्रणिपत्य विसर्जयेत् ॥"

तत्रोदयगामिनी त्रिमुहूर्तव्यापिनी ज्ञेया । यथाह व्यासः—

"एकस्यैव तु खण्डस्य समस्ते भास्करोदयः ।
त्रिमुहूर्ते भवेत्पूर्णः स कालो वेधसंज्ञकः ॥"

इत्यादिबहुविधवाक्यैर्घटिकामात्रे दशमीयुक्तकाले स्वल्पविधिनाऽपराजिता पूजा कार्या न त्वेकादश्याम् । यदि घटिकान्यूना चेत्तदा नवमीविद्धायां श्रवणर्क्षसमन्वितायां पूर्वदिनेऽपराजितापूजा कार्या । तथोक्तं ग्रन्थान्तरे—

"घटिकातो यदा न्यूना दशमीस्यात्परेऽहनि ।
पूर्वेद्युस्तु तदा देवीम्पूजयित्वा विसर्जयेत् ॥"

इति विजयादशमीनिर्णयः । अथ विजयदशम्यां यात्राकाले मङ्गल्यार्थं नीलकण्ठखञ्जनादिविहगानां दर्शनं कुर्यादितिशास्त्रसम्मताचारः । यथोक्तं ग्रन्थान्तरे—

"एतत्कृत्वा महीपालो भूषितस्तेन चान्वितः ।
खञ्जनं सारसं चैव प्रयत्नेन विलोकयेत् ।"

तत्र खञ्जनदर्शनमन्त्रः—

"नारायणशरीरोत्थ सम्वत्सरशुभप्रद ।
शालग्रामशिलाकण्ठ खञ्जरीट नमोऽस्तु ते ॥"

नीलकण्ठदर्शनमन्त्रस्तु—

"नीलकण्ठाय भद्राय भद्ररूपाय ते नमः।
भद्रत्वं देहि मे भद्रमाशां पूरय पूरक॥"*

अस्त्वत्र विस्तरभयादन्यकारणाच्च विषयविस्तरमकृत्वैव किंचित्स्वकीयं वक्तव्यं प्रकटयामि। प्रस्तुतेयं श्रीदुर्गापूजापद्धतिः पूजितचरणैर्भ्रातृवरश्रीताराचरणशर्म्मभिरनेकोपयुक्तग्रन्थेभ्यो वहुविषयान्संगृह्य निगमागमपुराणोक्तोपयुक्तवहुविषयनिविद्धा विनिर्मिता। तत्प्रार्थनया वनैलीगढाधीशानां श्री३मद्रमानन्दसिंहमहोदारचरितानां समाज्ञया मुद्रणार्थं मुद्रणालये प्रदत्ता। तन्मुद्रिते चाल्पांशे सहसा कालकवलितेषु भ्रातृचरणेषु शोकसन्तप्तस्वान्तशरीरेण मन्दभाग्यबुद्धिविभवेन मया तत्र कतिचित्तदुपयुक्तविषयान् भूमिकारूपेण टिप्पणीरूपेण परिशिष्टरूपेण च विनिवेश्य येन केनापि प्रकारेण यथासमयं शीघ्रं प्रकाशिता। अस्यां पद्धतौ तन्त्रश्रुतिपुराणोक्तोपयुक्ताः सर्वे विषया यथासम्भवं सन्निवेशिता येन व्यवहृतविधिसम्पादने हानिर्न स्यात्। व्यवहारभेदसत्त्वेऽपि सर्वविषयाङ्गपूर्णयानया पद्धत्या सर्वे यथाव्यवहारं यथारुचि वा सर्वविधिसम्पादनं कुर्वन्त्वित्येवास्याः पद्धतेर्निर्माणकारणमपि। अस्या मुद्रणं तु वनैलीगढाधीश्वराणामेव व्ययेन कृपया संजातम्—यदर्थं तेभ्यो भृशं साधुवादाः शुभाशीर्वादाश्च प्रदीयन्ते। तन्मन्त्रिप्रवरैः श्रीतारानन्दठक्कुरशर्म्ममहोदयैश्चास्या मुद्रणे यथावसरं यथायोग्यं साहाय्यं प्रदत्तं यदर्थमहं तेषामपि कृतज्ञः। अस्यां पद्धतौ शोकग्रस्तबुद्धित्वात्कार्यवाहुल्यात्समयाभावात् शैघ्र्याच्च त्रुटिबाहुल्यं भवितुमर्हति—तत्कृपया कृपालुभिर्विद्वद्भिः क्षन्तव्यमिति प्रार्थयति—

भागलपुरम्
श्रावणशुक्लैकादश्यां गुरौ
शाके १८५१,—१९२९ ई०

विद्वच्चरणशरणः
श्रीकालीचरणः।

* परिशिष्टे प्रदातव्या इमे विषयाः कारणविशेषाद्भूमिकायामेव सन्निवेशिताः।

श्रीगणेशाय नमः । श्रीदुर्गादेव्यै नमः ।

अथ श्रीदुर्गापूजापद्धतिः

ॐ खड्गं चक्रगदेषुचापपरिघान् शूलं भुशुण्डीं शिरः
शंखं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम्
यामस्तौच्छयिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥१॥

अक्षस्रक्परशुं गदेषुकुलिशान् पद्मं धनुः कुण्डिकाम्
दण्डं शक्तिमसिञ्च चर्मजलजं घण्टां सुराभाजनम् ।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभाम्
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥२॥

घण्टाशूलहलानि शङ्खमुशले चक्रं धनुः शायकम् ।
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महाऽ-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥३॥

प्राचां निबंधमालोक्य संप्रदायानुसारतः ।
तेभ्यः संगृह्य सारांशं दुर्गापूजासुपद्धतिः ॥
कुमारश्रीरमानन्दसिंहाज्ञप्तेन लिख्यते ।
श्रीताराचरणेनेयं लोकोपकृतये कृता ॥

(१) अथाश्विनशुक्ल प्रतिपद्दिने स्नातः कृतनित्यक्रियो यजमानः पूजा (१) मण्डपं गत्वा ब्राह्मणद्वारा स्वयं वा शान्तिस्वस्त्ययनं कुर्यात् ॥

(मण्डपप्रमाणम्) [१] नक्षत्रराशिवाराणामनुकूले शुभेऽहनि । ततो भूमितले शुद्धे तुषाङ्गारादिवर्जिते ॥ पुण्याहं वाचयित्वा तु मण्डपं रचयेच्छुभम् । पञ्चभिः सप्तभिर्हस्तैः नवभिर्वामितं परम् ॥ स्थूलादर्काङ्गुलोच्छ्रायं मण्डपस्थलमीरितम् । ऐशाने पूर्वभागे वा सिध्यर्थं मनसः प्रियम् ॥ देवीगृहं प्रकर्तव्यं सर्वलक्षणलक्षितम् । दश द्वादश वाऽरभ्य यावद्धस्तशतं भवेत् ॥ दुर्गागृहं प्रकर्तव्यं चतुरस्त्रं सुशोभनम् । रहस्यं स्वस्तिकाद्यैश्च चर्चितं वस्त्रमण्डितम् ॥ दीपमालापरिक्षिप्तं द्वारदामोप-

(अथ शान्तिस्वस्त्ययनम्)

ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः। स्वस्तिनः पूषाः विश्ववेदाः। स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः। स्वस्ति नो वृहस्पतिर्दधातु। ॐ स्वस्ति नो मिमीतामश्विना भगः। स्वस्ति देव्यदिति रनर्वणः। स्वस्ति पूषा असुरो दधातु नः। स्वस्ति द्यावापृथिवी सुचेतुना। स्वस्ति वायुमुप अवामहे। सोमं स्वस्ति भुवनस्य यः पतिः। वृहस्पतिं सर्वगणं स्वस्तये। स्वस्तय आदित्यासो भवन्तु नः। विश्वेदेवा नोऽद्या स्वस्तये।

वैश्वानरो वसुरग्निः स्वस्तये। देवा अवन्तु ऋभवः स्वस्तये। स्वस्ति नो रुद्रं पात्वंहसः। स्वस्ति मित्रावरुणः। स्वस्ति पथ्ये रेवति। स्वस्ति न इन्द्रश्चाग्निश्च। स्वस्ति नो अदिते कृधि। ॐ स्वति पन्थामनुचरेम। सूर्य्याचन्द्रमसाविव। पुनर्ददताघ्नता सङ्गमेमहि। ॐ स्वस्त्यं न ताक्ष्यमरिष्टनेमिं महद्भूतं वायसं देवानां। असुरघ्नमिन्द्रसखं समस्तु वृहद्यशोनावमिवारुहेम। ॐ अंहो मुचमांगिरसं गयञ्च। स्वस्त्यां त्रेयं मनसा च ताक्ष्र्यम्। प्रयतपाणिः शरणं प्रपद्ये॥ ॐ सोमं राजानं वरुणमग्निमन्वारभामहे। आदित्यं विष्णुं सूर्य्यं ब्रह्माणञ्च वृहस्पतिम्। ॐ गणानान्त्वा गणपति ँ हवामहे। प्रियाणान्त्वा प्रियपति ँ हवामहे। निधोनान्त्वानिधिपति ँ हवामहे। वसोमम आहम जानिगर्भध मात्वम जासि गर्भधम्। ॐ अम्बे अम्बिके अम्वालिके नमानयति कश्चनः ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्। ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तं। इष्णन्निषाणा मुम्मईषाण सर्वलोकम्मईषाण। ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्ववेदाः शान्तिर्ब्रह्म शान्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सा मा

शोभितम्। गौरवृद्गोमयाभ्याञ्च लिप्तं शस्तं समीरितम्॥ तन्मध्ये वेदिका कार्य्या चतुर्हस्ता समा शुभा। दिक्षु ध्वजां निवध्नीयात् लोकपात्रसमप्रभाम्॥ वितानदर्भमालाद्यैरलं कुर्वीत मण्डपम्। गन्धपुष्पाम्बरोपेतान् कुम्भांस्तेषु विनिक्षिपेत्॥ मण्डपे कलशौ द्वौ द्वौ द्वारे द्वारे निवेशयेत्। गालितोदकसंपूर्णावाम्रपल्लवशोभितौ॥

शान्तिरेधि। यतोयतः समीहसे ततो नो अभयं कुरु। शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः। ॐ शान्तिः ॐ शान्तिः ॐ शान्तिः।

(पुराणोक्तन्तु)

ओं गुरुभ्यो नमः। ओं देवेभ्यो नमः। ओं ब्राह्मणेभ्यो नमः। ओं नवग्रहेभ्यो नमः। ओं क्षेत्रपालेभ्यो नमः।

ओं सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेत् शृणुयादपि।
विद्यारम्भे पूजने च प्रवेशे निर्गमे तथा॥
संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥
शुक्लांवरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये।
विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान्।
सरस्वतीं प्रणम्यादौ सर्वकार्य्यार्थसिद्धये।
सर्वेष्वारब्धकार्येषु त्रयस्त्रिभुवनेश्वराः।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः॥
वक्रतुण्डमहाकाय सूर्यकोटिसमप्रभ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।
वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्यास्युस्तं नमामि गजाननम्।
गणनाथं नमस्कृत्य नमस्कृत्य पितामहम्।
विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम्॥
स्थानं क्षेत्रं नमस्कृत्य दिननाथं निशाकरम्।
धरणीगर्भसंभूतं शशिपुत्रं बृहस्पतिम्।
दैत्याचार्य्यं नमस्कृत्य सूर्यपुत्रं महाग्रहम्।
राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः।
शक्रादिदेवताः सर्वानृषींश्चैव तपोधनान्॥

गर्गमुनिं नमस्कृत्य नारदं पर्वतं तथा ।
वशिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम् ।।
अगस्त्यं च पुलस्त्यं च दक्षमित्रं पराशरम् ।।
भरद्वाजं च माण्डव्यं याज्ञवल्क्यं च गालवम् ।।
अन्ये विप्रास्तपोयुक्ता वेदशास्त्रविचक्षणाः ।
तान् सर्वान् प्रणिपत्याहं शुभकर्म समारभे ।।
ओं पुण्यं पुण्याहं दीर्घायुरस्तु । ओं निर्विघ्नमस्तु ।।

(तन्त्रोक्तन्तु)

ॐ ह्रीं हूं स्वस्ति नः कात्यायन्या । ह्रँ अपर्णाश्रिवा स्वस्ति नः काली ह्रौं मेधा अमृतमयी ह्रीं स्वस्ति नः प्रत्यंगिरा देवता दधातु । ह्रीं स्वस्ति । ह्रीं स्वस्ति । ह्रीं स्वस्ति ।। ॐ सर्वश्च देवश्च विभीतकश्च प्रभञ्जतां मेरुसुवर्णदायी । कालोद्भमामासचेन्द्रियं श्रियो विविक्तरागाश्च पुनर्भवाय वै ।।

।। अथ वरणदानम् ।।

अथान्यकर्तृकपूजापक्षे यजमानः पुष्प-चन्दन-वस्त्र-यज्ञोपवीत-कटिसूत्राङ्गुरीयक[1]मादाय, ॐ अद्याश्विने मासि शुक्ले पक्षे प्रतिपत्तिथावमुकगोत्रः श्री अमुकशर्म्माहमद्यारभ्य विजयदशमीपर्यन्तं वार्षिक-शरत्कालीनसाङ्गश्रीदुर्गापूजां कर्तुम् अमुकगोत्रममुकशर्म्माणं ब्राह्मण-मेभिः पुष्पचन्दनवस्त्रयज्ञोपवीतकटिसूत्राङ्गुरीयकैः पूजकत्वेन त्वामहं वृणोमि । इत्युक्ते यजमाने पूजकः ॐ वृतोऽस्मि । पुनः ॐ यथाविहितं कर्म कुरु । ॐ करवाणीति प्रतिवचनम् ।

---

[१] प्रतिपन्निर्णयः । अमायुक्ता न कर्तव्या प्रतिपत्पूजने मम । मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता । आद्याः षोडशनाडीस्तु लब्धा यः कुरुते नरः । कलशस्थापनं तत्र अरिष्टं जायते ध्रुवम् । घटिकाः षोडश त्याज्या आद्याः प्रतिपदस्तु याः । कलशस्थापनं कुर्यात्कल्याणं जायते ध्रुवम् । अमायुक्ताऽपि कर्तव्या यदि न स्यात्परेऽहनि ।।

★ जपे होमे तथा दाने पूजने पितृकर्मणि । अशून्यन्तु करं कुर्य्यात् सुवर्णरजतैः कुशैः ।।

॥ अथाङ्गप्रायश्चित्तम् ॥

(१) कुशत्रयतिलजलान्यादाय ॐ अद्याश्विने मासि शुक्ले पक्षे प्रतिपत्तिथौ अमुकगोत्रस्यामुकशर्म्मणो मम कर्तव्येऽस्मिन् शरत्कालीन-साङ्गश्रीदुर्गापूजाकर्मणि सकलज्ञानाज्ञानकृतकायिकवाचिक-मानसिकपापक्षयो भवतु ॥

ॐ देवि त्वं प्राकृतं चित्तं पापाक्रान्तमभून्मम ।
तन्निस्सारय चित्तान्मे पापं हूँ फट् च ते नमः ॥
ॐ सूर्यः सोमो यमः कालो महाभूतानि पञ्च वै ।
पवनो दिक्पतिर्भूमिराकाशं ऋचरामराः ॥
ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम् ।
(एते शुभाशुभस्येह कर्मणः सन्तु साक्षिणः) ॥

इति पठित्वा गायत्र्या तन्त्रोक्तमन्त्रेण च ॐ मणिधरि वज्रिणि महा-प्रतिसरे रक्ष रक्ष हूँ फट् स्वाहा । ॐ विशुद्धधर्मगायत्रि सर्व-पापानि समयाशेषकल्मषान्नाशय हूँ फट् स्वाहा ॥ इति शिखां स्पृष्ट्वा हस्तपादादिकं प्रक्षाल्य सम्यग् वीक्षितेन विशुद्धजलेन ब्राह्मतीर्थेन वैदिकगायत्रीमन्त्रेण तन्त्रोक्तमन्त्रेण च ॐ आत्मतत्त्वाय स्वाहा । ॐ विद्यातत्त्वाय स्वाहा । ॐ शिवतत्त्वाय स्वाहा । ॐ सर्वतत्त्वाय स्वाहा । ॐ दुर्गे दुर्गे रक्षिणि स्वाहा । ॐ ह्रीं स्वाहा । इति वारत्रयमाचम्याव-शिष्टजलम् ईशाने परित्यज्य संवृताङ्गुष्ठमूलेन वारद्वयं मुखं प्रमृज्य, संहताभिः अङ्गुष्ठतर्जनीमध्यमाभिः ओष्ठम्, अंगुष्ठर्जनीभ्यां नासिकाम्, अंगुष्ठानामिकाभ्यां चक्षुर्द्वयम्, श्रोत्रद्वयम्, संह-ताभ्यां अंगुष्ठकनिष्ठाभ्यां नाभिम्, हस्त तलेन हृदयम्, सर्वाभिः मस्तकम्, सर्वासामंगुलीनामग्रभागेन बाहुद्वयम् संमृज्य । ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा । यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ ॐ पुण्डरीकाक्षः पुनातु । इति विष्णुं स्मृत्वा शुचिर्भूत्वा गङ्गाजलेन (२) पञ्चगव्येन चात्मानं पूजोपकरणञ्च सिक्त्वा, "आसनशुद्धिं" कुर्य्यात् ।

---

(२) कुशहीनञ्च यत्कर्म यच्च दानं विनोदकम् । असंख्यातञ्च यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥

॥ अथासनशुद्धिः ॥

(१) साधकः विशुद्धकम्बलासने वद्धकमलासनः प्राङ्मुखः उदङ्मुखो वोपविश्य "ॐ रक्ष रक्ष फट् स्वाहा" इति मन्त्रेण आसनस्थानमभिषिच्य, "ॐ पवित्र वज्रभूमे हूँ फट् स्वाहा" इति मन्त्रेण भूमिं अभिमन्त्य, ॐ ह्रीं आधारशक्तिकमलासनाय नमः इति आसनमभ्यर्च्य, आसनाधः रक्तचन्दनेन त्रिकोणयन्त्रं विलिख्य 'ॐ आसुरेखे वज्ररेखे हूँ फट् स्वाहा" इति मन्त्रेण मण्डलं विलिख्य "ह्सौं" इति प्रेतबीजं मध्ये विलिख्य ॐ ह्रीं आधारशक्तिकमलासनाय नमः इति गन्धपुष्पाक्षतजलादिभिः संपूज्य, ॐ अनन्ताय नमः। ॐ विमलासनाय नमः। ॐ पद्मासनाय नमः। ॐ ह्सौं महाप्रेतपद्मासनाय नमः। इति संपूज्य आसनं धृत्वा पठेत्। ॐ आसनमन्त्रस्य मेरुपृष्ठऋषिः सुतलश्छन्दः कूर्मो देवता आसनोपवेशने विनियोगः।

"ॐ पृथ्वि त्वया धृता लोकाः देवि त्वं विष्णुना धृता।
त्वञ्च धारय मां नित्यं पवित्रं कुरु चासनम्" ॥

इति पुष्पं दत्वा प्रणमेत्। ततः ॐ वास्तुपुरुषाय नमः। ॐ ब्रह्मणे नमः। ॐ धर्माय नमः। ॐ ज्ञानाय नमः। ॐ वैराग्याय

---

[२] (पञ्चगव्यप्रमाणम्) गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम्। पञ्चगव्यमिदं प्रोक्तं ऋषिभिः पूर्वदर्शिभिः। पलमात्रं दुग्धभागं गोमुत्रं तावदिष्यते। घृतं च पलमात्रं स्यात् गोमयं तोलकद्वयम्। दधि प्रसृति मात्रं स्यात् पञ्चगव्यमिदं स्मृतम् ॥

(१) उपविश्यासने विद्वान् प्राङ्मुखो वाप्युदङ्मुखः। (स्वस्यासनविचारस्तु) यथा काम्यं तथा स्वस्य आसनं परिकीर्तितम्। पद्मासनं पौष्टिके च, स्वस्तिकं शान्तिकर्मणि। विद्वेषे कुःकुटाख्यंच, अर्धे स्वस्तिकमेव च ॥ उच्चाटने तथा स्तम्भे मारणे विकटासनम्। वशीकरणकर्मादौ भद्रासनमुदीरितम्। एकं सिद्धासनं प्रोक्तं सर्वत्र कमलासनम् ॥ (आधारासनविचारस्तु) शुक्लं वा यदि वा कृष्णं विशेषाद्रक्तकम्बलम्। मेषासनं तु वश्यार्थे आकृष्टौ व्याघ्रचर्म च। शान्तौ मृगाजिनं शस्तं वेत्रजं श्रीविवर्धनम्। सर्वकामार्थदं देवि पटवस्त्रासनं तथा। कुशासनं कंवलं वा सर्वकर्मसु पूजितम् ॥ व्याघ्राजिने सर्वसिद्धिः ज्ञानसिद्धिः मृगाजिने। वस्त्रासनं रोगहरं केवलं प्रीतिवर्धनम्। कौशेयं पुष्टिदं प्रोक्तं कंवलं सर्वसिद्धिदम् ॥ (इति तन्त्रसारे)

नमः। ॐ ऐश्वर्य्याय नमः। इति पूर्वादिक्रमेण गन्धपुष्पाक्षतः संपूज्य, एवं कोणेषु ॐ अधर्माय नमः। ॐ अज्ञानाय नमः। ॐ वैराग्याय नमः। ॐ अनैश्वर्य्याय नमः। ॐ दिशायै नमः। ॐ विदिशायै नमः इति संपूज्य। ॐ रक्ष २ हूँ फट् स्वाहा। "ॐ ग्रांहूँ फट् स्वाहा" इतिपञ्चवारं व्यापकं विधाय। "ॐ अस्त्राय फट्" इति मन्त्रेण वामपादाघातत्रयेण दिव्यदृष्ट्या भौमान् अन्तरीक्षगान् विघ्नानुत्सार्य्य ऊर्ध्वमधः तालत्रयं दत्वा छोटिकादिभिर्दशदिग्बन्धनं कृत्वा नाराचमुद्रया लाजा, चन्दन, अक्षत, दूर्वा, भस्म, कुशानादाय,

ॐ अपक्रामन्तु भूतानि पिशाचाः प्रेतगुह्यकाः।
ये चात्र निवसन्त्यन्येदेवता भुवि संस्थिताः॥
ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः।
ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया॥
ते सर्वे विलयं यान्तु ये मां हिंसन्ति हिंसकाः।
मृत्युरोगभयक्रोधाः पतन्तु रिपुमस्तके॥

इति चतुर्दिक्षु तान् क्षिपेत्।

॥ अथ प्राणायामः : ॥ (१)

ततो "ह्रीं" इति मन्त्रेण तत्तद्देवतायाः मूलमन्त्रेण वा षोडश वारं जपन् दक्षिणनासिकाया वायुं पूरयित्वा तमेव मन्त्रं चतुःषष्टि-

---

(१) प्राणो वायुः शरीरस्य आयामस्तस्य निग्रहः। "प्राणायाम" इति प्रोक्तो द्विविधः कथ्यते हि सः॥ सगर्भो मन्त्रजापेन निगर्भो मालया भवेत्। कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणम्॥ "प्राणायामः" स विज्ञेयस्तर्जनी-मध्यमे विना। पूरकः कुम्भकश्चैव रेचकश्चेति स त्रिधा॥ प्राणायामैर्विना यद्यत् कृतं कर्म निरर्थकम्। अतो यत्नेन कर्तव्याः प्राणायामाः शुभार्थिभिः [इतिपुरश्चर्य्यार्णवे]।

(२) शरीराकारभूतानां भूतानां यद्विशोधनम्। अद्वयब्रह्मसंयोगात् "भूतशुद्धि" रियं मता॥ भूतशुद्धिलिपिन्यासौ विना यस्तु प्रपूजयेत्। विपरीत-फलं दद्यादभक्त्या पूजनं यथा॥ * वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा। याम्योरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम्। अंगुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकयेत्। एतद् व्याधिविघातकारि यमिनां "पद्मासनं" प्रोच्यते॥ (इति नीलतन्त्रे)

वारं जपन् "कुंभकं" कृत्वा पुनर्द्वादशवारं जपन् वामनासया वायु रेचयेत् । एवं पुनः अनुलोमविलोमक्रमेण वारद्वयं प्राणायाम विधाय भूतशुद्धि कुर्य्यात् ।। यथा—

प्राणयामं विधायेत्थं "भूतशुद्धिं" समाचरेत् ।।

।। अथ भूतशुद्धिः ।।२।।

अथ साधकः वद्धपद्मासनः * स्वाङ्के उत्तानौ करौ कृत्वा मूलाधारे ध्वाजाधोगुर्दोर्ध्वे चतुःशोरणपत्रे "वँ शँ षँ सँ" इति सहिते प्रसुप्तभुजगाकारां स्वयम्भूलिङ्गवेष्टिनीम् कुलकुण्डलिनीं ध्यायेत् ।।

ॐ ध्यायेत्कुण्डलिनीं सूक्ष्मां मूलाधारनिवासिनीम् ।
विशतन्तुनिभां देवीं शुद्धकाञ्च न सन्निभाम् ।
प्रसुप्तभुजगाकारां स्वयंभूलिङ्गवेष्टिनीम् ।
कोटिसौदामिनीभासां विद्युत्पटलसन्निभाम् ।
ज्वलत्पावकसंकाशां सूक्ष्मां तेजःस्वरूपिणीम् ।
मूलाधारात् शिरः पद्मं स्पृशन्तीं विद्युदाकृतिम्।
तामिष्टदेवतारूपां सार्द्धत्रिवलयान्विताम् ।
तामुत्थाप्य महादेवीं "हँ स" मन्त्रेण साधकः ।
उद्यद्दिनकरोद्योतां यावच्छ्वासन् दृढ़ासनः ।
अशेषाशुभशान्त्यर्थं समाहितमनाश्चिरम् ।
तत्प्रभापटलव्याप्तं शरीरमपि चिन्तयेत् ।।
सुषुम्ना वर्त्मनैवैनां परब्रह्मणि योजयेत् ।।

एवं ध्यात्वा "सोहमिति" मन्त्रेण हृदयस्थं जीवात्मानं प्रदीपकलिकाकारं मूलाधारस्थकुलकुण्डलिन्या सह सुषुम्नावर्त्मना चतुर्दलात्मकगुदमेढ्रान्तरालस्थ [१] "मूलाधारचक्र" षड्दलात्मकलिङ्गमूलस्थित "स्वाधिष्ठानचक्र" दशदलात्मकनाभिमण्डलस्थित "मणिपूरचक्र" द्वादशदलात्मकहृदयस्थित "अनाहतचक्र" षोडशदलात्मककण्ठस्थित "विशुद्धचक्र" द्विदलात्मकभ्रूमध्यस्थित "आज्ञाख्यचक्र" इति षट्चक्राणि भित्त्वा शिरोऽवस्थिताधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्य तयोरैक्यं विभाव्य ध्यानयोगेन मनसा सोऽहं सोऽहं च विभाव्य, तत्रैव पृथिवी-अप्-तेजः—वायु-आकाश, गन्धरूप-रस

स्पर्श-शब्द-नासिका, जिह्वा-चक्षु-त्वक्-श्रोत्र-वाक्-पाणि-पाद-पायु-उपस्थ, प्रकृति-मनःबुद्धि-अहंकार-चतुर्विंशतितत्त्वानि तत्र लीनानि विभाव्य नाभिदेशे 'यँ' इति वायुबीजं धूम्रवर्णं ध्यात्वा तस्य वामनासापुटेन षोडशवारं जपन् वायुना देहमापूर्य्य तदुत्पन्नेन वातेन शुष्कं देहं विचिन्त्य, नासापुटौ धृत्वा तस्य बीजस्य चतुःषष्ठिवारजपेन "कुम्भकं" कृत्वा वामकुक्षिस्थं कृष्णवर्णं कज्जलप्रभं ब्रह्महत्याशिरस्कं स्वर्णस्तेयभुजद्वयं सुरापानहृदयं गुरुतल्पकटिद्वयं तत्संसर्गपदद्वन्द्वमङ्गप्रत्यङ्गपातकम्। उपपातकरोमाणं रक्तश्मश्रुविलोचनम्। खड्गचर्मधरं क्रमङ्गुष्ठरमपरिमाणकम्। अधोमुखं महाभीमं रूक्षं पापं विचिन्तयेत्॥ एवं पापपुरुषेण सह देहं संशोध्य तस्य द्वात्रिंशद्वारजपेन दक्षिणनासया वायुं रेचयेत्। पुनः "रँ" इति वह्निबीजं रक्तवर्णं हृदये ध्यात्वा दक्षिणनासापुटेन षोडशवारजपरूपपूरकेण वायुना देहमापूर्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा पूर्वोक्तकृष्णवर्णपापपुरुषेण सह मूलाधारोत्थितेन वह्निना देहं दग्ध्वा तस्य बीजस्य द्वात्रिंशद्वारजपेन वामनासया भस्मना सह वायुं रेचयेत्। ततः 'ठँ" इति चन्द्रबीजं शुक्लवर्णं सजस्रदलमध्यगं परमात्मानं शिरशि ध्यात्वा वामनासया षोडशवारजपेन सहस्रारात् सुधां नीत्वा नासापुटौ धृत्वा "वं" इति शुद्धवरुणबीजस्य चतुःषष्ठिवारजपेन शिरःस्थितचन्द्रबीजस्वरुपपरमात्मनः गलितसुधावृष्टचा समस्तदेहमाप्लाव्य "लँ" इति भूबीजस्य द्वात्रिंशद्वारजपेन पञ्चाशन्मातृकावर्णात्मकशरीरं दृढं विभाव्य लीनीकृतानि पृथिव्यादीनि चतुर्विंशतितत्त्वानि यथास्थानं स्थापयित्वा ब्रह्मबीजं "हँस" (२) इति हृदयकमलमानीय तेजोमयं देवीरूपमात्मानं चिन्तयेत्।

अथवा कुण्डलीं देवीं पञ्चभूतादिना सह।
परमात्मनि संयोज्य तयोरैक्यं विभाव्य च।
ध्यानयोगेन मनसा सोऽहं सोऽहं विभावयेत्।
भूतशुद्धिरियं प्रोक्ता महापापौघनाशिनी॥

एवं भूतशुद्धिं कृत्वा पूर्वोक्तरूपेण पुनः प्राणायामं★ कृत्वा "तत्त्वशुद्धिं" कुर्यात्॥

★ तेन संजनितं तेजो वह्निप्राकारमुद्रया। रक्षेदात्मनि मूलेन प्राणायाम-

॥ अथ तत्वशुद्धिः ॥

भूतशुद्धि विधायेत्थं "तत्वशुद्धि" समादिशेत्। ॐ श्रुतिः प्राणापानव्यानोदानसमाना मे शुध्यन्ताम्। ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। ॐ पृथिव्यप्तेजोवाय्वाकाशानि मे

त्रयं चरेत् ॥ (१)—(**मूलाधारलक्षणम् यथा योगसारे**) गुदाच्च द्व्यङ्गुलादूर्ध्वं मेढ्राच्च द्व्यङ्गुलादधः। मूलाधारमिदं प्रोक्तं पीतवर्णं चतुर्दलम् ॥ तोयवर्णादिभिर्वर्णैः चतुर्भिः समलंकृतम्। गुदमेढ्रान्तरालस्थं "मूलाधारं" त्रिकोणकम् ॥ (२) गणेश्वरो विधिर्विष्णुः शिवो जीवो गुरुस्तथा। षडेते हंसतामेत्य मूलाधारादिषु स्थिताः ॥ हंसो गणेशो विधिरेव हंसो हंसो हरिर्हंसमयश्च शम्भुः। हंसो हि जीवो गुरुरेव हंसो हंसोऽहमात्मा परमार्थरूपः ॥ सहस्रारे तु देवेशि हंसरूपी परः शिवः। स्थानान्येतानि देवेशि शक्तिर्येषु प्रकाश्यते ॥ सहस्रारं महापद्मं विसर्गाधः प्रतिष्ठिम्। अधोमुखं सर्ववर्णयुक्तामारक्तकेशरम्। एतदेव हि कैलाशसंज्ञकं चक्रमुच्यते ॥ यत्र नित्योदितश्चन्द्रस्त्रिश्रृङ्गोऽमृतवर्षणः ॥ (**अथ साधकः शक्तश्चेत् मूलाधारादिषट्चक्रेषु गणेशादिदेवानां ध्यानं कुर्यात्** ॥) तद्यथा (**हृदयकमले हंसध्यानम्**)★ अग्नीषोमगुरुद्वयं प्रणवकं विन्दुं त्रिनेत्रोज्वलम्। भास्वद्रुद्रमुखं शिवांघ्रियुगलं पार्श्वस्थकालानलम्। उद्यद्भास्करकोटिकान्तिसदृशं "हँ सँ" जगद्व्यापिनम् ॥ नित्यानन्दमयं हृदाम्वुजकुटीनीडे सदा भावयेत् ॥ (**मूलाधारचक्रे गणेशध्यानम्**)। "व श ष" सदल युक्ते सम्यगाधारपद्मे। तरुणकरुणगात्रम् वारणास्यं त्रिनेत्रम्। अभयवरदहस्तं चारुपाशांकुशोद्यत् कररुचिरसमन्यं चिन्तयेदादिमूर्तिम् ॥ (**स्वाधिष्ठानचक्रे ब्रह्मध्यानम्**) "व भ म य र ल" संज्ञैरक्षरैः क्लृप्तपद्मे। सुरुचिरमुपदिष्टे पङ्कजैः सन्निधानम् ॥ अभयवरदहस्तं कुंडिकां चाक्षामालाम्। दधतममलमूर्ति चिन्तयेद्विश्वयोनिम् ॥ (**मणिपूरचक्रे विष्णुध्यानं यथा**)। डाद्यैः फान्तगतैः प्रकल्पितदले पद्मे निविष्टं हरिम्। मार्त्तण्डद्युतिमादिपूरुषमजं नारायणं चिन्मयम् ॥ हस्तन्यस्तगदारिशङ्खकमलं पीताम्वरं कौस्तुभम्। श्रीवत्साङ्कितमिन्द्रनीलसदृशं ध्यायेज्जगन्मोहनम् ॥ (**अनाहतचक्रे शिवध्यानम्**) काद्यैष्ठान्तगतैः प्रकल्पितदले पङ्केरुहे पार्वती-कान्तं पूर्णशशाङ्ककोटिसदृशप्रख्यं कपर्दोज्वलम् ॥ शान्तं टङ्कमृगाभयास्पदकरं नागादिभूषोज्वलम् ग्रैवेयाङ्गदहारकुण्डलधरं चर्माम्वरं चिन्तयेत् ॥ (**विशुद्धाख्यचक्रे जीवात्मध्यानम्**) मूर्त्यङ्गेषु निविष्टमङ्गरहितं शान्तं रुचा भासुरम्।

शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा । ॐ प्रकृत्यहंकार-बुद्धिमनःश्रोत्राणि मे शुध्यन्तामित्यादि ॐ वाक्चक्षुःश्रोत्रजिह्वा-घ्राणवचांसि मे शुध्यन्तामित्यादि । ॐ पाणिपादपायूपस्थ-शब्दा मे शुध्यन्तामित्यादि । ॐ स्पर्शरूपरसाकाशामे शुध्यन्तामित्यादि ॐ वायुतेजःसलिलभूम्यात्मानो मे शुध्यन्तामित्यादि । इति सप्तमन्त्रान् परामृशन् हस्ताभ्यां सप्तधा सर्वाङ्गे स्पृशेदिति तत्त्व-शुद्धिः । तत्त्वशुद्धि विधायेत्थं 'पूजाद्रव्याणि" शोधयेत् ॥

(अथ द्रव्यशुद्धिः)

अथ साधकः पञ्चगव्येन, गङ्गाजलेन च, सामान्यार्घोदकेन विशेषार्घोदकेन वा, "ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॐ अस्त्राय फट्" इति मूलमन्त्रास्त्राभ्यां आत्मानं पूजोपकरणं मण्डलं चाभिषिच्य धेनुमुद्रां सर्वत्र पूजोपकरणे दर्शयेदिति द्रव्यशुद्धिः ॥

(अथ पुष्पशुद्धिः)

स्वदक्षिणभागे त्रिकोणमण्डलोपरि पुष्पपात्रं निधाय जलं गृहीत्वा ॐ शताभिषेके पदे हूँ फट् स्वाहा । ॐ पुष्पकेतुराजार्हत् ॥ ॐ पुष्पे

व्याप्ताशेषचराचरं गुणमयं भावेन सच्चिन्मयम् । मूर्तामूर्तममूर्त्तमेकममलं ज्योतिःप्रदीपोपमम् । साक्षात्षोडशपत्रवर्णकमले जीवं परं चिन्तयेत् ॥ **(आज्ञाचक्रे गुरुध्यानम्)** । ऋक्षार्णद्वयचारुपत्रकमले दिव्ये जगत्कारणे । विश्वोत्तीर्णमनेकदेहनिलयं स्वच्छन्दमात्मेच्छया । तत्तद्योग्यतया स्वदेशिक-तनुं भावैकसच्चिन्मयम् । प्रत्यक्षाक्षरविग्रहं गुरुवरं ध्यायेत्परं दैवतम् ॥ **(सहस्रदलकमले परमात्मध्यानम्)** विश्वव्यापिनमादिदेवममलं नित्यं परं निष्कलम् । नित्योद्बुद्धसहस्रपत्रकमले लिप्यक्षरैर्मण्डिते नित्यानन्दमनन्तपूर्ण-परचित्सत्तास्फुरत्तात्मकम् । स्मृत्वात्मानमनुप्रविश्य कुहरे स्वच्छन्दतः सर्वतः ॥ (इति पुरश्चर्यार्णवे)

पञ्चशुद्धिं विना पूजा अभिचाराय कल्पते । आत्मशुद्धिः, स्थानशुद्धिः, मन्त्रशुद्धिस्तथैव च ॥ द्रव्यशुद्धिः, देवशुद्धिः, शुद्धिः पञ्चविधेरिता ॥ पञ्च-शुद्धिं विधायेत्थं पश्चाद्यजनमाचरेत् ॥ पञ्चशुद्धिविहीनेन यत्कृतं न च तत्कृतम् ॥ सस्नानभूतसंशुद्धिप्राणायामादिभिः प्रिये । षडङ्गान्यखिलन्यासैरात्मशुद्धिरितीयता । (इति श्यामारहस्ये)

पुष्पे महापुष्पे सुपुष्पे पुष्पसंभवे । पुष्पचयावकीर्णे हूँ फट् स्वाहा । इति सिञ्चेत् ॥

(अथ करशुद्धिः) *

ॐ ऐं हूँ इति मन्त्रेण चन्दनपुष्पे गृहीत्वा ह्रौं इति मन्त्रेण कराभ्यां मर्दयित्वा क्लीं इति मन्त्रेण दक्षहस्तेन संगृह्य ॐ तत्तत् इति वामहस्तेनाघ्राय ।

ॐ ते सर्वे विलयं यान्तु ये मां हिंसन्ति हिंसकाः ।
मृत्युरोगभयक्रोधाः पतन्तु रिपुमस्तके ॥

इति तत्पुष्पं ऐशान्यां परित्यजेत् ॥

[१] (अथ सामान्यार्घस्थापनम्)

अथ स्वदक्षिणभागे विशुद्धजलेन भूमिं संप्रोक्ष्य तत्र रक्तचन्दन-सिन्दूरादिना मण्डलं कृत्वा तत्र चतुरस्रां रेखां विलिख्य तन्मध्ये त्रिकोण-यन्त्रं च विलिख्य ॐ आधारशक्तये नमः इति पद्यादिभिः आधार-शक्तिं सम्पूज्य तत्र ॐ ह्रः सामान्यार्घपात्रं स्थापयामि इति स्वर्ण-रौप्यताम्राद्यन्यतमार्घपात्रं[१] संस्थाप्य पात्रे ओंकारेण जलं निधाय ।

---

* पञ्चगव्यार्घतोयाभ्यां प्रोक्षयेन्मण्डपान्तरम् । संमार्जनोपलेपाद्यैर्दर्पणो-दरवत्कृतम् । विमलैर्धूपदीपादिपुष्पदामादिशोभितम् । पञ्चवर्णमयं चित्रं "स्थानशुद्धि" रियं मता ॥ गृहीत्वा मातृकावर्णान् मूलमन्त्राक्षराणि च । क्रमात् क्रमाद्द्विरावृत्तिः "मन्त्रशुद्धि" रियं मता ॥ पूजाद्रव्यादि संप्रोक्ष्य मूला-स्त्राभ्यां विधानतः । दर्शयेद्धेनुमुद्राञ्च "द्रव्यशुद्धि" रियं मता ॥ पीठे देवीं प्रतिष्ठाप्य सकलीकृत्य मन्त्रवित् । मूलमन्त्रेण दीप्तात्मा अभिभाव्योदकेन च । त्रिधारं प्रोक्षयेद्विद्वान् "देवशुद्धि" रितीयता । (इति मेरुतन्त्रे) ।

(१) अथार्घ्यादिकपात्राणां फलं वक्ष्ये शुभाशुभम् । सर्वकामप्रदं स्वर्णं रौप्यमायुःसुतप्रदम् ॥ सौभाग्यं ताम्रपात्रञ्च धर्मवृद्धिस्तु मृण्मये । नारिकेले देवतुष्टिः पुष्टिकृत् काचसंभवम् । लक्ष्मीप्राप्तिर्बिल्वपात्रे ब्राह्मण्यं ब्रह्मवृक्षजे । मारणोच्चाटने लौहं स्तम्भे पाषाणजं भवेत् ॥ मन्त्रस्याराधने काष्ठं वाममार्गे तु नीम्बिकम् । रत्नदीनान्तु पत्राणि शुभरेखाङ्कितानि च । अर्घ्यनैवेद्यपूजार्थं बलिदाने प्रकल्पयेत् ॥ (इति तन्त्रतत्त्वे)

ॐ गंगे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिंधु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥
ॐ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ।
तेन सत्येन देवेश तीर्थं देहि दिवाकर ॥

इति सूर्यमण्डलात् अंकुशमुद्रया तीर्थमावाह्य, पुष्पाक्षतैः ॐ गङ्गादिसकलतीर्थेभ्यो नमः । ॐ हृदादिषडङ्गदेवताभ्यो नमः । ॐ ॐ आँ अर्कमण्डलाय द्वादशकलात्मने नमः । ॐ ईं वह्निमण्डलाय दशकलात्मने नमः । ॐ ऊँ सोममण्डलाय षोडशकलात्मने नमः । इति सम्पूज्य, तत्र मूलमन्त्रं प्रणवं वा दशधा जप्त्वा धेनुमुद्रया अमृतीकृत्य, मत्स्यमुद्रया आच्छाद्य, योनिमुद्रां प्रदर्श्य, तज्जलेन पूजोपकरणमात्मानञ्चाभिषिच्य विशेषार्घ्यस्थापनं कुर्य्यात् ॥

(अथ विशेषार्घ्यस्थापनम्)

स्ववामभागे "ॐ आसुरेखे वज्ररेखे हूँ फट् स्वाहा" इति मन्त्रेण रक्तचन्दनसिन्दूरादिना त्रिकोणगर्भषट्कोणवृत्तचतुरस्रमण्डलं विलिख्य कुशैः ॐ "लँ" इति भुवमभिषिच्य, "वँ" इति भुवं समृज्य, षट्कोणेषु हृदयादिषडङ्गं सम्पूज्य चतुरस्रे ॐ पूर्णगिरीपीठाय नमः । (इति पूर्वे) ॐ उड्डीयानपीठाय नमः । (इति दक्षिणे) ॐ कामरूपपीठाय नमः (इति पश्चिमे) ॐ जालन्धरपीठाय नमः (इति उत्तरे) इति संपूज्य : ॐ आधारशक्तये नमः । ॐ कूर्ममेषाभ्यान्नमः (इति मध्ये) ॐ आँ अर्कमण्डलाय द्वादशकलात्मने नमः । ॐ ईँ वह्निमण्डलाय दशकलात्मने नमः । ॐ ऊँ सोममण्डलाय षोडशकलात्मने नमः । इति पञ्चोपचारैः तत्तन्मण्डलं संपूज्य । ॐ ह्रीँ फट् इति आधारपात्रं त्रिपदिकां संस्थाप्य ॐ आधारपात्राय नमः इति सम्पूज्य । तदुपरि सौवर्णरजतताम्राद्यन्यतमपात्रं (१) शङ्खं वा ॐ अस्त्राय फट् इति संस्थाप्य । ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे स्वर्गकपालाय सर्वाधाराय सर्वोद्भवाय सर्वशुद्धिभयाय सर्वासुररुधिरारुणाय शुभ्राय सुधाभाजनाय देवीकपालाय नमः । इति पुष्पाक्षतैः सम्पूज्य । शङ्खे सुधाबध्या मूलमन्त्रेण खलं निधाय तत्र अङ्कुशमुद्रया सूर्य्यमण्डलात् तीर्थमावाहयेत् । तद्यथा

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥
ॐ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे।
तेन सत्येन मे देव तीर्थन्देहि दिवाकर॥
ॐ गंगाद्याः सरितः सर्वाः सरांसि जलदा नदाः।
ह्लदाः प्रस्रवणाः पुण्याः स्वर्गपातालभूगताः।
सर्वतीर्थानि पुण्यानि पात्रे कुर्वन्तु सन्निधिम्॥

इति तीर्थान्यावाह्य। ॐ ऐं ह्रीं श्रीं ह्रौं ग्रों ह्रीं लीं इँ फट् हसौं हूँ इति जलमभिमन्त्र्य शङ्ख-धेनु-योनि-मुद्राः दर्शयित्वा मत्स्यमुद्रया ग्राच्छाद्य मूलमन्त्रं दशधा जप्त्वा पात्रे जवा-करवीरद्रोणकमलादिपुष्पमक्षतं, दूर्वा, दधि, तिल, यव, सर्वौषधीः विल्वपत्रं, कुशमूलं दत्वा त्रिखण्डामुद्रां प्रदर्श्य गन्धपुष्पाक्षतैः ॐ गङ्गादि-सकलतीर्थेभ्यो नमः। ॐ हृदादिषडङ्गदेवताभ्यो नमः। ॐ साङ्ग-सायुधसवाहनसपरिवारायै स्वेष्टदेवतायै दुर्गायै नमः इति सम्पूज्य।

ॐ सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम्।
अष्टादशभुजं देवं पञ्चवक्त्रं त्रिलोचनम्।
अमृतार्णवमध्यस्थब्रह्मपद्मोपरि स्थितम्।
वृषारूढं नीलकण्ठं सर्वाभरणभूषितम्॥
कपालखट्वाङ्गधरं घण्टाडमरुवादिनम्॥
पाशांकुशधरं देवं गदामुशलधारिणम्॥
खड्गखेटकपट्टीशमुद्गरोच्छूलकुन्तिनम्॥
विचित्रखेटकं मुण्डं वरदाभयमालिनम्॥
लोहितं देवदेवेशं भावयेत् साधकोत्तमः॥
भावयेच्च सुधां देवीं चन्द्रकोट्ययुतप्रभाम्॥
हिमकुन्देन्दुधवलां पञ्चवक्त्रां त्रिलोचनाम्।
अष्टादशभुजैर्युक्तां सर्वानन्दकरोद्यताम्।
प्रहसन्तीं विशालाक्षीं देवदेवस्य सम्मुखीम्॥

इति ध्यात्वा सामान्यार्घ्योदकेन ॐ ग्रानन्दभैरवं तर्पयामि। ॐ ग्रानन्दभैरवीं तर्पयामि। ॐ स्वेष्टदेवतां तर्पयामि॥ इति सन्तर्प्य तज्जलेनात्मानं पूजोपकरणानि च, अभिषिच्य समर्थश्चेत् यथासाध्यं मातृकादिन्यासं कृत्वा पूजामारभेत्। इति विशेषार्घ्यस्थानम्॥

(अथ न्यासजालम्) तत्र (अथ वर्णमातृकान्यासः)

ॐ अस्य श्रीवर्णमातृकामन्त्रस्य ब्रह्म ऋषिः गायत्रीछन्दो मातृका-सरस्वती देवता हलो बीजानि स्वराः शक्तयो मातृकान्यासे विनियोगः । अथ ध्यानम् ।

मूलाधारध्वनिं श्रुत्वा प्रवुद्धा शक्तिकुण्डली ।
ज्वलत्पावकसंकाशा सूक्ष्मा तेजःस्वरूपिणी ॥
मूलाधाराच्छिरः पद्मं स्पृशन्ती विद्युदाकृतिः ।
तया स्पृष्टशिरःपद्मादमृतौघस्वरूपिणः ।
निर्गतान्मातृकावर्णान् सुषुम्नावर्त्मना तनुम् ॥
स्थापयित्वा स्थितानेतानेवं ध्यात्वा प्रविन्यसेत् ॥

ॐ ब्रह्मणे नमः । (इति शिरसि) ॐ गायत्रीच्छन्दसे नमः । (इति मुखे) ॐ मातृकासरस्वत्यै नमः । (इति हृदि) ॐ व्यञ्जनेभ्यो वीजेभ्यो नमः । (इति गुह्ये) ॐ स्वरेभ्यः शक्तिभ्यो नमः । (इति पादयोः) ॐ अँनमः । (इति शिरसि) ॐ आँनमः । (मुखे) ॐ इँ नमः (वामनेत्रे) ॐ ईं नमः । (दक्षिणनेत्रे) ॐ उँ नमः । (वामकर्णे) ॐ ऊँ नमः । (दक्षिणकर्णे) ॐ ऋँ नमः । (वामनासायाम्) ॐ ॠँ नमः । (दक्षिणनासायाम्) ॐ ऌँ नमः । (वाम-गण्डस्थले) ॐ ॡँ नमः । (दक्षिणगण्डस्थले) ॐ एँ नमः । (ओष्ठे) ऐं नमः (अधरे) ॐ ओं नमः । (ऊर्ध्वदन्ते) ॐ औं नमः । (अधो-दन्ते) ॐ अँ नमः । (जिह्वायाम्) ॐ अः नमः । (ब्रह्मरन्ध्रे) ॐ कँ नमः । (दक्षिणबाहुमूले) ॐ खँ नमः । (कूर्परे) ॐ गँ नमः । (मणिबन्धे) ॐ घँ नमः । (अंगुलिमूले) ॐ ङ नमः । (अंगुल्यग्रे) (एवं वामहस्तेऽपि) ॐ चँ नमः । (वाम-बाहुमूले) ॐ छँ नमः । (कूर्परे) ॐ जँ नमः । (मणिबन्धे)

---

(१) शंखं ज्ञानप्रदं मुक्ता शुक्तिर्विद्याप्रदायिनी । कपालालावुपात्राणि योगसिद्धिकराणि च । (इति ताराभक्तिसुधार्णवे)

* (वर्णमातृकान्यासस्य प्रयोजनम् यथा रामार्चनचन्द्रिकायाम्)
तस्माद्ब्रह्मात्मका या वै उत्पन्ना लिपिमातृका । स्वाभिन्नत्वात् स्वकार्यायास्तस्या न्यासः प्रकीर्तितः ॥ अकारादिक्षकारान्ता मातृका बीजरूपिणी । विसर्गश्चैव विन्दुश्च द्विसन्धिर्ब्रह्मविग्रहा ॥ वर्णात्तु जायते ब्रह्मा तथा विष्णुः प्रजापतिः । रुद्रश्च जायते देवो जगत्संहारकारकः । (इति कामधेनुतन्त्रे) ।

ॐ झँ नमः। (अंगुलिमूले) ॐ ञँ नमः। (अंगुल्यग्रे) ॐ टँ नमः। (दक्षिणपादमूले) ॐ ठँ नमः। (जानुनि) ॐ डँ नमः। (गुल्फे) ॐ ढँ नमः। (अंगुलिमूले) ॐ णँ नमः। (अंगुल्यग्रे) (एवं वामपादेऽपि) ॐ तँ नमः। (वामपादमूले) ॐ थँ नमः। (जानुनि) ॐ दँ नमः। (गुल्फे) ॐ धँ नमः। (अंगुलिमूले) ॐ नँ नमः। (अंगुल्यग्रे) ॐ पँ नमः। (दक्षिण-पार्श्वे) ॐ फँ नमः। (वामपार्श्वे) ॐ बँ नमः। (पृष्ठे) ॐ भँ नमः। (नाभौ) ॐ मँ नमः। (उदरे) ॐ यँ नमः। (हृदि) ॐ रँ नमः। (दक्षस्कन्धे) ॐ लँ नमः। (वामस्कन्धे) ॐ वँ नमः। (ककुदि) ॐ शँ नमः। (दक्षिणहस्ताग्राणाम्) ॐ षँ नमः। (वामहस्ताग्राणाम्) ॐ सँ नमः। (दक्षिणपादा-ग्राणाम्) ॐ हँ नमः। (वामपादाग्राणाम्) ॐ क्षँ नमः। (पादादिशिरःपर्यन्तम्) ॐ हृँ नमः (इति शिरस्तः पादपर्यन्तम्)

(अथ बाह्यमातृकान्यासः)

ॐ पञ्चाशद्वर्णभेदैर्विहितवदनदोः पादयुक्कुक्षिवक्षो-
देशां भास्वत्कपर्द्दाकलितशशिकलामिन्दुकुन्दावदाताम् ॥
अक्षस्रक्कुम्भचिन्तालिखितकरतलां त्रिक्षणां पद्मसंस्थाम्
अच्छाकल्पाभतुच्छस्तनजघनभरां भारतीं तां नमामि ॥

---

(२) मन्त्रामूकत्वमायान्ति विन्यासेन विना लिपेः। सर्वमन्त्रप्रसिध्यर्थं तस्मादादौ लिपिन्न्यसेत्। (इति फेत्कारिणीतन्त्रे)

(१) न्यासमूलमिदं सर्वं न्यासं पूर्वन्तु कारयेत्। न्यासेन रहितं कर्म अर्धं गृह्णन्ति राक्षसाः। आगमोक्तविधानेन नित्यं न्यासं करोति यः। देवता भाव-माप्नोति मन्त्रसिद्धिः प्रजायते। यो न्यासकवचच्छन्नो मन्त्रं जपति तं प्रिये। विघ्ना दृष्ट्वा पलायन्ते सिंहं दृष्ट्वा यथा गजाः। अकृत्वा न्यासजालं हि यो मूढाः प्रजपेन्मनुम्। सर्वविघ्नैः स वाध्यः स्यात् व्याघ्रैः मृगशिशुर्यथा ॥ (इति तन्त्रसारे)। प्रातःकालेऽथवा पूजासमये जापकर्मणि। होमकालेऽपि वा तेषां विनियोगः पृथक् पृथक् ॥ (इति योगिनीहृदये)। आधारे लिङ्ग-नाभौ हृदयसरसिजे तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के। नासान्ते वालमध्ये डफ कठ सहिते कंठदेशे स्वरांश्च कुक्षौ कोदण्डमध्ये न्यसतु विमलधीर्न्यासम्पत्तिसिध्यै। (इति महाकालसंहितायाम्)।

एवं ध्यात्वा । ॐ अँ कँ खँ गँ घँ ङँ आँ अंगुष्ठाभ्यान्नमः । ॐ इँ चँ छँ जँ झँ ञँ ईँ तर्जनीभ्यां स्वाहा । ॐ उँ टँ ठँ डँ ढँ णँ ऊँ मध्यमाभ्यां वषट् । ॐ एँ तँ थँ दँ धँ नँ ऐँ अनामिकाभ्यां हूँ ।। ॐ ओँ पँ फँ बँ भँ मँ औँ कनिष्ठिकाभ्यां वौषट् । ॐ अँ यँ रँ लँ वँ शँ षँ सँ हँ लँ क्षँ अः करतलकरपृष्ठाभ्यां अस्त्राय फट् ।। ॐ अँ कँ खँ गँ घँ ङँ आँ हृदयाय नमः। ॐ इँ चँ छँ जँ झँ ञँ ईँ शिरसे स्वाहा । ॐ उँ टँ ठँ डँ ढँ णँ ऊँ शिखायै वषट् । ॐ एँ तँ थँ दँ धँ नँ ञँ ऐँ कवचाय हूँ । ॐ ओं पँ फँ बँ भँ मँ औं नेत्रत्रयाय वौषट् । ॐ अँ यँ रँ लँ वँ शँ षँ सँ हँ लँ क्षँ अः करतलकरपृष्ठाभ्यां अस्त्राय फट् ।।

अथ अन्तर्मातृकान्यासः ।*

ॐ अक्षस्रजं हरिणपोतमुदग्रटङ्कम्
विद्यां करैरविरतं दधतीं त्रिनेत्राम् ।
अर्धेन्दुमौलिमरुणामरविन्दसंस्थाम्
वर्णेश्वरीं प्रणमत स्तनभारनम्राम् ।।

सिन्दूरकान्तिममिताभरणांत्रिनेत्राम्
विद्याक्षसूत्रमृगपोतवरान् दधानाम् ।
पार्श्वे स्थितां भगवतीमपि काञ्चनाभाम्
ध्यायेत्कराब्जधृतपुस्तकवर्णमालाम् ।।

आधारे ॐ वँ नमः ॐ शँ नमः ॐ षँ नमः । ॐ सँ नमः । (लिङ्गे) ॐ बँ नमः ॐ भँ नमः ॐ मँ नमः । (नाभौ) ॐ यँ नमः ॐ रँ नमः ॐ लँ नमः । (हृदये) ॐ डँ नमः ॐ ढँ नमः । ॐ णँ नमः । (तालुमूले) ॐ तँ नमः । ॐ थँ नमः । ॐ दँ नमः । ॐ धँ नमः । ॐ नँ नमः (ललाटे) ॐ पँ नमः ॐ फँ नमः । ॐ बँ नमः ॐ भँ नमः ॐ मँ नमः । (द्विदले) ॐ कँ नमः ॐ खँ नमः ॐ गँ नमः । ॐ घँ नमः ॐ ङँ नमः । (चतुर्दले) ॐ चँ नमः । ॐ छँ नमः । ॐ जँ नमः । ॐ झँ नमः । ॐ ञँ नमः । (षड्दले) ॐ टँ नमः । (दशदले) ॐ अँ नमः । ॐ आँ नमः । (द्वादशदले) ॐ इँ नमः । ॐ ईँ

---

* अथान्तर्मातृकान्यासं वक्ष्ये तं शुद्धिकारकम् ।
यं कृत्वा योगिनां चित्तं पातके न प्रवर्तते ।। (इति योगिनीतन्त्रे)

नमः । (षोडशदले) ॐ उँ नमः । ॐ ऊँ नमः । (कण्ठे) ॐ ऋँ नमः । ॐ ॠँ नमः । (नासान्ते) ॐ लृँ नमः ॐ लॄँ नमः । (दक्षकुक्षौ) ॐ एँ नमः । ॐ ऐँ नमः । (वामकुक्षौ) ॐ ओँ नमः । ॐ औँ नमः । (कोदण्डे) ॐ अँ नमः । ॐ अः नमः ।।

(अथ संहारमातृकान्यासः (१)

ॐ वालार्ककोटिरुचिरां स्फटिकाक्षमालाम्
कोदण्डमिक्षुजनितस्मरपञ्चवाणान् ।
विद्याञ्च हस्तकमलैर्दधतीं त्रिनेत्रां
ध्यायेत्समस्तजननीं नवचन्द्रचूड़ाम् ।।

एवं ध्यात्वा ॐ क्षँ नमः । (इति हृदयमारभ्य मुखपर्यन्तम्) ॐ लँ नमः । (इति हृदयमारभ्य उदरपर्यन्तम्) ॐ हँ नमः । (इति हृदयमारभ्य वामपादपर्यन्तम्) ॐ सँ नमः । (इति हृदयमारभ्य दक्षपादपर्यन्तम् । ॐ षँ नमः । (इति हृदयाद्वामहस्तम्) ॐ शँ नमः । (इति हृदयाद्दक्षहस्तम्) ॐ वँ नमः । (इति वामवाहुमूले) ॐ लँ नमः । (इति ककुदि) ॐ रँ नमः । (दक्षवाहुमूले) ॐ यँ नमः (इति हृदये) ॐ भँ नमः । (इति जठरे) ॐ मँ नमः । (इति नाभौ) ॐ बँ नमः (इति पृष्ठे) ॐ फँ नमः ।

---

(१) (न्यासे अङ्गुलिनियमो यथा गौतमीयतन्त्रे) मनसा विन्यसेन्न्यासान् पुष्पेणैवाथवा मुने । अङ्गुष्ठानामिकाभ्यां वा चान्यथा विफलं भवेत् ।।

अथ साधकः यथासाध्यं न्यासं कृत्वा यथायोग्यं प्राणायामञ्च कृत्वा पूजामारभेत् (यथोक्तम् शारदायाम्) प्राणायामं विना मन्त्रपूजने नहि योग्यता । यथा पर्वतधातूनां ध्मातानां दह्यते मलम् ।। तथेन्द्रियकृता दोषा दह्यन्ते प्राण निग्रहात् ।। प्रथमं साधनं कुर्यात् प्राणायामस्य योगवित् ।। प्राणापाननिरोधात्तु प्राणायाम उदाहृतः ।। प्राणाख्यमनिलं वश्यमभ्यासात्कुरुते तु यः ।। प्राणायामः स विज्ञेयः सवीजोऽवीज एवच । प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिस्त्रिभिः । अहोरात्रकृतात्पापान्मुच्यते नात्र संशयः । सर्वपापहरं प्रोक्तं प्राणायामं द्विजात्मनाम् ।। ततस्त्वभ्यधिकं नास्ति तपः परमसाधनम् ।। प्राणायामत्रयं कुर्यान्मूलेन प्रणवेन वा । अथवा मन्त्रबीजेन यथोक्तविधिना सुधीः ।।

(इति महाकालसंहितायाम्)

(इति वामपार्श्वे) ॐ यँ नमः । (इति दक्षपार्श्वे) ॐ नँ नमः । (इति वामपादमूले) ॐ थँ नमः । (इति सन्धिभागे) ॐ दँ नमः । (इति गुल्फे) ॐ धँ नमः (इति अङ्गुलिमूले) ॐ नँ नमः । (इति अङ्गुल्यग्रे) (एवम्) ॐ टँ नमः ॐ ठँ नमः । ॐ डँ नमः । ॐ ढँ नमः । ॐ णँ नमः (दक्षपादमूलसन्ध्यग्रेषु न्यसेत्) ।।

(अथ कलामातृकान्यासः)

ॐ अस्य श्रीकलामातृकान्यासस्य प्रजापतिऋषिर्गायत्री छन्दः सरस्वतीमातृकादेवताऽभीष्टसिद्ध्यर्थं कलामातृकान्यासे विनियोगः ।।

ॐ हस्तैः पद्मं रथाङ्गं गुणमथ हरिणं पुस्तकं वर्णमालां
टङ्कं शुभ्रं करालं दलममृतलसद्धेमकुम्भं वहन्तीम् ।
मुक्ताविद्युत्पयोदस्फटिकमणिजपावन्धुरैः पञ्चवक्त्रैः
त्र्यक्षैर्वक्षोजनम्रां सकलशशिनिभां शारदां तां नमामि ।।

एवं ध्यात्वा (शिरसि) ॐ अँ निवृत्यै नमः (मुखे) ॐ आँ प्रतिष्ठायै नमः । (वामनेत्रे) ॐ इँ विद्यायै नमः । (दक्षनेत्रे) ॐ ईँ शान्त्यै नमः । (वामकर्णे) ॐ उँ इन्धिकायै नमः । (दक्षकर्णे) ॐ ऊँ दीपितायै नमः । (वामनासायाम्) ॐ ऋँ रेचिकायै नमः । (दक्षनासायाम्) ॐ ॠँ मोचिकायै नमः । (वामगण्डस्थले) ॐ लृँ सूक्ष्मायै नमः । (दक्षगण्ड-स्थले) ॐ ॡँ सूक्ष्मामृतायै नमः । (ओष्ठे) ॐ एं ज्ञानामृतायै नमः (अधरे) ॐ ऐँ आप्यायिन्यै नमः । (ऊर्ध्वदन्ते) ॐ ओँ व्यापिन्यै नमः । (अधोदन्ते) ॐ औँ व्योमरूपायै नमः । (जिह्वा-याम्) ॐ अँ अनन्तायै नमः (ब्रह्मरन्ध्रे) ॐ अः सृष्ट्यै नमः । (दक्षिणबाहुमूले) ॐ कँ समृद्धिकायै नमः । (कूर्परे) ॐ खँ स्मृत्यै नमः । (मणिबन्धे) ॐ गँ मेधायै नमः । (अंगुलिमूले) ॐ घँ कान्त्यै नमः । (अङ्गुल्यग्रे) ॐ ङँ लक्ष्म्यै नमः । (एवं वामबाहु-मूलेऽपि) ॐ चँ द्युत्यै नमः । ॐ छँ स्थिरायै नमः । ॐ जँ स्थित्यै नमः । ॐ झँ सिद्ध्यै नमः । ॐ ञँ जरायै नमः । (दक्षिणपादमूले) ॐ टँ पालिन्यै नमः । (जानुनि) ॐ ठँ शान्त्यै नमः । (गुल्फे) ॐ डँ ईश्वर्यै नमः । (अङ्गुलिमूले) ॐ ढँ रत्यै नमः । (अङ्गुल्यग्रे)

ॐ णँ कामिकायै नमः । (एवं वामपादेऽपि) ॐ तँ वरदायै नमः : ॐ थँ ह्लादिन्यै नमः । ॐ दँ प्रीतिसंयुतायै नमः । ॐ धँ दीर्घायै नमः । ॐ नँ तीक्ष्णायै नमः । (दक्षिणपार्श्वे) ॐ पँ रौद्र्यै नमः । (वामपार्श्वे) ॐ फँ भयायै नमः । (पृष्ठे) ॐ बँ निद्रायै नमः । (नाभौ) ॐ भँ तन्द्रायै नमः (उदरे) ॐ मँ क्षुधायै नमः । (हृदि) ॐ यँ क्रोधिन्यै नमः । (दक्षस्कन्धे) ॐ रँ पीतायै नमः । (वामस्कन्धे) ॐ लँ श्वेतायै नमः । (ककुदि) ॐ वँ अरुणायै नमः । (दक्षिणहस्ताग्राणाम्) ॐ शँ असितायै नमः । (वामहस्ताग्राणाम्) ॐ षँ अनन्तायै नमः । (दक्षिणपादाग्राणाम्) ॐ सँ उल्कायै नमः । (वामपादाग्राणाम्) ॐ हं सुधायै नमः । (पादादिशिरःपर्यन्तम्) ॐ क्षँ कलामातृकायै नमः ॥

(अथ श्रीकण्ठादिन्यासः)

ॐ अस्य श्रीश्रीकण्ठादिमातृकान्यासस्य दक्षिणामूर्तिऋषिर्गायत्री छन्दः अर्धाद्रिजो हरा देवः हलो बीजानि सर्वसिद्धये विनियोगः । अथ ध्यानम् ।

ॐ बन्धूककाञ्चननिभं रुचिराक्षमालम्
पाशाङ्कुशौ च वरदं निजबाहुदण्डैः ॥
बिभ्राणमिन्दुशकलाभरणं त्रिनेत्रम्
अर्धाम्बिकेशमनिशं वपुराश्रयामः ॥

ॐ ह्सौं अं श्रीकण्ठेशपूर्णोदरीभ्यान्नमः । [मस्तके] ॐ ह्सौं आँ अनन्तेशविरजाभ्यान्नमः । [मुखे] ॐ ह्सौं इँ सूक्ष्मेशशाल्मलीभ्यान्नमः । [दक्षिणनेत्रे] ॐ ह्सौं ईँ त्रिभुवनेशलोलाक्षीभ्यान्नमः । [वामनेत्रे] ॐ ह्सौं उँ अमरेशवर्तुलाक्षीभ्यान्नमः । [दक्षकर्णे] ॐ ह्सौं ऊँ अर्धीशदीर्घघोणाभ्यान्नमः । [वामनेत्रे] ॐ ह्सौं ऋँ भारभूतेशदीर्घमुखाभ्यान्नमः । [दक्षनासापुटे] ॐ ह्सौं ॠँ तिथीशगोमुखीभ्यान्नमः । [वामनासापुटे] ॐ ह्सौं लृँ स्थाण्वीशदीर्घजिह्वाभ्यानमः । [दक्षगण्डे] ॐ ह्सौं लॄँ हरेशकुण्डोदरीभ्यान्नमः । [वामगण्डे] ॐ ह्सौं एँ झिण्टीशोर्ध्वकेशीभ्यान्नमः । [ओष्ठे] ॐ ह्सौं ऐं भौतिकेशविकृतमुखीभ्यान्नमः । [अधरे]

ॐ ह्सौं ओं सद्योजातेशज्वालामुखीभ्यान्नमः। [ऊर्ध्वदन्ते] ॐ ह्सौ औं अनुग्रहेशोल्कामुखीभ्यान्नमः। [अधोदन्ते] ॐ ह्सौं अं अक्रूरेशश्रीमुखीभ्यान्नमः [शिरसि] ॐ ह्सौं अः महासेनेश-विद्यामुखीभ्यान्नमः [ब्रह्मरन्ध्रे] ॐ ह्सौं कँ क्रोधीशमहाकाली-भ्यान्नमः। [दक्षिणवाहुमूले] ॐ ह्सौं खँ चण्डेशमहासरस्वती-भ्यान्नमः। [कूर्परे] ॐ ह्सौं गँ पञ्चान्तकेशसर्वसिद्धिगौरी-भ्यान्नमः [मणिवन्धे] ॐ ह्सौं घँ शिवोत्तमेशत्रैलोक्यविद्याभ्यान्नमः [अङ्गुलिमूले] ॐ ह्सौं ङँ एकरुद्रेशमन्त्रशक्तिभ्यान्नमः। [अंगुल्यग्रे] ॐ ह्सौं चँ कूर्मेशात्मशक्तिभ्यान्नमः। [वामवाहुमूले] ॐ ह्सौं छँ एकनेत्रेशमूलमातृकाभ्यान्नमः। [कूर्परे] ॐ ह्सौं जँ चतुराननेशलम्बोदरीभ्यान्नमः। [मणिबन्धे] ॐ ह्सौं झँ अजेश-द्राविणीभ्यान्नमः। [अङ्गुलिमूले] ॐ ह्सौं ञँ सर्वेशनागरी-भ्यान्नमः। [अंगुल्यग्रे] ॐ टँ सोमेशखेचरीभ्यान्नमः। [दक्ष-पादमूले] ॐ ह्सौ ठँ लांगलीशमञ्जरीभ्यान्नमः। [जानुनि] ॐ ह्सौं डँ दारुकेशरूपिणीभ्यान्नमः। [गुल्फे] ॐ ह्सौं ढँ अर्धनारीशवीरिणीभ्यान्नमः। [अङ्गुलिमूले] ॐ ह्सौं णं उमा-कान्तेशकाकोदरीभ्यान्नमः। [अंगुल्यग्रे] ॐ ह्सौं तँ आषाढीश-पूतनाभ्यान्नमः। [वामपादमूले] ॐ ह्सौं थँ दण्डीशभद्रकाली-भ्यान्नमः [जानुनि] ॐ ह्सौं दं अत्रीशयोगिनीभ्यान्नमः। [गुल्फे] ॐ ह्सौं धं मीनेशशंखिनीभ्यान्ननः। [अंगुलिमूले] ॐ ह्सौ नँ मेषेशतर्जनीभ्यान्नमः [वामपादांगुल्यग्रे] ॐ ह्सौं पँ लोहितेश-कालरात्रिभ्यान्नमः [दक्षकुक्षौ] ॐ ह्सौ फँ शिखीशकुब्जीभ्यान्नमः। [वामकुक्षौ] ॐ ह्सौं बँ छगगण्डेशकपर्दिनीभ्यान्नमः [पृष्ठे] ॐ ह्सौं भँ द्विरण्डेशवज्राभ्यान्नमः [नाभौ] ॐ मँ महाकालेश-जयाभ्यान्नमः (उदरे) ॐ ह्सौं यँ वालीशेशसुमुखीभ्यान्नमः (हृदये) ॐ ह्सौ रँ भुजंगेशरेवतीभ्यान्नमः (दक्षांशे) ॐ लँ पिनाकीश-माधवीभ्यान्नमः [ककुदि] ॐ ह्सौं वँ खड्गीशवारुणीभ्यान्नमः [हृदयादिदक्षकराग्रान्तम्] ॐ शँ वकेशवायवीभ्यान्नमः [हृदयादि-दक्षकराग्राणाम्] ॐ ह्सौं षँ श्वेतेशरक्षोवधारिणीभ्यान्नमः (हृदयादिवामकराग्रान्तम्) ॐ ह्सौं सँ भग्वीशसहजाभ्यान्नमः (हृदयादिवामपादान्तम्) ॐ ह्सौं हँ नकुलीशलक्ष्मीभ्यान्नमः

(हृदयादिदक्षपादान्तम्) ॐ ह्सौं क्षं शिवेशव्यापिनोभ्यान्नमः (हृदयादिपादान्तम्) ॐ ह्सौं हँ सः संवर्तकेशमायाभ्यान्नमः। (हृदयादिशिरोऽन्तम्) ।।

(अथ ऋष्यादिन्यासः)

(शिरसि) ॐ नारदऋषये नमः। (मुखे) ॐ गायत्रीछन्दसे नमः। (हृदि) ॐ दुर्गादेवतायै नमः। ह्रां ॐ ह्रीं दुँ दुर्गायै अंगुष्ठाभ्यान्नमः। ह्रीं ॐ ह्रीं दुँ दुर्गायै तर्जनीभ्यां स्वाहा। ह्रूं ॐ ह्रीं दुँ दुर्गायै मध्यमाभ्यां वषट्। ह्रैं ॐ ह्रीं दुँ दुर्गायै अनामिकाभ्यां हूँ।। ह्रौं ॐ ह्रीं दुँ दुर्गायै कनिष्ठिकाभ्यां वौषट्। ह्रः ॐ ह्रीं दुँ दुर्गायै करतलकरपृष्ठाभ्यां फट्।। (एवं हृदयादौ) ह्रां ॐ ह्रीं दुँ दुर्गायै हृदयाय नमः। ह्रीं ॐ ह्रीं ॐ दुर्गायै शिरसे स्वाहा। ह्रूं ॐ ह्रूं दुँ दुर्गायै शिखायै वषट्। ह्रैं ॐ ह्रीं दुँ दुर्गायै नेत्रत्राय वौषट्।। ह्रौं ॐ ह्रीं दुँ दुर्गायै कवचाय हूँ। ह्रः ॐ ह्रीं दुँ दुर्गायै अस्त्राय फट्।। ॐ दुर्गे अङ्गुष्ठाभ्यां नमः। ॐ दुर्गे तर्जनीभ्यां स्वाहा। ॐ दुर्गायै मध्यमाभ्यां वषट्। ॐ भूतरक्षिणि अनामिकाभ्यां हूँ। ॐ दुर्गे दुर्गे रक्षिणि कनिष्ठिकाभ्यां वौषट्। ॐ दुर्गे दुर्गे रक्षिणि करतलकरपृष्ठाभयां अस्त्राय फट्।। (एवं) ॐ दुर्गे हृदयाय नमः। ॐ दुर्गे शिरसे स्वाहा। ॐ दुर्गायै शिखायै वषट्। ॐ भूतरक्षिणि कवचाय हूँ। ॐ दुर्गे दुर्गे रक्षिणि नेत्रत्रयाय वौषट्। ॐ दुर्गे दुर्गे रक्षिणि करतलकरपृष्ठाभ्यां अस्त्राय फट्।।

(अथ बीजन्यासः)

अथ तत्तद्देवतायाः स्वबीजेन न्यासं कुर्य्यात् तद्यथा ॐ ऐं अंगुष्ठाभ्यान्नमः। ॐ ह्रीं तर्जनीभ्यां स्वाहा। ॐ क्लीं मध्यमाभयां वषट। ॐ चामुण्डायै तर्जनीभ्यां स्वाहा। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे कनिष्ठिकाभयां अस्त्राय फट्। एवम्। ॐ ऐं हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ क्लीं शिखायै वषट्। ॐ चामुण्डायै विच्चे कवचाय हूँ। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतल कर पृष्ठाभ्यां अस्त्राय फट्।।

(अथ जीवन्यासः)

ॐ सोहम् सोऽहम् इति पठित्वा हृदये हस्तं दत्वा ॐ ग्राँ ह्रीं क्रों यँ रँ लँ वँ शँ षँ सँ हों हँ सः मम प्राणा इह प्राणाः । ॐ ग्राँ ह्रीं क्रों यँ रँ लँ वँ शँ षँ सँ हों हँ सः मम जीव इह स्थितः । ॐ ग्रों ह्रीं क्रों यँ रँ लँ वँ शँ षँ सँ हों हँ सः मम सर्वेन्द्रियाणि । ॐ ग्राँ ह्रीं क्रों यँ रँ लँ वँ शँ षँ सँ हों हँ सः मम वाङ्मनःचक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।

(अथ तत्त्वन्यासः)

ॐ ग्रात्मतत्त्वाय स्वाहा । (इतिमूलाधारात् हृदयपर्य्यन्तम्) ॐ विद्यातत्त्वाय स्वाहा । (इति हृदयात् मुखपर्य्यन्तम्) ॐ शिव-तत्त्वाय स्वाहा । (इति मुखाद्ब्रह्मरन्ध्रपर्य्यन्तम्) ॐ सर्वतत्त्वाय स्वाहा । (इति सर्वाङ्गे) ।

(अथ व्यापकन्यासः)

ॐ ऐं ह्रीं क्लीँ चामुण्डायै विच्चे । ॐ दुर्गे दुर्गे रक्षिणि स्वाहा । इति नववारं शिरसः पादपर्य्यन्तम् । ॐ दक्षयज्ञविनाशिन्यै योगिनोकोटिपरिवृतायै दुर्गादेव्यै नमः । इति नववारं पादमारभ्य शिरः पर्य्यन्तं न्यसेत् ॥

(अथ पीठन्यासः)

(हृदये) ॐ ग्राधारशक्तये नमः । ॐ प्रकृत्यै नमः । ॐ कूर्माय नमः । ॐ ग्रनन्ताय नमः । ॐ पृथिव्यै नमः । ॐ क्षीर-समुद्राय नमः । ॐ रत्नद्वीपाय नमः । ॐ मणिमण्डपाय नमः । ॐ कल्पवृक्षाय नमः । ॐ रत्नवेदिकायै नमः । ॐ रत्नसिंहासनाय नमः । (ततो दक्षिणस्कन्धे) ॐ धर्माय नमः । (वामस्कन्धे) ॐ ज्ञानाय नमः । (दक्षिणोरुमूले) ॐ वैराग्याय नमः । (वामो-रुमूले) ॐ ऐश्वर्य्याय नमः । (मुखे) ॐ ग्रधर्माय नमः । (दक्षि पार्श्वे) ॐ ग्रज्ञानाय नमः । (वामपार्श्वे) ॐ ग्रवैराग्याय नमः । [नाभौ] ॐ ग्रनैश्वर्य्याय नमः । (पुनः हृदये) ॐ शेषाय नमः । ॐ पद्माय नमः । ॐ ग्रं ग्रर्कमण्डलाय द्वादशकलात्मने

नमः। ॐ ईं वह्निमंडलाय दशकलात्मने नमः। ॐ उँ सोममण्डलाय षोडशकलात्मने नमः। ॐ सँ सत्त्वाय नमः। ॐ रँ रजसे नमः। ॐ तँ तमसे नमः। ॐ आँ आत्मने नमः। ॐ पँ परमात्मने नमः। ॐ ह्रीं ज्ञानात्मने नमः॥

(अथ पीठशक्तिन्यासः)

हृदयकमलस्य केसरेषु मध्ये पूर्वादिक्रमेण। ॐ श्रां प्रभायै नमः। ॐ ईँ मायायै नमः। ॐ ऊँ जयायै नमः। ॐ एँ सूक्ष्मायै नमः। ॐ ऐँ विशुद्धायै नमः। ॐ ओं नन्दिन्यै नमः। ॐ औं सुप्रभायै नमः। ॐ अँ विजयायै नमः। ॐ अः सर्वसिसिद्धप्रदायिन्यै नमः। (मध्ये सर्वत्र) ॐ वज्रनखदंष्ट्रायुधाय महासिंहासनाय हूँ फट् पद्मशक्त्यै नमः।

(अथ योनिन्यासः)

ॐ योनिविद्यायै नमः। (इति शिरसि) ॐ योनिसाध्यायै नमः। (इति मुखे) ॐ योनिकल्यायै नमः। (इति कण्ठे) ॐ योनिमध्यायै नमः। (इति हृदये) ॐ योनिसिद्धायै नमः। (दक्षिणबाहुमूले) ॐ योनिहायै नमः। (वामबाहुमूले) ॐ योनिदायै नमः (इतिनाभौ) ॐ योनिज्ञानायै नमः। (दक्षिणजंघायाम्) ॐ योनिरूपायै नमः। (वामजंघायाम्) ॐ योनिपुण्यायै नमः। (इति सर्वाङ्गे)।

(अथ षोढा न्यासः)

१—षोढान्यासे प्रथमं गणेशन्यासः

ॐ शूलाङ्कुशवरोभीतिपाणिं रक्ताब्जहस्तया।
प्रियया लिङ्गितं रक्तं त्रिनेत्रं गणपं भजे॥

एवं ध्यात्वा ॐ अस्यश्रीगणेशषोढान्यासस्य बृहदारण्यक ऋषिः (गणकऋषिः) अनुष्टुप् छन्दः (गायत्रिकाछन्दः) गणेशशक्तिर्देवता सर्वविघ्ननिराशार्थं न्यासे विनियोगः। ॐ ऐँ ह्रीँ श्रीँ अँ विघ्नेशह्रीभ्यान्नमः (शिरसि) ॐ ऐँ ह्रीँ श्रीँ आँ विघ्नराजश्रीभ्यान्नमः (मुखे) ॐ ऐँ ह्रीँ श्रीँ इँ विनायक-

पुष्टिभ्यान्नमः (दक्षनेत्रे) ॐ ऐँ ह्रीँ श्रीँ ईँ शिवोत्तमशान्तिभ्यान्नमः (वामनेत्रे) ॐ ऐँ ह्रीँ श्रीँ उँ विघ्नकृत्स्वस्तिभ्यान्नमः (दक्षकर्णे) ॐ ऐँ ह्रीँ श्रीँ ऊँ विघ्नहर्त्रीसरस्वतीभ्यान्नमः (वामकर्णे) ॐ ऐँ ह्रीँ श्रीँ ऋँ गणस्वाहाभ्यान्नमः (दक्षिणनासायाम्) ॐ ऐँ ह्रीँ श्रीँ ॠँ एकदन्तमेधाभ्यान्नमः (वामनासायाम्) ॐ ऐँ ह्रीँ श्रीँ ऌँ द्विदन्तकान्तिभ्यान्नमः (दक्षगण्डे] ॐ ऐँ ह्रीँ श्रीँ ॡँ गजवक्त्रकामिनीभ्यान्नमः (वामगण्डे) ॐ ऐँ ह्रीँ श्रीँ एँ निरञ्जनमोहिनीभ्यान्नमः (ओष्ठे) ॐ ऐँ ह्रीँ श्रीँ ऐँ कपर्दीनदीभ्यान्नमः। (अधरे) ॐ ऐँ ह्रीँ श्रीँ ओँ दीर्घजिह्वपार्वतीभ्यान्नमः (ऊर्ध्वदन्ते) ॐ ऐँ ह्रीँ श्रीँ औँ शंकुकर्णज्वालिनीभ्यान्नमः। (अधोदन्ते) ॐ ऐँ ह्रीँ श्रीँ अँ वृषध्वजनन्दाभ्यान्नमः। (ब्रह्मरन्ध्रे) ॐ ऐँ ह्रीँ श्रीँ अः गणनायकसुयशाभ्यान्नमः। (जिह्वायाम्) ॐ ऐँ ह्रीँ श्रीँ कँ गजेन्द्रकामरूपिणीभ्यान्नमः। (दक्षबाहुमूले) ॐ ॐ ऐँ ह्रीँ श्रीँ खँ शूर्पकर्णउमाभ्यान्नमः। (दक्षकूर्परे) ॐ ऐँ ह्रीँ श्रीँ गँ त्रिलोचनतेजोवतीभ्यान्नमः (मणिबन्धे) ॐ ऐँ ह्रीँ श्रीँ घँ लम्बोदरसत्याभ्यान्नमः (अङ्गुलिमूले) ॐ ऐँ ह्रीँ श्रीँ ङँ महानन्दविघ्नेशाभ्यान्नमः। (अङ्गुल्यग्रे) ॐ ऐँ ह्रीँ श्रीँ चँ चतुर्मूर्तिसुरूपाभ्यान्नमः (वामबाहुमूले) ॐ ऐँ ह्रीँ श्रीँ छँ सदाशिवकामदाभ्यान्नमः (कूर्परे) ॐ ऐँ ह्रीँ श्रीँ जँ आमोदमदजिह्वाभ्यान्नमः (मणिबन्धे) ॐ ऐँ ह्रीँ श्रीँ झँ दुर्मुखभूतिभ्यान्नमः (अंगुलिमूले) ॐ ऐँ ह्रीँ श्रीँ ञँ सुमुखभौतिकाभ्यान्नमः (अङ्गुल्यग्रे) ॐ ऐँ ह्रीँ श्रीँ टँ प्रमोदसिताभ्यान्नमः (दक्षकट्याम्) ॐ ऐँ ह्रीँ श्रीँ ठँ एकपादरमाभ्यान्नमः (दक्षजानुनि) ॐ ऐँ ह्रीँ श्रीँ डँ द्विजिह्वमहिषीभ्यान्नमः (गुल्फे) ॐ ऐँ ह्रीँ श्रीँ ढँ शूरभुजगिनीभ्यान्नमः (अंगुल्याम्) ॐ ऐँ ह्रीँ श्रीँ णँ वीरकर्णाभ्यान्नमः (अङ्गुल्यग्रे) ॐ ऐँ ह्रीँ श्रीँ तँ षण्मुखभृकुटीभ्यान्नमः (वामकट्याम्) ॐ ऐँ ह्रीँ श्रीँ थँ वरदलज्जाभ्यान्नमः। (वामजानुनि) ॐ ऐँ ह्रीँ श्रीँ दँ वामदेवदीर्घघोणाभ्यान्नमः (गुल्फे) ॐ ऐँ ह्रीँ श्रीँ धँ धनुर्धरयामिनीभ्यान्नमः (अङ्गुलिमूले) ॐ ऐँ ह्रीँ श्रीँ नँ वक्रतुण्डयामिनीभ्यान्नमः। (अङ्गुल्यग्रे) ॐ ऐँ ह्रीँ श्रीँ पँ द्विरण्डयामिनीभ्यान्नमः (दक्षपार्श्वे) ॐ ऐँ ह्रीँ श्रीँ फँ सेनानी-

रात्रिभ्यान्नमः (वामपार्श्वे) ॐ एँ ह्रीँ श्रीँ वँ कामान्ग्रामणी-भ्यान्नमः (पृष्ठे) ॐ एँ ह्रीँ श्री भँ मत्तशशिप्रभाभ्यान्नमः (नाभौ) ॐ एँ ह्रीँ श्रीँ मँ विमललोललोचनाभ्यान्नमः। (उदरे) ॐ ऐँ ह्रीँ श्रीँ यँ मत्तवाहनचांचलीभ्यान्नमः। (हृदि) ॐ एँ ह्रीँ श्रीँ रँ जटीदोप्तिभ्यान्नमः (दक्षिणस्कन्धे) ॐ एँ ह्रीँ श्री लँ मुण्डी-सुभगाभ्यान्नमः (ककुदि) ॐ एँ ह्रीँ श्रीँ वँ खड्गोदुर्भगाभ्यान्नमः (वामस्कन्धे) ॐ एँ ह्रीँ श्रीँ शँ वरेण्यशिवाभ्यान्नमः। (हृदादि-दक्षहस्ते) ॐ एँ ह्रीँ श्रीँ षँ वृषकेतनभगोभ्यान्नमः (हृदादिवाम-हस्ते) ॐ एँ ह्रीँ श्रीँ सँ भक्तिप्रियभगिनीभ्यान्नमः (हृदादिदक्ष-पादे) ॐ एँ ह्रीँ श्रीँ हँ गणेशभोगिनीभ्यान्नमः (हृदादिवामपादे) ॐ एँ ह्रीँ श्रीँ क्षँ मेघनादसुभगाभ्यान्नमः। (हृदादि उदरे) ॐ एँ ह्रीँ क्षँ व्यापिकालरात्रिभ्यान्नमः। (हृदादिमुखे) ॐ एँ ह्रीँ श्रीँ सर्वस्वराः गणेश्वर कालिकाभ्यानमः (दक्षिण सर्वाङ्गे) ॐ एँ ह्रीँ श्रीँ सर्वव्यञ्जलवर्णाः विघ्नेशमातृकाभ्यान्नमः [वामभाग सर्वाङ्गे]।

[अथ ग्रहन्यासः)

ॐ एँ ह्रीं श्रीं अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ ॡँ एँ ऐं ओं औं अँ अः आँ आदित्यरुचिराभ्यान्नमः [शिरसि] ॐ एँ ह्रीं श्रीं यँ रँ लँ

(१)—केवलां मातृकां कृत्वा मातृकां तारसंपुटाम्। मातृकापुटितं न्यस्य न्यसेत्साधकसत्तमः। श्री बीजपुटितां तान्तु मातृकापुटितं तु तत्॥ कामेन पुटितां देवीं तत्पुटं काममेव च। शक्त्या च पुटितां देवीं शक्तिञ्च तत्पुटांन्यसेत्। क्रीं द्वन्द्वञ्च पुनर्नत्वा (पूर्ववत्) मूलेन पुटितां देवीं तत्पुटं मन्त्रमेव च। अनुलोमविलोमेन न्यस्य मन्त्रं यथाविधि। मूलेनाष्टशतं कुर्य्यात् व्यापकं तद-नन्तरम्॥ (मेरुतन्त्रे) गणैशैः प्रथमो न्यासो द्वितीयश्च ग्रहै र्मतः॥ नक्ष-त्रैस्तु तृतीयः स्यात् योगिनीभिश्चतुर्थकः। राशिभिः पञ्चमो न्यासः षष्ठः पीठैर्निगद्यते॥ षोढान्यासस्त्वयं प्रोक्तः सर्वत्रैवापराजितः। योगिन्य-स्तस्य गात्रस्थाः स पूज्यः सर्वयोगिभिः। नास्त्यस्य पूज्यो लोकेषु पितृमातृ-मुखोज्वलः। स एव पूज्यः सर्वत्र स स्वयं परमेश्वरः। यं नमन्ति महादेवि षोढान्यस्तकलेवराः। अल्पायुः स भवेत् सद्यो देवता कम्पते भयात्॥ (इति तारापारिजाते)।

वँ सों सोमवराभ्यान्नमः (भ्रूमध्ये) ॐ ऐं ह्रीं श्रीं कँ खँ गँ घँ ङँ मँ मङ्गलरक्ताभ्यान्नमः (इति नेत्रयोः) ॐ ऐं ह्रीं श्रीं चँ छँ जँ झँ ञँ बुँ बुधज्ञानरूपाभ्यान्नमः (मुखे) ॐ टँ ठँ डँ ढँ णँ वृँ वृहस्पतियशस्विनी-भ्यान्नमः (कण्ठे) ॐ ऐं ह्रीं श्रीं तँ थँ दँ धँ नँ शुँ शुक्रह्लादिनीभ्यान्नमः (गले) ॐ ऐँ ह्रीं श्रीं पँ फँ बँ भँ मँ शँ शनैश्चरशक्तिभ्यान्नमः (हृदये) ॐ ऐँ ह्रीँ श्रीँ शँ षँ सँ हँ राँ राहुकृष्णाभ्यान्नमः (नाभौ) ॐ ऐँ ह्रीँ श्रीँ ह्रीँ लँ क्षँ केँ केतुवायवीभ्यान्नमः (गुह्ये) ।

[अथ नक्षत्रन्यासः]

ॐ ऐँ ह्रीँ श्रीँ अँ आँ अश्विन्यै नमः (ललाटे) ॐ ऐँ ह्रीँ श्रीँ इँ ईँ भरिण्यै नमः (दक्षनेत्रे) ॐ ऐँ ह्रीँ श्रीँ उँ ऊँ कृत्तिकायै नमः (वामनेत्रे)ॐ ऐँ ह्रीँ श्रीँ ऋँ ॠँ रोहिण्यै नमः (दक्षकर्णे) ॐ ऐँ ह्रीँ श्रीँ लृँ लॄँ मृगशिरायै नमः (वामकर्णे) ॐ ऐँ ह्रीँ श्रीँ आर्द्रायै नमः (दक्षनासायाम्) ॐ ऐँ ह्रीँ श्रीँ ओँ औँ पुनर्वसवे नमः (वामनासायाम्) ॐ ऐँ ह्रीँ श्रीँ कँ पुष्यायै नमः (कण्ठे) ॐ ऐँ ह्रीँ श्रीँ खँ गँ अश्लेषायै नमः (दक्षबाहुमूले) ॐ ऐं ह्रीं श्रीं घं ङँ मघायै नमः (वामबाहुमूले) ॐ ऐं ह्रीं श्रीं चँ पूर्व-फाल्गुन्यै नमः (दक्षभुजमध्ये) ॐ ऐं ह्रीं श्रीं छं जं उत्तर-फाल्गुन्यै नमः (वामभुजमध्ये) ॐ ऐं ह्रीं श्रीं झं ञँ हस्तायै नमः (दक्षमणिवन्धे) ॐ ऐं ह्रीं श्रीं टँ ठँ चित्रायै नमः (वाममणिवन्धे) ॐ ऐं ह्रीं श्रीं डं स्वात्यै नमः (दक्षहस्ततले) ॐ ऐं ह्रीं श्रीं ढं णं विशाखायै नमः (वामहस्ततले) ॐ ऐं ह्रीं श्रीं तँ थँ दँ अनु-राधायै नमः (नाभौ) ॐ ऐं ह्रीं श्रीं धँ ज्येष्ठायै नमः (दक्षकटि-देशे) ॐ ऐं ह्रीं श्रीं नँ पँ फं मूलायै नमः (वामकटिदेशे) ॐ ऐं ह्रीं श्रीं बं पूर्वाषाढ़ायै नमः (दक्षऊरौ) ॐ ऐं ह्रीं श्रीं भँ उत्तरा-षाढायै नमः (वामोरौ) ॐ ऐं ह्रीं श्रीं मं श्रवणायै नमः (दक्ष-जानुनि) ॐ ऐं ह्रीं श्रीं यं रं धनिष्ठायै नमः (वामजानुनि) ॐ ऐं ह्रीं श्रीं लँ शतभिषायै नमः (दक्षजंघायाम्) ॐ ऐं ह्रीँ श्रीं वँ शँ पूर्व-भाद्रपदायै नमः (वामजंघायाम्) ॐ ऐं ह्रीं श्रीं षं सं उत्तरभाद्र-पदायै नमः [दक्षपादे] ॐ ऐं ह्रीं श्रीं हं क्षं अं अः रेवत्यै नमः [वामपादे] ।

[अथ योगिनीन्यासः]

(शिरसि) ॐ ऐँ ह्रीँ श्रीँ अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ लृँ लॄँ एँ ऐँ ओँ औँ डाँ डीँ डूँ डमलवरयूँ डाकिन्यै माँ रक्ष रक्ष त्वगात्मने नमः। (कण्ठे) ॐ ऐँ ह्रीँ श्रीँ कँ खँ गँ घँ ङँ चँ छँ जँ झँ ञँ टँ ठँ राँ रीँ रूँ रमलवरयूँ राकिन्यै मां रक्ष २ असृगात्मने नमः (हृदये) ॐ ऐँ ह्रीँ श्रीँ डँ ढँ णँ तँ थँ दँ धँ नँ पँ फँ नाँ नीँ नूँ नमलवरयूँ लाकिन्यै माँ रक्ष २ मांसात्मने नमः (नाभौ) ॐ ऐँ ह्रीँ श्रीँ वँ भँ मँ वं रँ लँ काँ कीँ कूँ कमलवरयूँ काकिन्यै माँ रक्ष २ मेदात्मने नमः। (स्वाधिष्ठाने) ॐ ऐँ ह्रीं वँ शँ षँ सँ साँ सीँ सूँ समलवरयूँ शाकिन्यै मां रक्ष रक्ष अस्थ्यात्मने नमः (इति मूलाधारे) ॐ ऐँ ह्रीँ श्रीँ हँ लँ क्षँ हाँ हीँ हूँ हमलवरयूँ हाकिन्यै माँ रक्ष रक्ष मज्जात्मने नमः (भ्रूमध्ये)।

(अथ राशिन्यासः)

ॐ ऐँ ह्रीँ श्रीँ अँ आँ इँ ईँ मेषराशये नमः। (द गुल्फे) ॐ ऐँ ह्रीँ श्रीँ उँ ऊँ ऋँ वृषराशये नमः (दक्षजानुनि) ॐ ऐँ ह्रीँ श्रीँ ॠँ लृँ लॄँ मिथुनराशये नमः। (दक्षवृषणे) ॐ ऐँ ह्रीँ श्रीँ एँ ऐँ कर्कराशये नमः (दक्षकुक्षौ) ॐ ऐँ ह्रीँ श्रीँ ओँ औँ सिंह-राशये नमः (दक्षस्कन्धे) ॐ ऐँ ह्रीँ श्रीँ अँ अः शँ षँ सँ हँ लँ क्षँ कन्याराशये नमः (दक्षमस्तके) ॐ ऐँ ह्रीँ श्रीँ कँ खँ गँ घँ ङँ तुलाराशये नमः (वाममस्तके) ॐ ऐँ ह्रीँ श्रीँ चँ छँ जँ झँ ञँ वृश्चिकराशये नमः (वामबाहुमूले) ॐ ऐँ ह्रीँ श्रीँ टँ ठँ डँ ढँ णँ धनुराशये नमः (वामकुक्षौ) ॐ ऐँ ह्रीँ श्रीँ तँ थँ दँ धँ नँ मकर-राशये नमः (वामवृषणे) ॐ ऐँ ह्रीँ श्रीँ पँ फँ बँ भँ मँ कुम्भराशये नमः (वामजानुनि) ॐ ऐँ ह्रीँ श्रीँ यँ रँ लँ वँ मीनराशये नमः (वामगुल्फे)।

(अथ पीठस्थानन्यासः)

ॐ ऐँ ह्रीँ श्रीँ अँ कामरूपपीठाय नमः (शिरसि)। ॐ ऐँ ह्रीँ श्रीँ आँ वाराणसीपीठाय नमः (मुखे)। ॐ ऐँ ह्रीँ श्रीँ इँ नेपालपीठाय नमः (दक्षनेत्रे)। ॐ ऐँ ह्रीँ श्रीँ ईँ पौंड्रवर्गपीठाय

नगः (वामनेत्रे) । ॐ ऐँ ह्रीँ श्रीँ उं काश्मीरपीठाय नमः (दक्ष-कर्णे) । ॐ ऐँ ह्रीँ श्रीँ ऊँ कान्यकुब्जपीठाय नमः (वामकर्णे) । ॐ ऐँ ह्रीँ श्रीँ ऋँ पुरस्थितपीठाय नमः (दक्षनासायाम्) । ॐ ऐँ ह्रीँ श्रीँ ॠँ चरस्थितपीठाय नमः (वामनासायाम्) । ॐ ऐँ ह्रीँ श्रीँ लृँ पूर्णशैलपीठाय नमः (दक्षगंडे) । ॐ ऐँ ह्रीँ श्रीँ लॄँ अर्बुदशैलपीठाय नमः (वामगंडे) । ॐ ऐँ ह्रीँ श्रीँ एँ शैलपीठाय नमः (दक्षिणांसे) । ॐ ऐँ ह्रीँ श्रीँ लँ मेरुपीठाय नमः (ककुदि) । ॐ ऐँ ह्रीँ श्रीँ वँ गिरिपीठाय नमः (वामांसे) । ॐ ऐँ ह्रीँ श्रीँ शँ माहेन्द्रपीठाय नमः (हृदादिदक्षिणांसे) । ॐ ऐँ ह्रीँ श्रीँ षँ वामनपीठाय नमः (हृदादिवामपदे) । ॐ ऐँ ह्रीँ श्रीँ लँ उड्डीयानपीठाय नमः । (हृदादिउदरे) ॐ ऐँ ह्रीँ श्रीँ क्षँ छत्रपुरपीठाय नमः (हृदादिमुखे) (इति षोढान्यासः) । ॐ ऐँ ह्रीँ श्रीँ आम्र-तरुकेश्वरपीठाय नमः । (ओष्ठे) । ॐ ऐँ ह्रीँ श्रीँ ऐँ एकाम्र-पीठाय नमः । (अधरे) ॐ ऐँ ह्रीँ श्रीँ ओँ त्रिस्रोतःपीठाय नमः । (ऊर्ध्वदन्ते) । ॐ ऐँ ह्रीँ श्रीँ औँ कामकोटिपीठाय ननः । (अधो-दन्ते) ॐ ऐँ ह्रीँ श्रीँ औँ अँ कैलासपीठाय नमः (मुखे) ॐ ऐँ ह्रीँ श्रीँ अः भृगुनगरपीठाय नमः (ब्रह्मरन्ध्रे) ॐ ऐँ ह्रीँ श्रीँ कँ चन्द्रपुरपीठाय नमः (दक्षांसे) ॐ ऐँ ह्रीँ श्रीँ खँ केदारपीठाय नमः (कूर्परे) ॐ ऐँ ह्रीँ श्रीँ गँ श्रीपीठाय नमः (मणिबन्धे) ॐ ऐँ ह्रीँ श्रीँ घँ ओंकारपीठाय नमः (अङ्गुलिमूले) ॐ ऐँ ह्रीँ श्रीँ ङँ जालन्धरपीठाय नमः (अंगुल्यग्रे) ॐ ऐँ ह्रीँ श्रीँ चं मानवपीठाय नमः । (वामांसे) ॐ ऐं ह्रीं श्रीं छं भद्रपीठाय नमः (वामकूर्परे) ॐ ऐं ह्रीं श्रीं जं देवीकोट्टपीठाय नमः (मणिबन्धे) ॐ ऐं ह्रीं श्रीं झं गोकर्णपीठाय नमः (अङ्गुलिमूले) ॐ ऐं ह्रीं श्रीं ञं भारतेश्वर-पीठाय नमः (अङ्गुल्यग्रे) ॐ ऐं ह्रीं श्रीं टं अट्टहासपीठाय नमः । (दक्षकटयधः) ॐ ऐं ह्रीं श्रीं ठं विजयपीठाय नमः (जानुनि) ॐ ऐं ह्रीं श्रीं डं राजगृहपीठाय नमः (दक्षगुल्फे) ॐ ऐं ह्रीं श्रीं ढं कोलगिरिपीठाय नमः (दक्षपादांगुलिमूले) ॐ ऐं ह्रीं श्रीं णं एलापुरपीठाय नमः (दक्षपादाङ्गुल्यग्रे) ॐ ऐं ह्रीं श्रीं तं कामेश्वर-पीठाय नमः (वामकटयधः) ॐ ऐं ह्रीं श्रीं थं जयन्तीपीठाय नमः (जानुनि) ॐ ऐं ह्रीं श्रीं दं उज्जयिनीपीठाय नमः (वामगुल्फे)

ॐ ऐं ह्रीं श्रीं धं क्षीरिकापीठाय नमः (वामपादांगुलिमूले) ॐ ऐं ह्रीं श्रीं नं हस्तिनापुरपीठाय नमः (अङ्गुल्यग्रे) ॐ ऐं ह्रीं श्रीं पं उड्डीशपीठाय नमः (दक्षपार्श्वे) ॐ ऐं ह्रीं श्रीं फं प्रयागपीठाय नमः (वामपार्श्वे) ॐ ऐं ह्रीं श्रीं बं विन्ध्यपीठाय नमः (पृष्ठे) ॐ ऐं ह्रीं श्रीं भं मायापुरपीठाय नमः (नाभौ) ॐ ऐं ह्रीं श्रीं मं जलेश्वरपीठाय नमः (उदरे) ॐ ऐं ह्रीं श्रीं यं मालवपीठाय नमः (हृदये) ।

(अथ मानसपूजा[1])

अथ साधकः हृदयकमलमध्ये स्वेष्टदेवतां विचिन्त्य ध्यानं कृत्वा पञ्चविंशतितत्त्वरूपपूजोपचारैर्मानसैः पूजयेत् । तत्र प्रथमं मानसपूजायां मानसस्नानं कुर्य्यात् । तद्यथा । स्वशिरोऽवस्थितं स्वेष्टदेवं विचिन्त्य तच्चरणारविन्दयुगलेन निक्षारिताशेषतीर्थोद्भवसुधाधारावर्षणेन ब्रह्मरन्ध्रेण अन्तःकरणं सर्वाङ्गं च धौतं विभाव्य पूजयेत् । तत्र दुर्गापूजायां दुर्गाध्यानं कुर्य्यात् ।।

अतसीपुष्पवर्णाभां ज्वलत्काञ्चनकुण्डलाम् ।
जटाजूटमखण्डेन्दुमुकुटत्रयभूषिताम् ।।
नागहारेण सहितां स्वर्णहारविभूषिताम् ।
शूलं खड्गञ्च शंखं च चक्रं वाणं तथैव च ।।

---

(१) अकृत्वा मानसं यागं न कुर्य्याद् बहिरर्चनम् । हृत्पद्मकर्णिकामध्ये योगपीठोपरिस्थिताम् । ध्यात्वा तां गन्धपुष्पाद्यैर्मानसैरुपचारकैः । संपूज्य विधिवत् पश्चात् मानसं होममाचरेत् ।। मिथुनं चिन्तयित्वा तु मानसैरुपचारकैः ।। भौतिकैः पूजयेद्विद्वान् मुद्रा मन्त्र समन्वितैः । भूम्याकाशमरुद्वह्निवारिमन्त्रैः सविन्दुकैः । कनिष्ठांगुलितर्जन्यौ मध्यमानामिके तथा । अंगुष्ठेन समायोगात् पञ्च मुद्राः प्रकीर्तिताः ।। पृथिव्यात्मकगंधं स्यात् आकाशात्मकपुष्पकम् ।। धूपो वाय्वात्मकः प्रोक्तो दीपो वह्न्यात्मकः परः । रसात्मकं च नैवेद्यं पूजा पञ्चोपचारिका ।। अभयामनहंकारमरागममदं तथा । अमोहदमदंभं च अद्वेषाक्षभकौ तथा । अमात्सर्यमलोभं च दशपुष्पं विदुर्बुधाः । अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहम् । दयापुष्पं धर्मपुष्पं ज्ञानपुष्पं च पञ्चमम् । इत्युक्तैरुत्तमैः पुष्पैः पूजयेत् परदेवताम् ।। (इति शारदातिलके)

शक्ति वज्रं च दण्डं च नित्यं दक्षिणबाहुभिः ।
विभ्रतीं सततं देवीं विकाशिनयनोज्ज्वलाम् ।।
खेटकं चर्म चापञ्च पाशं चांकुशमेव च ।
घंटां परशुं मुशलं बिभ्रतीं वामपाणिभिः ।।
सिंहस्थां नयनै रक्तवर्णैस्त्रिभिरभिज्वलाम् ।
शूलेन महिषं भित्वा तिष्ठन्तीं परमेश्वरीम् ।।
वामपादेन चाक्रम्य तत्र देवीं जगन्मयीम् ।

एवं ध्यात्वा कुण्डलीपात्रसंस्थेन सहस्रारपरमामृतेनेदं पाद्यं श्री अमुकदेव (दुर्गा) पादुकां समर्पयामि। सहस्रदलपद्मभृङ्गा-रावलितसुधाधारासारजलेनेदमाचमनीयं दद्यात् (कनिष्ठाभ्यां) मनोरूपं अर्घ्यम् । (अनामिकाभ्यां) लँ पृथिव्यात्मकं गन्धम्। (मध्य-माभ्यां) हं आकाशात्मकं पुष्पम् । (तर्जनीभ्यां) यं वाय्वात्मकं धूपम् । (अंगुष्ठाभ्यां) रं वह्न्यात्मकं तेजोरूपं दीपम् । वं अमृतात्मकं नैवेद्यम् गगनरूपं चामरम्। सूर्य्यरूपं दर्पणम्। चन्द्ररूपं छत्रम् । अनाहतध्वनिरूपां घण्टाम् । १-अहिंसा, २-विज्ञान, ३-क्षमा, ४-दया, ५-शौच, ६-आर्जव, ७-अलोभ, ८-अक्षोभ, ९-अमोह, १०-अमात्सर्य्य, ११-अभय, १२-अनहंकार, १३-अराग, १४-अद्वेष, १५-धर्मरूप, पञ्चदशपुष्पाञ्जलि दद्यात् ।। अनन्तरं मानसैर्नानोपचारैः जल, पुष्प, चन्दन, धूप, दीप, नैवेद्य, वस्त्रालङ्करण-ताम्बूलादिभिः नर्तन, गान, ताल, वाद्यादिभिः शुद्धान्तःकरणे-नार्चयेत् । एवं मानसपूजां कृत्वा मानसहोमं कुर्य्यात् । अहंकार, असत्य, पैशुन्य, काम, क्रोधादि, रूपं हविः, मनोरूपं स्रुवम्, सुषुम्नारूपां स्रुचं परिकल्प्य मूलाधारे आत्मा, परमात्मा, अन्तरात्मा, ज्ञानात्मा, रूप, चतुष्कोणं अग्निकुण्डं विचिन्त्य तत्र कुण्डलिनीरूपं प्रज्वलितवह्निं ध्यात्वा मनसैव मूलमन्त्रमुच्चार्य्य तदन्ते श्लोकचतुष्टय-पठनरूपहोम कुर्य्यात् ।

ॐ नाभिचैतन्यरूपादौ हविषामनसास्रु च ।
ज्ञानप्रदीपिते नित्यमक्षवृत्तीर्जुहोम्यहम् ।।
ॐ धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसास्रु च ।
सुषुम्नावर्त्मना नित्यं अक्षवृत्तीर्जुहोम्यहम् ।।

ॐ प्रकाशामर्षहस्ताभ्यां अवलम्ब्योन्मनीस्रुवम् ।
धर्माधर्मकलस्तेऽहं पूर्णवह्नौ जुहोम्यहम् ॥

ॐ अन्तर्निरन्तरनिरिन्धनमेधमाने
मोहान्धकारपरिपन्थिनि संविदग्नौ ।
कस्मिंश्चिदद्भुतमरीचिविकाशभूमौ
विश्वं जुहोमि वसुधादिशिवावसानाम् ॥

इति ॐ पुण्यं जुहोमि स्वाहा । ॐ पापं जुहोमि स्वाहा । ॐ कृत्यं-अकृत्यं संकल्पं विकल्पं जुहोमि स्वाहा । अनन्तरं समस्तोपाधि-विनिर्मुक्तं सच्चिदानन्दात्मकमात्मानं स्मृत्वा मूलमन्त्रं यथाशक्ति प्रजप्य देवतायै समर्पयेत् । इति मानसपूजा ॥

(अथ भूतबलिः[1])

अथ स्ववामभागे ईशानकोणस्थितभूमौ गोमयेन त्रिकोणयन्त्रं मण्डलं वा विलिख्य ॐ ऐं आँ भूतादय इहागच्छत इह तिष्ठतेत्यावाह्य ॐ आँ भूतादिभ्यो नमः । इति पञ्चोपचारैः सम्पूज्य माषभक्तबलिं दद्यात् । तद्यथा तत्र प्रथमं ॐ माषभक्तबलये नमः । इति पञ्चोपचारैः माषभक्तबलिं सम्पूज्य बलिमुत्सृजेत्—

ॐ भूताः प्रेताः पिशाचाश्च ये वसन्त्यत्र भूतले ।
ते गृह्णन्तु मया दत्तो बलिरेष प्रसाधितः ॥
पूजिता गन्धपुष्पाद्यैर्बलिभिस्तर्पितास्तथा ।
देशादस्माद्विनिःसृत्य पूजां पश्यन्तु मत्कृताम् ।
ॐ रौद्राश्च रौद्रकर्माणः रौद्रस्थाननिवासिनः ।
मातरो रौद्ररूपाश्च गणानामधिपाश्च ये ।

---

१. (बलिद्रव्याणि) (दक्षिणाचारे) भावभक्तं, तथा लाजा, धानाः शक्तव एव च । पृथुकास्तण्डुला वापि खिन्ना व्रीहय एव वा । आमिक्षा वा यवागूर्वा कृशरं पायसं तथा । आज्याभिषिक्तं दधि वा एकान्नानि फलानि च ॥ (वामाचारे तु) दग्धमीनो भर्जितं वा तेमनीकृतमेववा । मदिरा वा प्रदातव्या बलित्वेन वरानने" (इति ज्ञानार्णवे) दक्षिणे वटुके दद्यात् उत्तरे योगिनीगणे । पूर्वे भूतबलिं दद्यात् क्षेत्रपालाय पश्चिमे ॥ (समयाचारे) अञ्जलीभिश्च सर्वाभिरुक्तो भूतबलिः प्रिये (इति महाकालसंहितायाम्) ।

विघ्नीभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः ।
ते सर्वे प्रीतमनसः प्रतिगृह्णन्त्विमं वलिम् ।।
ॐ वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः ।
अपसर्पन्तु ते सर्वे देव्याः शस्त्रेण ताडिताः ।
ॐ शिवाः कंकालवेतालाः पूतनाजृम्भकादयः ।
ते सर्वे तृप्तिमायान्तु बलिदानेन तोषिताः ।।
ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्यः सर्वतरेभ्यो रुद्ररूपेभ्यो नमः ।।
ॐ आद्याश्च कर्मजाश्चैव ये भूता दिवि संस्थिताः ।
भूमौ व्योम्नि स्थिता ये ते प्रतिगृह्णन्त्विमं वलिम् ।।

(पूर्वे) एष माषभक्तबलिः ॐ भूतादिभ्यो नमः । इति जलेनोत्सृज्य । ॐ गाँ गीँ गूँ गणपतये वरवरद सर्वजनं मे वशमानय वलिं गृह्ण गृह्ण स्वाहा । ॐ एष बलिः गणपतये नमः । (दक्षिणे) ॐ एह्येहि देवीपुत्र वटुकनाथ कपिलजटाभार भासुरत्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय नाशय सर्वोपचारसहितं बलिं गृह्ण गृह्ण स्वाहा । एष बलिः ॐ वटुकेभ्यो नमः । (पश्चिमे) ॐ क्षाँ क्षीँ क्षूँ क्षैँ क्षौँ क्षः क्षेत्रपालेभ्यो धूपदीपादिसहितं बलिं गृह्ण गृह्ण स्वाहा । एष बलिः ॐ क्षेत्रपालेभ्यो नमः ।। (उत्तरे) ॐ याँ योगिनीभ्यो नमः ।।

ॐ भूतानि सर्वाणि तथान्नमेतदहञ्च विष्णुर्नमत्तोन्यदस्ति ।
तस्मादहं भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषाम् ।।
ॐ चतुर्दशो भूतगणो य एष तत्रस्थिता येऽखिलभूतसंघाः ।
तृप्त्यर्थमन्नं हि मया विसृष्टं तेषामिदं ते सुखिनो भवन्तु ।

इति सर्वभूतबलिं दत्वा । अञ्ज्वलिम्बध्वा पठेत्—

ॐ अपसर्न्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन पूजाकर्म करोम्यहम् ।।

पुष्पाञ्जलिं समादाय भूतानि प्रार्थयेदिति—

ॐ भूतानि यानीह वसन्ति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्ताम् ।
सन्तोषमासाद्य व्रजन्तु सर्वे क्षमन्तु तान्यत्र नमोऽस्तु तेभ्यः ।।
ॐ ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतले भूतले निष्कले वा
पाताले वा तले वा सलिलपवनयोर्यत्र तत्र स्थिता वा ।

क्षेत्रे पोठोपपीठा दिवि च कृतपदाः पुष्पधूपादिकेन
प्रीता देव्यः सदा नः शुभविधिवलिना पान्तु वीरेन्द्रवन्द्याः ।।

इति सम्प्रार्थ्य प्रणम्य च। (वामे) ॐ गुरुभ्यो नमः। ॐ परमगुरुभ्यो नमः। ॐ परापरगुरुभ्यो नमः। ॐ परमेष्ठिगुरुभ्यो नमः। (दक्षिणे) ॐ गणपतये नमः। (पुरतः) ॐ दक्षिणेश्वराय नमः। इति प्रणामं कृत्वा। "ॐ अस्त्राय फट्" इति मन्त्रेण श्वेतसर्षप,यव, पुष्पाणि चतुर्दिक्षु विकिरेत् ।। इति भूतवलिः ।।

(अथ कलशस्थापनम्[1])

ॐ सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भिर्भुजैः
शङ्खं चक्रधनुःशरांश्च दधती नेत्रैस्त्रिभिः शोभिता।
आमुक्ताङ्गदहारकङ्कणरणत्काञ्चीरणन्नूपुरा
दुर्गा दुर्गतिहारिणी भवतु वो रत्नोल्लसत्कुण्डला ।।

अथ पूजकः पूर्वोक्तं यथाशक्ति शान्तिस्वस्त्ययनादिकं कृत्वा कुशत्रयतिलजलान्यादाय सङ्कल्पं कुर्य्यात्। तद्यथा—ॐ अद्याश्विने मासि शुक्ले पक्षे प्रतिपत्तिथौ अमुकगोत्रस्यामुकशर्म्मणो मम सपरिवारस्य सदारापत्यमित्रस्य सबलवाहनस्योपस्थितशरीराविरोधेन नवग्रहोपग्रहजनितसकलारिष्टझटितिप्रशमनपूर्वकदीर्घायुष्ट्ववलपुष्टि-नैरुज्यप्राप्तिसर्वपापप्रशमनाखिलापच्छान्तिपूर्वकधनधान्याकण्टकराज्य-भोग्यसन्ततिसुखान्वितनिखिलमनोऽभिलषितफलप्राप्तिपूर्वकसाङ्गसायु-धसवाहनसपरिवारश्रीदुर्गाप्रीतिकामो वार्षिकशरत्कालीनश्रीदुर्गापूज-नाङ्गभूतकलशस्थापनमहं करिष्ये (अन्यकर्तृकपूजापक्षे करिष्या-मीति, एवं सामाजिकसम्मिलितपूजापक्षे तु एतदमुकग्रामवासिनां

---

१. (कलशद्रव्यं यथा मेरुतन्त्रे) सौवर्णं कलशं रम्यं रौप्यं ताम्रमथापि वा। निर्दोषं मृण्मयं वापि चन्दनेन विलेपितम् ।। सौवर्णं रजतं ताम्रं कांस्यजं मृत्तिकोद्भवम्। पाषाणं काञ्चनं वापि घटमक्षतमव्रणम् ।। कारयेद्देवताप्रीत्यै वित्तशाठ्यं विवर्जयेत्। (एषां फलाफलं यथा तत्रैव) सौवर्णं भोगदं प्रोक्तं राजतं मोक्षदायकम्। ताम्रं प्रीतिकरं ज्ञेयं कांस्यजं पुष्टिवर्द्धनम् ।। काचं वश्यकरं प्रोक्तं पाषाणं शुभकर्मणि। मृण्मयं सर्वकार्य्येषु सुदृश्यं सुपरिष्कृतम् ।।

नानानामगोत्राणां सदारापत्यमित्राणां सपरिवाराणां सबलवाहनाना-मखिललोकानाम् इति पदमूह्यम्) ॥

ॐ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरं गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥

ॐ संकल्पार्थाः सिद्धयः सन्तु पूर्णाः सन्तु मनोरथाः इति संकल्प्य (१) कलशस्थापनं कुर्यात्। तद्यथा स्ववामभागे देवतायाः दक्षिणभागे सम्मुखे वा पञ्चगव्यगंगाजलाद्यभिषिक्तां सुपरिष्कृतां नदीनदसमुद्भवबालुकानिर्मितां द्विहस्तां सार्धहस्तां हस्तमात्रपरिमितां वा सबिन्दुषट्कोणाष्टदलयन्त्रगर्भां सर्वतोभद्रमण्डलगर्भां वा चतुरस्रां (२) वेदीं निर्माय सामान्यार्घोदकेन तामभ्युक्ष्य ॐ कलशाधारशक्ते इहागच्छ इह तिष्ठेत्यावाह्य ॐ कलशाधारशक्तये नमः। इति पञ्चोपचारैः सम्पूज्य मध्यमानामिकाभ्यां वेदीभूमिं धृत्वा पठेत्। ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छ पृथिवी दृꣳह माहिꣳसीः ॥ इति वेदोक्तमन्त्रेण ॐ नमः इति तन्त्रोक्तमन्त्रेण च भूमिपरिग्रहणं कृत्वा। ॐ मान स्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः। मानो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे। इति गोमयोदकेनोपलिप्य।

ॐ वेद्याः वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम्।
यूपेन यूप आप्यते प्रणीतो अग्निरग्निना ॥

इति गंगाजलेन शुद्धिं कृत्वा। धान्ययवान् दद्यादनेन। ॐ धान्यमसि धिनुहि देवान् प्राणायत्वोदानायत्वा व्यानायत्वा दीर्घामनु प्रसितिमायुषेधां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ॥

१-(कलशपरिमाणं यथा तन्त्रसारे) पञ्चादशाङ्गङ्गुलो व्यास उत्सेधः षोडशाङ्गुलः। कलशानां प्रमाणन्तु मुखमष्टाङ्गुलं भवेत् ॥ षट्त्रिंदशङ्गुलं कुम्भं विस्तारोन्नति शालिनम्। षोडशां द्वादशं वापि ततो न्यूनं न कारयेत् ॥

२ (वेदीनिर्माणप्रकारस्तु पुरश्चर्यार्णवे) वालुका गृह्यायत्नेन नदीनदसमुद्भवाः। वेदीं कुर्य्यात्प्रयत्नेन चतुरस्रां शुभावहाम् ॥ द्विहस्ता चोत्तमा वेदी मध्यमा सार्धहस्तका। अधरा हस्तमात्रा च न्यूनाधिक्यं न कारयेत् ॥

ॐ यव त्वं यवरूपोऽसि यज्ञार्थं निर्मितो विधेः ।
देवानां तृप्तिकृद्यस्मात्तस्मात्त्वं वरदो भव ॥
ॐ (१) जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा नमोऽस्तु ते ॥

दुर्गे २ रक्षिणि स्वाहा ॥ ततस्तत्र लौहभिन्नान्यकलशमव्रणमच्छिद्र-मश्यामं दृढं समारोपयेदनेन ॥ ॐ आजिघ्र कलशं मह्यात्वा विशन्त्विन्दवः पुनरूर्जा निवर्तस्वसानः सहस्रं धुक्ष्वोरुधारापयस्वती पुनर्मा विशताद्रयिः । ततः कलशं दध्यक्षतैर्भूषयेदनेन । ॐ दधिक्राव्णो-अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभिनोमुखाकरत्प्रण आयूꣳषि तारिषत् ॥ ततः कलशे वरुणं न्यसेदनेन ॐ वरुणस्योत्तम्भनमसि वरुणस्यस्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदन-मासीद ॥ ततः कलशे गंगाजलं क्षिपेदनेन ।

ॐ गंगाद्याः सरितः सर्वाः सरांसि जलदा नदाः ।
सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥

तत. (२) पञ्चरत्नं दद्यादनेन । ॐ हिण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । सदा धार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ अथ काञ्चनं दद्यादनेन । ॐ स्वर्णधर्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्योतिः स्वाहा स्वर्णसूर्यः स्वाहा । ॐ तं गूर्द्धया स्वर्णरं देवासो देवमरतिंदधन्विरे । देवत्रा हव्यमूहिषे । अथ रौप्यं ददादनेन । ॐ यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत सत्यस्य ब्रह्मणो वर्चस्तेन मासꣳसृजामसि ॥ अथ ताम्रं

१-(जयन्त्या लक्षणं चोक्तं तन्त्रसारे) सम्यक् समुद्गता दीर्घा ऋजवश्चाङ्कुराः शुभाः । अनुद्गता कुंठिताग्राः ह्रस्वाः शुष्काश्च भंगुराः । कीटाखुभुक्ताः शरिताः विषमाश्चाशुभा स्मृताः ॥ (नवरत्नम्) यथा—मुक्तामाणिक्य वैदूर्यगोमेदावज्रवि-द्रुमौ । पद्मरागं मरकतं नीलं चेति यथाक्रमम्—

२-(पञ्चरत्नं) यथा—कनकं हीरकं नीलं पद्मरागं च मौक्तिकम् । पञ्चरत्नमिदंप्रोक्तं ऋषिभिः पूर्वदर्शिभिः । तद्भावेऽयंकल्पः—रत्नानां चाप्यभावे तु स्वर्णं कर्षार्द्धमेव च सुवर्णस्याप्यभावे तु आज्यं देयं विचक्षणैः । इति हेमाद्रिः ।

दद्यादनेन । ॐ असौ यस्ताम्रो अरुण उत बभ्रुः सुमंगलः । ये चैनꣳरुद्रा अभितो दिक्षु श्रिताः सहस्रशो वंषाꣳहेड् ईमहे ।। ततः (१) पञ्च-पल्लवं दद्यादनेन ॐ अश्वत्थेवो निषदनम्पर्णोवो वसतिः कृता, गोभाज-ऽइत्किला सथयत्सनवथ पूरुषम् ।। ॐ ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा-विलोहिताः । तेषांꣳसहस्रयोजनेव धन्वानि तन्मसि ।। ॐ अम्बे अम्बिके अम्बिके अम्बालिके नमानयति कश्चन सशस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ।। अथ (२) सप्तमृत्तिकां दद्यादनेन । ॐ स्योना पृथिविनोभवानृक्षरानिवेशनी । यच्छानः शर्म्मसप्रथाः ।। ततः (३) सर्वौषधीं दद्यादनेन ।। ॐ या ओषधीः सोमराज्ञीर्बह्वीः शत-विचक्षणाः । तासामसित्वमुत्तमारं कामाय शꣳहृदे ।। ततः नारिकेलं दद्यादनेन ।। ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्तानो मुञ्चत्वꣳहसः ।। ततः वस्त्रं दद्यादनेन ।। ॐ युबा सुवासाः परिवीत आगात् सउ श्रेयान् भवति जायमानः । तन्धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः । ततो घटे हस्तं दत्वा स्थिरीकुर्य्यादनेन ।। ॐ स्थिरोभव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहणः ।। ततः पुष्पं दद्यादनेन । ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणा मुंमइषाण सर्व्वलोकं मइषाए ॐ । ततः चन्दनं दद्यादनेन । ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां त्वामिहोपह्वये श्रियम् । ततो दूर्वाक्षतं दद्यादनेन । ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि । एवानो दूर्वे प्रतनु सहस्रेण शतेन च । ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे । ततो

१-(पञ्चपल्लवम्) यथा-आम्राश्वत्थबटपर्कटीयज्ञोदुम्बराणि इति वैदिकाचारः । तान्त्रिकपञ्चपल्लवं तु-पनसाम्रं तथाश्वत्थं बटं बकुलमेव च पञ्चपल्लवमुक्तं च मुनिभिस्तन्त्रवेदिभिः । इति तन्त्रसारः । २-(सप्तमृत्तिकास्तु)—अश्वस्थान, गजस्थान, रथ्या, वल्मीक, नदीसङ्गम, ह्रद्गोकुलाहृताः । ★ ॐ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणः स्मृतः ।। ३-(सर्वौषधिर्यथा) कुष्ठमांसीहरिद्राभिर्वचाशैलेयचन्दनैः मुराचन्दन-कर्पूरैर्मुस्तः सर्वौषधिः स्मृतः ।

व्रीहिवपनम् । ॐ व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्चमे खल्वाश्च मे प्रियङ्गवश्च मे जवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् । ततः अलक्तकं दद्यादनेन । ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् । सिन्दूरं दद्यादनेन । ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः । घृतस्य धारा अरुषो न वाजी काष्ठाभिन्दन्नूर्मिभिः पिन्वमानः । इति घटस्थापनं विधाय पूजामारभेत् । बद्धाञ्जलिः पठेत् ॐ प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वीरंनर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः । ततः पुष्पाक्षतमादाय । ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳ समिमन्दधातु विश्वेदेवास इह मादयन्तामोम्प्रतिष्ठ ॐ विनायकादिपञ्चदेवतानवदुर्गानवचण्डिकानवग्रहादिदिक्पालवाहनास्त्रादिदेवतासहितसाङ्गसायुधस - वाहनसपरिवार ॐ भूर्भुवस्वर्भगवति श्रीदुर्गे इहागच्छ इह तिष्ठ २ इह सन्निधेहि २ अत्राधिष्ठानं कुरु २ मम सर्वोपचारसहितां पूजां गृहाण २ स्वाहा इति प्रतिष्ठाप्य । ॐ [1]शान्तिकलश इहागच्छ इह तिष्ठेत्यावाह्य ॐ शान्तिकलशाय नमः । इति पञ्चोपचारैः पूजयेत् । पुष्पमादाय—

ॐ शान्तिकुम्भ महाभाग सर्वकामफलप्रद ।
पुष्पं गृह्ण शुभं यच्छ देवाधार नमोऽस्तु ते ॥

इदं पुष्पम । इदं पीतवस्त्रं बृहस्पतिदैवतं ॐ शान्तिकलशाय नमः । एतानि गन्धपुष्पधूपदीपताम्बूलयथाभागनानाविधनैवेद्यानि ॐ शान्तिकलशाय नमः । ततः कलशे गणपतिमावाह्य पूजयेत् तद्यथा ।

ॐ सर्वविघ्नहरो देव एकदन्त गजानन ।
पूजयाम्यर्चितः प्रीत्या सर्वविघ्नं विनाशय ॥

---

१. कुक्षौ तु सागराः सर्वे सप्तद्वीपां वसुन्धराः । ऋग्वेदोऽथ यजुर्वेदः सामवेदोह्यथर्वणः । अङ्गैश्च सहिता सर्वे कलशं तु समाश्रिताः । ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे ॐ दक्षयज्ञविनाशिन्यै योगिनीकोटिपरिवृत्तायै इति अष्टधा कलशं अभिमन्त्र्य देवतात्मकं विभाव्य कुंभमुद्रां प्रदर्श्य पूजामारभेत् ॥

ॐ भूर्भुवःस्वर्भगवन् गणपते इहागच्छ इह तिष्ठेत्यावाह्य पाद्यादिभिः पूजयित्वा। पुष्पमादाय। ॐ गणानान्त्वा गणपति ँ हवामहे प्रियाणान्त्वा प्रियपति ँ हवामहे निधीनान्त्वा निधिपति ँ हवामहे वसोमम। आहम जानि गर्भधमात्वम जासि गर्भधम्। इति पुष्पं दत्वा। ॐ गणपतये नमः। इति सर्वोपचारैः संपूज्य

ॐ एकदन्तं महाकायं लंवोदरगजाननम्।
विघ्ननाशकरं देवं हेरम्वं प्रणमाम्यहम्॥

इति प्रणमेत्॥ ततः ॐ वरुण इहागच्छ इह तिष्ठेत्यावाह्य ॐ वरुणाय नमः इति पञ्चोपचारैः पूजयेत्। पुष्पमादाय। ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद॥ इदं पुष्पं ॐ वरुणाय नमः। इति पञ्चोपचारैः संपूज्य। ॐ ब्रह्मन् इहागच्छ इह तिष्ठेत्यावाह्याद्यर्घ्यादिकं दत्वा पुष्पमादाय। ॐ आब्रह्मन् ★ इति वैदिकमन्त्रेण

ॐ पद्मयोनिश्चतुर्मूर्तिर्वेदवासा पितामहः।
यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै पुष्पं नमोनमः॥

ॐ ब्रह्मणे नमः। ततो दुर्गां पूजयेद् यथा। ॐ भूर्भुवःस्वर्भगवति श्रीदुर्गे इहागच्छ इह तिष्ठेत्यावाह्य पाद्यादिभिः पूजयित्वा पुष्पमादाय

ॐ जयन्ती मंगला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा नमोऽस्तु ते॥

इदं पुष्पं ॐ भगवत्यै श्रीदुर्गादेव्यै नमः॥ पञ्चोपचारैः पूजयेत्। ततो देव्याः प्रधानपूजायाः संकल्पं कुर्य्यात्॥ कुशत्रयतिलजलान्यादाय। ॐ अद्याश्विनेमासि शुक्ले पक्षे प्रतिपत्तिथौ अमुकगोत्रस्यामुकशर्म्मणो मम सपरिवारस्योपस्थितशरीराविरोधेन राज्यायुःसुतसौख्यसेव्येश्वरकर्तृकसम्मानसदायुद्धविजयसर्वविधसौमनस्यनैरुज्यदीर्घायुष्ट्वसार्वदिकश्रीदुर्गाप्रीतिकामः कलशे साङ्गसायुधसवाहनसपरिवारायाः

★ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योतिव्याधी महारथो जायताम्। दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः

श्रीदुर्गादेव्याः पूजनमहं करिष्ये★ (अन्यार्थे करिष्यामि) पुष्पाक्षत-मादाय ॐ भूर्भुवःस्वर्भगवति श्रीदुर्गे इहागच्छ इह तिष्ठेत्यावाह्य । पुष्पमेकं गृहीत्वा अञ्जलिम्बध्वा

ॐ आगच्छ चण्डिके देवि अष्टाभिः शक्तिभिः सह ।
पूजाभागं गृहाणेमं सान्निध्यमिह कल्पय ।।
ॐ आगच्छ त्वं महाभागे सर्वकल्याणहेतवे ।
मम शत्रुविनाशाय शङ्करप्राणदायिनि ।।

इदमावाहनपुष्पं ॐ साङ्गसायुधसवाहनसपरिवारायै दक्षयज्ञ-विनाशिन्यै महाघोरायै योगिनोकोटिपरिवृतायै भद्रकाल्यै सर्वशक्ति-स्वरूपिण्यै ह्रीं ॐ भगवत्यै श्रीदुर्गायै नमः । ततः पुष्पमेकं गृहीत्वा ।

ॐ दुर्गे सर्वजगन्नाथे यावत्पूजावसानकम् ।
तावत्त्वं प्रीतिभावेन घटेऽस्मिन् सन्निधा भव ।।

इति सम्मुखीकृत्वा ।

ॐ यस्य दर्शनमिच्छन्ति देवाः स्वाभीष्टसिद्धये ।
तस्यै ते परमेशायै स्वागतं स्वागतञ्च ते ।।

इतिस्वागतम् कृत्वा ।

ॐ देवेशि भक्तिसुलभे परिवारसमन्विते ।
यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव ।।

इति स्थिरीकृत्य आसनं दद्यादनेन ।

ॐ त्वं हि मङ्गलरूपं हि भगवत्याः सदा प्रिय ।
भगवत्या सुपाल्योऽस्मि सर्वसिद्धिं प्रयच्छ मे ।।

सभेयो युवास्य यज्ञमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् । ★ (पूजाधारमाह मत्स्यसूक्ते) चित्रे च प्रतिमायाञ्च मृण्मय्यां श्रीफलेऽपि च । महायोनौ चन्द्रबिम्बे शिलायां कलशे तथा ।। पुस्तके पादुके खड्गे महाबिम्बे तथैवच । पुण्यक्षेत्रे च गङ्गायाम् देवीमावाह्य पूजयेत् ।।

ॐ आसनं भास्वरं तुंगं मांगल्यं सर्वमङ्गले ।
भजस्व जगतां मातः प्रसीद जगदीश्वरि ॥

इदमासनं सा० भ० श्रीदुर्गायै नमः । पाद्यं दद्यादनेन ॥

ॐ गंगादिसलिलाधारं तीर्थं मन्त्राभिमन्त्रितम् ।
दूरयात्राश्रमहरं पाद्यं तत्प्रतिगृह्यताम् ॥

इदं पाद्यं साङ्गेत्यादि भगवत्यै श्रीदुर्गायै नमः ॥ ततः उद्वर्तनम् दद्यादनेन ।

ॐ तिलतैलसमायुक्तं सुगन्धिद्रव्यनिर्मितम् ।
उद्वर्तनमिदं देवि गृहाण त्वं प्रसीद मे ॥

ततोऽर्घ्यमादाय ।

ॐ तिलतण्डुलसंयुक्तं कुशपुष्पसमन्वितम् ।
सगन्धं फलसंयुक्तमर्घ्यं देवि गृहाण मे ॥

एषोऽर्घ्यः साङ्गेत्यादि श्रीदुर्गायै नमः । ततः आचमनीयमादाय ।

ॐ स्नानादिकं विधायापि यतः शुद्धिरवाप्यते ।
इदमाचमनीयं हि दुर्गे देवि प्रगृह्यताम् ॥

इदमाचमनीयम् साङ्गेत्यादि श्रीदुर्गायै नमः । ततः

ॐ खमापः पृथिवी चैव ज्योतिषं वायुरेव च ।
लोकसंस्मृतिमात्रेण वारिणा स्नपयाम्यहम् ॥

इदं स्नानीयम् । सा० श्री० दुर्गायै नमः ।

ॐ जगत्पूज्ये त्रिलोकेशि सर्वदानवभञ्जिनि ।
अष्टगार्घ्यं गृहाणत्वं देवि विश्वार्तिहारिणि ॥

एषअष्टगार्घ्यः साङ्गेत्यादि श्रीदुर्गायै नमः । ततो दधिसिताघृतमधुमिश्रात्मकमधुपर्कमादाय ।

ॐ मधुपर्कं महादेवि ब्रह्माद्यैः कल्पितं तव ।
मया निवेदितं भक्त्या गृहाण गिरिपुत्रिके ॥

एष मधुपर्कः साङ्गेत्यादि श्रीदुर्गायै नमः । ततः पुनराचमनीयम् ।

ॐ स्नानादिकं पुरः कृत्वा पुनः शुद्धिरवाप्यते ।
पुनराचमनीयं हि दुर्गे देवि प्रगृह्यताम् ॥

ततः चन्दनमादाय ।

ॐ मलयाचलसम्भूतं नानागन्धसमन्वितम् ।
शीतलं बहुलामोदं चन्दनं गृह्यतामिदम् ॥

इदं श्रीखण्डचन्दनम् । ततो रक्तचन्दनमादाय ।

ॐ रक्तानुलेपनं देवि स्वयं देव्या प्रकाशितम् ।
तद्गृहाण महाभागे शुभं देहि नमोऽस्तु ते ॥

इदं रक्तचन्दनम् ॥ ततः सिन्दूरमादाय ।

ॐ सिन्दूरं सर्वसाध्वीनां भूषणाय विनिर्मितम् ।
गृहाण वरदे देवि भूषणानि प्रयच्छ मे ॥

इदं सिन्दूराभरणं साङ्गेत्यादि श्रीदुर्गायै नमः ॥ ततः कुंकुममादाय ।

ॐ जपापुष्पप्रभं रम्यं नारीभालविभूषणम् ।
भास्वरं कुंकुमं रक्तं देवि दत्तं प्रगृह्यताम् ॥

इदं कुंकुमाभरणम् । तत. अक्षतमादाय ।

ॐ अक्षतं धान्यजं देवि ब्रह्मणा निर्मितं पुरा ।
प्राणदं सर्वभूतानां गृहाण वरदे शुभे ॥

इदमक्षतम् ॥ ततः पुष्पमादाय ।

ॐ चलत्परिमलामोदमत्तालिगणसंकुलम् ।
आनन्दनन्दनोद्भूतं दुर्गायै कुसुमं नमः ॥

ततो बिल्वपत्रमादाय ।

ॐ अमृतोद्भवं श्रीवृक्षं शंकरस्य सदा प्रियम् ।
पवित्रं ते प्रयच्छामि बिल्वपत्रं सुरेश्वरि ॥

इदं बिल्वपत्रम् ॥ ततो द्रोणपुष्पमादाय ।

ॐ ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदा प्रियम् ।
तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये ॥

इदं द्रोणपुष्पम् ॥ ततो मालामादाय ।

ॐ साक्षतां चोत्तमां मालां चन्दनागुरुचर्चिताम् ।
गृहाण त्वं महादेवि प्रसीद वरदा भव ॥

इदं पुष्पमाल्यम् । ततो वस्त्रमादाय ।

ॐ तन्तुसन्तानसंयुक्तं कलाकौशलकल्पितम् ।
सर्वाङ्गाभरणश्रेष्ठं वसनं परिधीयताम् ।।

इदं पीतवस्त्रं बृहस्पतिदैवतम् साङ्गेत्यादि श्रीदुर्गायै नमः । ततः द्वितीयवस्त्रोत्तरीयं दद्यादनेन ।

यामाश्रित्य महादेवो जगत्संहारकः सदा ।
तस्यैते परमेशान्यै कल्पयाम्युत्तरीयकम् ।।

ततः अलङ्करणमादाय ।

ॐ सौवर्णादिमलङ्कारं कंकणादिविभूषितम् ।।
हारकेयूरयुक्तानि नूपुराणि गृहाण मे ।।

इदमलङ्करणम् ।। ततो धूपमादाय ।

ॐ गुग्गुलं घृतसंयुक्तं नानाभक्ष्यैश्च संयुतम् ।
दशाङ्गं गृह्यतां धूपं दुर्गे देवि नमोऽस्तु ते ।।

एष धूपः । ततो दीपमादाय ।

ॐ मार्तण्डमण्डलान्तस्थं चन्द्रबिम्बाग्नितेजसम् ।
निधानं देवि दीपोऽयं निर्मितस्तव भक्तितः ।।

एष दीपः ।। ततः सुगन्धितद्रव्यमादाय ।

ॐ परमानन्दसौरभ्यं परिपूर्णदिगम्बरम् ।
गृहाण सौरभं दिव्यं कृपया जगदम्बिके ।।

इदं सुगन्धितद्रव्यम् ।। ततः कर्पूरदीपमादाय ।।

ॐ त्वं चन्द्र सूर्यज्योतींषि विद्युदग्न्योस्तथैव च ।
त्वमेव जगतां ज्योतिः दीपोऽयं प्रतिगृह्यताम् ।।

एष कर्पूरदीपः ।। ततो नैवेद्यमादाय ।

ॐ अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम ।
यो मा ददाति स इदेवमावदहमन्नमन्नमदन्तमद्मि ।।
ॐ दिव्यान्नरससंयुक्तं नानाभक्ष्यैस्तु संयुतम् ।
चोष्यपेयसमायुक्तमन्नं देवि गृहाण मे ।।
ॐ नानाविधानि रम्याणि स्वादूनि रसवन्ति च ।
मया दत्तानि गृह्णन्तां नैवेद्यानि सुरार्चिते ।।

एतानि नानाविधनैवेद्यानि ।

ॐ चतुर्विधमिदं भोज्यं देवि षड्भीरसैर्युतम् ।
सदा तृप्तिकरं रम्यमिदमन्नं प्रगृह्यताम् ।।

ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् ।

ॐ गव्यसर्पिःपयोयुक्तं नानामधुरमिश्रितम् ।
निवेदितं मया भक्त्या परमान्नं प्रगृह्यताम् ।।

इदं पायसम् ।

ॐ मोदकं स्वादु रुचिरं कर्पूरादिभिरन्वितम् ।।
मिश्रं नानाविधैर्द्रव्यैः प्रतिगृह्याशु भुज्यताम् ।।

इदं मोदकम् ।

ॐ अपूपानि च पक्वानि मण्डकावटकानि च ।।
पायसापूपमन्नं च नैवेद्यं प्रतिगृह्यताम् ।।

इदमपूपादिनैवेद्यम् ।।

ॐ फलमूलानि सर्वाणि ग्राम्यारण्यानि यानि च ।
नानाविधसुगन्धीनि गृह्ण देवि ममाचिरम् ।।

इदं फलादिनैवेद्यम् ।।

ॐ ताम्रपात्रे स्थितं सोधुं पयो गव्यमथाथवा ।
नारिकेलोदकं कांस्ये गृहाण शंकरप्रिये ।।

ॐ यदीवहन्त्याशवोभ्राजमानारथेष्वापिबन्तोमदिरंमधु ।
तत्रश्रवा ॐ सिकृण्वते ।।

इदं सुधातुकल्पितद्रव्यम् ।।

ॐ पानीयं शीतलं स्वच्छं कर्पूरादिसुवासितम् ।
भोजने तृप्तिकृद्यस्मात् कृपया परिगृह्यताम् ।।

ॐ आपोहि ष्ठामयोभुवस्तान ऊर्जे दधातन ।
महेरणाय चक्षसे ।।

इदं पानीयम् ।।

ॐ कर्पूरादीनि द्रव्याणि सुगन्धीनि महेश्वरि ।
गृहाण जगतांनाथे करोद्वर्तनहेतवे ।।

इतिकरोद्वर्तनजलं ।।

ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ।
पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ।।
ॐ आमोदवस्तुसुरभीकृतमेतदनुत्तमम् ।
गृहाणाचमनीयं त्वं मया भक्त्या निवेदितम् ।।

इदमाचमनीयम् ।

ॐ तमालदलकर्पूरनागवल्लीसमन्वितम् ।
संशोधितं सुगन्धं च ताम्बूलं प्रतिगृह्यताम् ।।

इदं ताम्बूलम् ।। ततः कज्जलम् ।

ॐ स्निग्धमुष्णं हृद्यतमं दृशां शोभाकरं तव ।
गृहीत्वा कज्जलं सद्यो नेत्राण्यञ्जय पार्वति ।।

ॐ समिद्धोअञ्जन् कृदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः ।
वाजीवहन् वाजिनं जातवेदो देवानां वक्षि प्रियमासधस्थम् ।।

इदं कज्जलम् । अथ सौवीराञ्जनप्रदानम् ।।

ॐ नेत्रत्रयं महामाये भूषयामलकज्जलैः ।
सुसौवीराञ्जनैर्दिव्यैर्जगदम्ब नमोऽस्तु ते ।।

इदं सौवीराञ्जनम् ।। अथालक्तकम् ।

ॐ त्वत्पादाम्भोजनखद्युतिकारि मनोहरम् ।
अलक्तकमिदं देवि मया दत्तं प्रगृह्यताम् ।।

इदमलक्तकम् ।। ॐ वात आवातु भेषजं शंभुमयोभुनोहृदे । प्रण आयूंषि तारिषत् अथ चामरम् ।

ॐ चामरं चमरीपुच्छं हेमदण्डसमन्वितम् ।।
मयार्पितं राजचिन्हं चामरं प्रतिगृह्यताम् ।।

इदं चामरम् । अथ व्यजनस्य । ॐ वात आवातु भेषजंशंभुमयो भुनोहृदे । प्रणआयूंषि तारिषत् ।

ॐ बर्हिर्बर्हिकृताकारमध्यदण्डसमन्वितम् ।
गृह्यतां व्यजनं दुर्गे देहस्वेदापनुत्तये ।।

इदं व्यजनम् ।। अथ घंटावाद्यम् ।

ॐ यया भीषयसे दैत्यान् यया पूरयसेऽसुरम् ।
तां घंटां सम्प्रयच्छामि महिषघ्नि प्रसीद मे ।।

इदं घंटावाद्यम् ।। अथ दक्षिणार्थं द्रव्यप्रदानम् ।

ॐ काञ्चनं रजतोपेतं नानारत्नसमन्वितम् ।
दक्षिणार्थं च देवेशि गृहाण त्वं नमोऽस्तु ते ।।

इयं दक्षिणा ।। अथ पुष्पाञ्जलिः ।

ॐ दुर्गे दुर्गे महामाये सर्वशक्तिस्वरूपिणि ।
त्वं काली कमला ब्राह्मी त्वं जया विजया शिवा ।
त्वं लक्ष्मीर्विष्णुलोकेषु कैलासे पार्वती तथा ।।
सरस्वती ब्रह्मलोके चेन्द्राणी शक्रपूजिता ।
वाराही नारसिंही च कौमारी वैष्णवी तथा ।।
त्वमापः सर्वलोकेषु ज्योतिस्त्वं ज्योतिरूपिणि ।
योगमाया त्वमेवासि वायुरूपा नभःस्थिता ।।
सर्वगन्धवहा पृथ्वी नानारूपा सनातनी ।
विश्वस्वरूपे विश्वेशे विश्वशक्तिसमन्विते ।
प्रसीद परमानन्दे दुर्गे देवि नमोऽस्तुते ।
नानापुष्पसमाकीर्णं नानासौरभसंयुतम् ।
पुष्पाञ्जलिञ्च विश्वेशि गृहाण भक्तवत्सले ।।

एष पुष्पाञ्जलिः ।। अथ नीराजनम् ।।

ॐ कर्पूरवर्तिसंयुक्तं वह्निना दीपितञ्च यत् ।
नीराजनं च देवेशि गृह्यताञ्जगदम्बिके ।।

इदं नीराजनम् ।। अथ पञ्चवर्तिनीराजनम् ।।

ॐ पञ्चवर्तिसमायुक्तं गोघृतेन च पूरितम् ।
नीराजनं जगद्वन्द्ये गृहाणाम्ब नमोऽस्तु ते ।।

इदं पञ्चवर्तिनीराजनं ।। अथारार्तिकप्रदानम् ।।

ॐ समस्तचक्रचक्रेशि शुभे देवि नवात्मिके ।
आरार्तिकमिदं दुर्गे गृहाण मम सिद्धये ।।

ॐ दीपैरनेकैर्विहितमरार्तिकमिदं शुभम् ।।
निवेदयामि ते देवि संहराज्ञानजं तमः ।।

एतदारार्तिकम् ।। अथाच्छिद्रावधारणम् ।

ॐ दुर्गे देवि महामाये यादृक् पूजा मया कृता ।।
अच्छिद्रास्तु शिवे साङ्गा तव देवि प्रसादतः ।।

अथ क्षमापनम् ।।

ॐ प्रार्थयामि महामाये यत्किञ्चित् स्खलितं मम ।
क्षम्यतां तज्जगन्मातः दुर्गे देवि नमोऽस्तु ते ।।

इति क्षमापनम् ।। अथ प्रणाममन्त्रः ।

ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ।।

इति प्रणमेत् ।। ततो नवाहोरात्रस्थायिनं दीपमुत्सृजेत् । ॐ अथाश्विनशुक्लप्रतिपदारम्य महानवमीपर्य्यन्तं वाजपेययज्ञजन्यफल-प्राप्तिबहुकिन्नरसहर्षदुर्गाप्रीतिकामो नवाहोरात्रस्थायिदीपमिमं विष्णु-दैवतं दुर्गायै अहं ददे ।।

ॐ अग्निज्योती रविज्योतिश्चन्द्र ज्योतिस्तथैव च ।
ज्योतिषामुत्तमं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ।।

(ततो वाहनपूजा)

तद्यथा ।

विजयो जयदो जेता विश्वघाती प्रियङ्करः ।
दुःखहा धर्मदः शान्तः सर्वारिष्टविनाशनः ।।

ॐ विजय इहागच्छ इह तिष्ठेत्यावाह्य एतानि पाद्यादीन्येषोऽर्घः ॐ विजयाय नमः । एवं प्रत्येकमावाह्य पञ्चोपचारैः पूजयेत् ।। ॐ जयद इहागच्छ इह तिष्ठ । ॐ जयदाय नमः । ॐ जेतः इहागच्छ इह तिष्ठ । ॐ जेत्रे नमः । ॐ विश्वघातिन् इहागच्छ इह तिष्ठ । ॐ विश्वघातिने नमः । ॐ प्रियङ्कर इहागच्छ इह तिष्ठ । ॐ प्रियङ्कराय नमः । ॐ दुःखहन् इहागच्छ इह तिष्ठ । ॐ

दुःखघ्ने नमः। ॐ धर्मद इहागच्छ इह तिष्ठ। ॐ धर्मदाय नमः। ॐ शान्त इहागच्छ इह तिष्ठ। ॐ शान्ताय नमः। ॐ सर्वारिष्टविनाशन इहागच्छ इह तिष्ठ। ॐ सर्वारिष्टविनाशनाय नमः॥ ततः ॐ ह्रां ह्रीं विवृतास्यसिंहासन इहागच्छ इह तिष्ठेत्यावाह्य। ॐ ह्रां ह्रीं विवृतास्याय सिंहासनाय नमः॥ इति सिंहासनं सम्पूज्य।

(ततः—अंगपूजा)

ॐ ह्रां हृदय इहागच्छ इह तिष्ठेत्यावाह्य। ॐ ह्रां हृदयाय नमः। एवं प्रत्येकं पञ्चोपचारैः पूजयेत्॥ ॐ ह्री शिरः इहागच्छ इह तिष्ठ। ॐ ह्रीं शिरसे नमः। ॐ ह्रूँ शिखे इहागच्छ इह तिष्ठ। ॐ ह्रूँ शिखायै नमः। ॐ ह्रैं कवच इहागच्छ इह तिष्ठ ॐ ह्रैं कवचाय नमः। ॐ ह्रौं नेत्रत्रय इहागच्छ इह तिष्ठ। ॐ नेत्रत्रयाय नमः। ॐ ह्रः अस्त्र इहागच्छ इह तिष्ठ। ॐ ह्रः अस्त्राय नमः। ततः

(अथ नवचण्डिकापूजा)

पुष्पमादाय

ॐ सर्वपापहरा देव्यः सर्वकामफलप्रदाः।
सर्वशत्रुविनाशिन्यः प्रायान्तु नवचण्डिकाः॥

इत्यावाह्य। ॐ ह्रीं उग्रचण्डे इहागच्छ इह तिष्ठेत्यावाह्य। प्रत्येकं पञ्चोपचारैः ॐ ह्रीं उग्रचण्डायै नमः इति पूजयेत्।

ॐ उग्रचण्डा तु वरदा मध्याह्नार्कसमप्रभा।
सा मे सदास्तु वरदा तस्यै नित्यं नमो नमः॥

इति पुष्पं दत्वा प्रणमेत्॥ ॐ ह्रीं प्रचण्डे इहागच्छ इह तिष्ठेत्यावाह्य ॐ ह्रीं प्रचण्डायै नमः।

ॐ प्रचण्डे पुत्रदे नित्यं प्रचण्डगणसंवृते।
जगदानन्ददे देवि प्रसन्ना भव सर्वदा॥

---

* रुद्रचण्डां प्रचण्डां च चण्डोग्रां चण्डनायिकाम्।
चण्डां चण्डवतीं चण्डरूपां चैवातिचण्डिकाम्॥

इति प्रणमेत् ॥ ॐ ह्रीँ चण्डोग्रे इहागच्छ इह तिष्ठेत्यावाह्य । ॐ ह्रीँ चण्डोग्रायै नमः ।

ॐ चण्डोग्रे भूतरूपासि सर्वभूताभयप्रदा ।
सौम्यभूता मयि सदा वरदा भव शोभने ॥

इति प्रणमेत् । ॐ ह्रीँ चण्डनायिके इहागच्छ इह तिष्ठेत्यावाह्य । ॐ ह्रीँ चण्डनायिकायै नमः ।

ॐ या सिद्धिरिति नाम्ना तु देवेशेन प्रकाशिता ।
सासि त्वं सासि देवेशि नमस्ते चण्डनायिके ॥

पुष्पं दत्वा प्रणमेत् ॥ ॐ ह्रीँ रुद्रचण्डे इहागच्छ इह तिष्ठेत्यावाह्य । ॐ ह्रीँ रुद्रचण्डायै नमः ।

ॐ रुद्रचण्डात्मिके चण्डे चण्डारिविजयप्रदे ।
धर्ममोक्षप्रदासि त्वं नित्यं मे वरदा भव ॥

ॐ ह्रीँ चण्डवति इहागच्छ इह तिष्ठेत्यावाह्य । ॐ ह्रीँ चण्डवत्यै नमः ।

ॐ या सृष्टिस्थितिसंहारगुणत्रयसमन्विता ।
यस्याः परा न चान्यास्ति चण्डवत्यै नमोनमः ॥

इति पुष्पं दत्वा प्रणमेत् ॥ ॐ ह्रीँ चण्डरूपे इहागच्छ इह तिष्ठेत्यावाह्य ॐ ह्रीँ चण्डरूपायै नमः ।

ॐ चण्डरूपा महाचण्डा चण्डनायकचण्डिका ।
सर्वसिद्धिप्रदा देवि तस्यै नित्यं नमोनमः ॥

ॐ ह्रीँ अतिचण्डिके इहागच्छ इह तिष्ठेत्यावाह्य ॐ ह्रीँ अतिचण्डिकायै नमः ।

ॐ बालार्कारुणनेत्रा या सर्वदा भक्तवत्सला ॥
चण्डासुरस्य मथिनी वरदा त्वतिचण्डिका ॥

इति प्रणमेत् ॥ ॐ ह्रीँ चण्डिके इहागच्छ इह तिष्ठेत्यावाह्य । ॐ ह्रीँ चण्डिकायै नमः ।

ॐ लक्ष्मीस्त्वं सर्वभूतानां सर्वभूताऽभयप्रदा ।
चण्डिके सर्वकार्य्येषु वरदा भवा सर्वदा ॥

इति प्रणमेत् ।

(ततो नवदुर्गापूजा)

पुष्पं गृहीत्वाञ्जलिं बध्वा ।

ॐ याः सर्वाः सुरकार्य्येषु स्वावतीर्णा यथा पुरा ।
आयान्तु नवदुर्गास्ताः सर्वं ददन्तु वाञ्छितम् ।।
ॐ ब्राह्मीं हंससमारूढ़ां स्वर्णवर्णां चतुर्भुजाम् ।
चतुर्वक्त्रां त्रिनेत्रां च ब्रह्मकुर्चं च पञ्चमम् ।।
दंडपद्माक्षसूत्रं च दधतीं चारुहासिनीम् ।।
जटाजूटधरां देवीं भावयेत्साधकोत्तमः ।।

इति ध्यात्वा ॐ ह्रीँ ब्रह्माणि इहागच्छ इह तिष्ठेत्यावाह्य ॐ ह्रीँ ब्रह्माण्यै नमः इति प्रत्येकं पञ्चोपचारैः पूजयित्वा ।

ॐ चतुर्मुखीं जगद्धात्रीं हंसारूढां वरप्रदाम् ।।
सृष्टिकर्त्रीं महामायां ब्रह्माणीं तां नमाम्यहम् ।।

एष पुष्पाञ्जलिः । ततः

ॐ माहेश्वरीं वृषारूढां शुक्लां त्रिनयनान्विताम् ।
कपालं डमरुञ्चैव वरदाभयशूलकम् ।।
टंकं च दधतीं देवीं नानालंकारभूषिताम् ।।

इति ध्यात्वा ॐ ह्रीँ माहेश्वरि इहागच्छ इह तिष्ठेत्यावाह्य ॐ ह्रीँ माहेश्वर्य्यै नमः ।

ॐ वृषारूढ़ां शुभां शुक्लां त्रिनेत्रां वरदां शिवाम् ।
माहेश्वरीं नमस्यामि जगत्संहारकारिणीम् ।।

इति पुष्पं दत्वा प्रणमेत् ।।

ॐ कौमारीं कुंकुमाभासां त्रिनेत्रां शिखिसंस्थिताम् ।
चतुर्भुजां शक्तिपाशांकुशाभयविधारिणीम् ।
नानालंकारसंयुक्तां प्रमत्तां परिचिन्तयेत् ।।

इति ध्यात्वा ॐ ह्रीँ कौमारि इहागच्छ इह तिष्ठेत्वावाह्य ॐ ह्रीँ कौमार्यै नमः ।

---

* ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथेन्द्राणी चामुण्डा चण्डिका तथा ।

ॐ कौमारीं पीतवसनां मयूरवरवाहिनीम् ।
शक्तिहस्तां शोणदेहां नमामि वरदां सदा ॥

इति पु० ॐ ह्रीँ कौमार्य्यै नमः ।

ॐ नारायणीं महादीप्तां श्यामां गरुडवाहिनीम् ।
नानालङ्कारसंयुक्तां चारुकेशीं चतुर्भुजाम् ।
घंटां शंखं कपालं च चक्रं संदधतीं पराम् ।
मधुमत्तां महोल्लासदृष्टिसर्वाङ्गसुन्दरीम् ॥

एवं ध्यात्वा ॐ ह्रीँ वैष्णवि इहागच्छ इह तिष्ठेत्यावाह्य ॥ ॐ ह्रीँ वैष्णव्यै नमः इतिपञ्चोपचारैः संपूज्य ।

ॐ शंखचक्रगदापद्मधारिणीं कृष्णविग्रहाम् ॥
स्थितरूपां खगेन्द्रस्थां वैष्णवीं प्रणमाम्यहम् ॥

इति प्रणमेत् ।

ॐ वाराहीं धूम्रवर्णाञ्च वराहवाहनां शुभाम् ।
फलकं खड्गमुषलं हलं वेदभुजैर्धृताम् ॥

इति ध्यात्वा । ॐ ह्रीँ वाराहि इहागच्छ इह तिष्ठेत्यावाह्य ॐ ह्रीँ वाराह्यै नमः इति संपूज्य ।

ॐ वाराहिरूपिणीं देवीं दंष्ट्रोद्धृतवसुन्धराम् ।
शुभदां नीलवसनां वाराहीं तां नमाम्यहम् ॥

इति प्रणम्य ।

ॐ नारसिंहीं नृसिंहस्य बिभ्रतीं सदृशं वपुः ।
चतुर्भुजां विशालाक्षीं महारौद्रीं वरप्रदाम् ॥

इति ध्यात्वा । ॐ ह्रीँ नारसिंहि इहागच्छेत्यावाह्य ॐ ह्रीँ नारसिंह्यै नमः । इति संपूज्य ।

ॐ नृसिंहरूपिणीं भीमां दैत्यदानवघातिनीम् ।
विकरालनखां शुभ्रां नारसिंहीं नमाम्यहम् ॥

इति प्रणमेत् ।

ॐ सहस्राक्षीं गजारूढां हेमाभां वज्रधारिणीम् ।
इन्द्रशक्तिसमाख्यातां इन्द्राणीरूपमास्थिताम् ॥

इति ध्यात्वा। ॐ ह्रीँ इन्द्राणि इहागच्छ इह तिष्ठेत्यावाह्य ॐ ह्रीँ इन्द्राण्यै नमः इति संपूज्य ॥

ॐ इद्राणीं गजकुंभस्थां सहस्त्रनयनां शुभाम् ॥
नमामि वरदां देवीं सर्वदेवनमस्कृताम् ॥

इति प्रणमेत्।

ॐ चामुण्डामट्टहासां प्रकटितदशनां भीमवक्त्रां त्रिनेत्राम्
नीलाम्भोजप्रभाभां प्रमुदितवपुषां नारमुंडालिमालाम्।
खड्गं शूलं कपालं नरशिरघटितं खेटकं धारयन्तीम्
प्रेतारुढाप्रमत्तां मधुमदमुदितां भवायेच्चण्डरूपाम् ॥

इति ध्यात्वा। ॐ ह्रीँ चामुण्डे इहागच्छ इहि तिष्ठेत्यावह्य ॐ ह्रीँ चामुण्डायै नमः। इति संपूज्य।

ॐ चामुण्डां मुण्डमथिनीं मुण्डमालोपशोभिताम् ॥
अट्टाट्टहासमुदितां नमाम्यात्मविभूतये ॥

इति प्रणमेत्।

ॐ वन्धूककुसुमाभासां पञ्चमुण्डाधिवासिनीम्।
स्फुरच्चन्द्रकलारत्नमुकुटां मुंडलासिनीम्।
त्रिनेत्रां रक्तवसनां पीनोन्नतघटस्तनीम्।
पुस्तकं चाक्षमालाञ्च वरञ्चाभयदं क्रमात्।
दधतीं च स्मरेन्नित्यं उत्तराम्नायमानिताम्।

इति ध्यात्वा। ॐ ह्रीँ चण्डिके इहागच्छ इहि तिष्ठेत्यावाह्य पञ्चोपचारैः संपूज्य ॐ ह्रीँ चण्डिकायै नमः।

ॐ कात्यायिनीं दशभुजां महिषासुरमर्दिनीम्।
प्रसन्नवदनां देवीं वरयांतां नमाम्यहम्।
ॐ चण्डिके नवदुर्गे त्वं महादेवप्रिये सदा।
पूजां समस्तां सगृह्य रक्ष मां त्रिदशेश्वरि।

इति प्रणमेत्।

अथ अस्त्रपूजा (वामहस्तेषु)

ॐ कपाल इहागच्छ इति तिष्ठेत्यावाह्य ॐ कपालाय नमः इति पञ्चोपचारैः पूजयेत् ॥ ॐ खेटक इहागच्छ इह तिष्ठ। ॐ खेटकाय नमः। ॐ घंटे इहागच्छ इह तिष्ठ ॐ घंटायै नमः। ॐ दर्पण इहागच्छ इह तिष्ठ। ॐ दर्पणाय नमः। ॐ तर्जनि इहागच्छ इह तिष्ठ ॐ तर्जन्यै नमः। ॐ धनुः इहागच्छ इह तिष्ठ। ॐ धनुषे नमः। ॐ ध्वज इहागच्छ इह तिष्ठ। ॐध्वजाय नमः। ॐ डमरुक इहागच्छ इह तिष्ठ। ॐ डमरुकाय नमः। ॐ पाश इहागच्छ इह तिष्ठ। ॐ पाशाय नमः ॥ अथ दक्षिणहस्तेषु। ॐ शक्ते इहागच्छ इह तिष्ठ। ॐ शक्तये नमः। ॐ मुद्गराय नमः। ॐ शूल इहागच्छ इह तिष्ठ। ॐ शूलाय नमः। ॐ चक्र इहागच्छ इह तिष्ठ। ॐ चक्राय नमः ॥ ॐ खड्ग इहागच्छ इह तिष्ठ। ॐ खड्गाय नमः। ॐ शंख इहागच्छ इह तिष्ठ। ॐ शंखाय नमः। ॐ वज्र इहागच्छ इह तिष्ठ। ॐ बज्राय नमः ॥ ॐ शर इहागच्छ इह तिष्ठ। ॐ शराय नमः।

(अथ दिक्पालपूजा)

ॐ इन्द्रादयो दिगीशा ये ये तेषां सहचारिणः।
ते पूजार्थमिहायान्तु पूजयिष्यामि तानहम् ॥

इत्यावाह्य। ॐ लँ इन्द्र पीतवर्ण सुराधिपते वज्रहस्त ऐरावत-वाहन सपरिवार दुर्गापारिषद इहागच्छ इह तिष्ठेत्येवंप्रत्येकमावाह्य ॐ लं इन्द्राय पीतवर्णाय सुराधिपतये वज्रहस्ताय ऐरावतवाहनाय सपरिवाराय दुर्गापारिषदाय नमः। इति संपूज्य।

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवे हवे सुहवꣳशूरमिन्द्रम्।
ह्वयामि शक्रंपुरहूतमिन्द्रꣳस्वस्ति नो मघवा धात्विन्द्रः ॥

ॐ इन्द्रं सुराधिपं पीतमैरावतगतं विभुम्।
सहस्रनेत्रं द्विभुजं पीतवज्रमहं भजे ॥

इति पुष्पाञ्जलिं दत्वा प्रणमेत् ॥ ॐ रँ अग्ने पिङ्गलवर्ण तेजोधिपते शक्तिहस्त अजवाहन सपरिवारदुर्गापारिषद इहागच्छ इह तिष्ठेत्यावाह्य। ॐ रं अग्नये पिङ्गलवर्णाय तेजोऽधिपतये शक्तिहस्ताय अजवाहनाय, सपरिवाराय, दुर्गापारिषदाय नमः इति संपूज्य।

ॐ वैश्वानरोन उतय ग्रा प्रयातु परावतः अग्निरुक्थेन वाहसा ॥

ॐ अग्निं तेजोरिक्तं श्वेतशक्तिकरं प्रभुम् ॥
सुभूषणं मेषवाहं वन्दे रक्तांगलोचनम् ॥

इतिपुष्पाञ्जलिं दत्वा प्रणमेत् ॥ ॐ यँ यम असितवर्ण प्रेताधिपते महिषवाहन सपरिवारदुर्गापरिषददण्डहस्त इहागच्छ इह तिष्ठेत्यावाह्य । ॐ यँ यमाय असितवर्णाय महिषवाहनाय सपरिवाराय दुर्गापारिषदाय प्रेताधिपतये दण्डहस्ताय नमः । ॐ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन । असि सोमेन समयविपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥

ॐ यमं प्रेताधिपं कृष्णं महिषोपरिसंस्थितम् ।
कालदण्डधरं क्रूरं वृतं दूतैर्भयानकैः ॥

इति पुष्पं दत्वा प्रणमेत् । ॐ क्षँ निर्ऋत रक्षोधिपते खड्गहस्त इहागच्छ इह तिष्ठेत्यावाह्य । ॐ क्षँ निर्ऋताय रक्षोधिपतये खड्गहस्तायनमः ।

ॐ यन्ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यम् ।
तन्ते विष्याम्यायुषो नमध्यादथैतं पितुमद्धिप्रसूतः ॥
ॐ रक्षोधिपं निर्ऋतिं शवासनसमाश्रितम् ।
धूम्राभं खड्गहस्तञ्च पिङ्गलश्मश्रुकूर्चकम् ॥

इति प्रणमेत् । ॐ वँ वरुणजलाधिपते पाशहस्त इहागच्छ इह तिष्ठेत्यावाह्य । ॐ वँ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमासीद ।

ॐ मकरे संस्थितं विद्युन्निभयास्त्रकराम्बुजम् ।
शुभ्रांगं तुंदिलं वन्दे वरुणं यादसांपतिम् ॥

इति प्रणमेत् ॥ ॐ वाँ वायो प्राणाधिपते ध्वजहस्त इहागच्छ इह तिष्ठेत्यवाह्य । ॐ वाँ वायवे प्राणाधिपतये ध्वजहस्ताय नमः ॥ ॐ वात आवातु भेषजं शंभुमयोभुनो हृदे । प्रण आयूंषि तारिषत् ॥

ॐ वायुं प्राणाधिपं धूम्रं रक्तांकुशकरं परम् ।
वातप्रमीसमारूपं धावन्तं वेगतो भजे ॥

इति प्रणमेत् । ॐ कं कुवेर यक्षोधिपते गदाहस्त इहागच्छ इह तिष्ठेत्यावाह्य । ॐ कँ कुवेराय यक्षोधिपतये गदाहस्ताय नमः । ॐ

कुविदङ्गयवमन्तो यवश्चिद् यथादान्त्यनुपूर्वं वियूय। इहेहैषां कृणु भोजनानि ये वर्हिषो नम उक्तिं यजन्ति ॥

ॐ यक्षनाथं कुवेरञ्च शुक्लं शुक्लगदाधरम् ॥
नरसिंहासनारूढ मेदुलं चित्रिणीयुतम् ॥

इति प्रणमेत् ॥ ॐ ईं ईशानभूताधिपते शूलहस्त इहागच्छ इह तिष्ठेत्यावाह्य ॐ ईं ईशानाय भूताधिपतये शूलहस्ताय नमः ॥ ॐ तमीशानं जगतस्तस्थुषस्पर्तीं। धियां जिन्वमवसेत् महे वयंपूषानो यथावेदसामसदवृधे रक्षितापयारदब्धः स्वस्तये ॥

ॐ विद्याधियं नीलशूलधरं वृषभवाहम्।
त्रिनेत्रं भालचन्द्रञ्च जटाजूटधरं सितम् ॥

इति प्रणमेत् ॥ ॐ बँ ब्रह्मन् बेढि सर्वलोकाधिपतये पद्महस्ताय नमः। ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर ईषव्योतिव्याधी महारथो जायताम् दोग्ध्री धेनुर्वोढाड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठा समेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः नः पर्य्यन्यो बर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्प्यताम्।

ॐ लोकाधिपं विधातारं रक्तपद्मकरं शुमम्।
हंसारूढं वेदपारंकुर्वन्तं तमहं भजे ॥

इति प्रणमेत् ॥ ॐ अँ अनन्तनागाधिपते चक्रहस्त इहागच्छ इह तिष्ठेत्यावाह्य। ॐ अँ अनन्ताय नागाधिपतये चक्रहस्ताय नमः ॥ इति संपूज्य। ॐ नमोऽस्तु सर्पेभ्यो ये केच पृथिवीमनु। ये अन्तरिक्षे ये दिवि तेभ्य। सर्पेभ्यो नमः ॥

ॐ गौरं नागाधिपं मूर्ध्नि फणमण्डलभूषितम् ॥
पीनोत्तुङ्गं चक्रधरं अनन्तं विश्वगं भजे ॥

इति प्रणमेत् ॥

(अथ नवग्रहपूजा)

पुष्पमादाय

ॐ आदित्यादिग्रहा ये च ये ग्रहाः क्रूरकर्मिणः।
तिथयो वासराः सर्वे ये तेषां सन्निधिस्थिताः ॥
ते पूजार्थमिहायन्तु पूजयिष्यामि तानहम् ॥

इत्यावाह्य ॐ आं आदित्य इहागच्छ इह तिष्ठेत्यावाह्य ।

ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन् ।
अमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ।।

ॐ पद्मासनं पद्मकरं पद्मगर्भसमद्युतिम् ।
किरीटिनं सकेयूरं मण्डितं रक्तछत्रिणम् ।।
रथारूढं तस्य सव्ये त्वधिदेवाग्न्यधिष्ठितम् ।।
प्रत्यधिदेवेश्वरेण सव्ये युक्तं च प्राङ्मुखम् ।।

इति ध्यानपुष्पं पाद्यादिकं च ॐ आं आदित्याय नमः इति पञ्चोपचारैः पूजयेत् ।। ॐ सं सोम इहागच्छ इह तिष्ठेत्यावाह्य ।

ॐ आप्यायस्व समेतु ते विश्वतः सोम वष्ण्यम् ।
भवा वाजस्य संगथे ।।

ॐ किरीटिनं श्वेतवस्त्रं दशाश्वं श्वेतभूषणम् ।
पाशपाणिं द्विबाहुं च अत्रिगोत्रसमुद्भवम् ।।
जातं यवनदेशे च श्वेतगन्धानुलेपनम् ।
अनुष्टुप्छन्दसा चात्रेयर्षं श्वेतातपत्रकम् ।।
श्वेतध्वजपताकाढ्यं केयूरमणिशोभितम् ।
स्थिरीकृतं रथारूढमधिदैवं च तोययुक् ।।
उमाप्रत्यधिदेवेन वायव्याभिमुखस्थितम् ।।

इति ध्यानपुष्पं पाद्यादिकं ॐ सँ सोमाय नमः ।। ॐ मं मङ्गल इहागच्छ इह तिष्ठेत्यावाह्य ।

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपाꣳरेताꣳसि जिन्वति ।।

ॐ रक्ताम्बरं रक्तवर्णं रक्तगन्धानुलेपनम् ।
रक्तपुष्पैः पूज्यमानं चतुर्बाहुं किरीटिनम् ।।
वराभयगदाशूलहस्तं मेषोपरिस्थितम् ।
वशिष्ठनेत्रसंभूतं यमदग्न्यार्षकं कुजम् ।।
जगतीच्छन्दसंरक्तं रक्तध्वजपताकिनम् ।।
अवन्तीदेशसंभूतं ध्यात्वा देवं प्रपूजयेत् ।।

इति ध्यानपुष्पं पाद्यादिकं ॐ मं मङ्गलाय नमः ।। ॐ बु बुध इहागच्छ इह तिष्ठेत्यावाह्य ।

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सᳪसृजेथामयं च ।
अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वदेवा यजमानश्च सीदत ।।

ॐ पीताम्बरं पीतवर्णं पीतगन्धानुलेपनम् ।
पीतपुष्पैः पूज्यमानं खड्गचर्मगदावरान् ।।
हस्तैर्दधन्तं सिंहस्थमत्रिगोत्रसमुद्भवम् ।
भारद्वाजार्षकं जातं मगधे च किरीटिनम् ।
वृहतीच्छन्दसं पीतच्छत्रध्वजपताकिनम् ।
केयूरमणिशोभाढ्यमधिदेवेन विष्णुना ।।
तेन प्रत्यधिदेवेन युक्तञ्चं चिन्तयाम्यहम् ।।

इति ध्यानपुष्पं पाद्यादिकं ॐ बु बुधाय नमः । ॐ बृ बृहस्पते इहागच्छ इह तिष्ठेत्यावाह्य ।

ॐ बृहस्पते अतियदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु
यद्दीदयच्छवसऋतप्रजात तदस्मासुद्रविणं धेहि चित्रम् ।।
ॐ बृहस्पतिं चतुर्बाहुं वरदण्डाक्षसूत्रकम् ।
कमण्डलुं दधद्धस्तैः पीतवर्णं किरीटिनम् ।
वशिष्ठार्षं सिन्धुदेशभवं पीताम्बरावृतम् ।
अनुष्टुप्छन्दसं चाङ्गिरसगोत्रं किरीटिनम् ।।
पीतध्वजपताकाढ्यं पीतच्छत्रानुलेपनम् ।
केयूराङ्गदशोभाढ्यमधिदेवेन्द्रसंयुतम् ।
ब्रह्मप्रत्यधिदेवेन युक्तं संचिन्त्य पूजयेत् ।।

इति ध्यानपुष्पं पाद्यादिकं ॐ बृ बृहस्पतये नमः । ॐ शु शुक्र इहागच्छेत्यावाह्य ।।

ॐ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरुषे अहनी द्यौरिवासि ।
विश्वाहिमाय अवसि स्वधावन् भद्रा ते पूषन्निह रातिरस्तु ।
ॐ शुक्लाम्बरं शुक्लवर्णं शुक्लगन्धानुलेपनम् ।।
शुक्लपुष्पैः पूज्यमानं शौनकार्षं किरीटिनम् ।।
चतुर्भुजं दण्डधरं साक्षिसूत्रकमण्डलुम् ।।

पङ्क्तिश्छन्दश्च वरदं तथा कीकटदेशजम् ॥
श्वेतश्छत्रध्वजायुक्तं तथा भार्गवगोत्रजम् ।
सकेयूरं रथारूढं श्वेताभरणभूषितम् ॥

इति ध्यानपुष्पं पाद्यादिकं ॥ ॐ शुं शुक्राय नमः ॥ ॐ शं शनैश्चर इहागच्छ इह तिष्ठेत्यावाह्य ॥

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥

ॐ बाणाशनं शूलधरन्द्रिनीलसमप्रभम् ।
सौराष्ट्रदेशजं प्रोक्तं वरदं गृध्रवाहनम् ॥
भृग्वर्षं काश्यपे गोत्रे जातं चापि किरीटिनम् ॥
कृष्णाम्बरं कृष्णवर्णं कृष्णगन्धानुलेपनम् ।
गायत्रीच्छन्दसं कृष्णवर्णाभरणभूषितम् ॥
केयूरिणं मुकुटिनं कृष्णध्वजपताकिनम् ॥
प्रजापत्यधिदेवेन सहितं रथमास्थितम् ।
पद्मप्रत्यधिदेवेन युक्तं ध्यायेत् शनैश्चरम् ॥

इति ध्यानपुष्पं पाद्यादिकं ॐ शं शनैश्चराय नमः ॥ ॐ रां राहो इहागच्छ इह तिष्ठेत्यावाह्य ।

ॐ कयानश्चित्र आभुव दूती सदावृधः सखा । कयासचिष्ठयावृता।

ॐ करालवदनं खड्गचर्मशूलधरं वहन् ।
कृष्णाम्बरं कृष्णवर्णं कृष्णगन्धानुलेपनम् ॥
कृष्णपुष्पैः पूज्यमानं केयूरमुकुटान्वितम् ।
पूर्वदेशे समुत्पन्नं क्रूरमाङ्गिरसार्षकम् ॥
पाटलागोत्रसंभूतं अनुष्टुप्छन्दसंग्रहम् ।
कृष्णच्छत्रं रथारूढं कृष्णध्वजपताकिनम् ।
सर्पाधिदैवतं पैत्रकालप्रत्यधिदैवतम् ॥

इति ध्यानपुष्पं पाद्यादिकं ॐ रां राहवे नमः ॥ ॐ कें केतो इहागच्छ इह तिष्ठेत्यावाह्य ।

ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥

ॐ धूम्राक्षिवाहवः पाशधराश्च विकृताननाः ।
किरीटिनो गृध्रवाहामध्यदेशोद्भवा वृढाः ।
चित्राम्बराश्चित्रवर्णाः चित्रगन्धानुलेपनाः ।

नानाच्छन्दस्कका गौतमार्षा जैमिनिगोत्रजाः ।
कृष्णपिङ्गध्वजपताकिनो मुकुटिनस्तथा ।
केयूरिणो रथारूढाः शूरा ब्रह्मादिदेवताः ।
चित्रगुप्तप्रत्यधिदेवताश्चात्र केतुं विचिन्तयेत् ॥

इति ध्यानपुष्पं पाद्यादिकं ॐ कें केतवे नमः ॥ ॐ अधिदेवताः इहागच्छत इह तिष्ठत । पाद्यादिकं, ॐ अधिदैवतेभ्यो नमः ॥ ॐ प्रत्यधिदैवताः इहागच्छत इह तिष्ठत । पाद्यादिकं ॐ प्रत्यधिदैवतेभ्यो नमः ॥ ततः ग्रहमातृः पूजयेत् तद्यथा ।

मङ्गलां पिङ्गलां, धन्यां, भ्रामरीं, भद्रिकां तथा ।
उल्कां, सिद्धां, संकटां, च विकटां, गर्भपालिकाम् ॥

ततः पुष्पाञ्जलिं गृहीत्वा स्तोत्रं पठेत् । तद्यथा ॥

ॐ दुर्गे देवि महामाये महाविद्ये महाप्रभे ।
दक्षदैत्याः सुरधरे सुरत्राणकरे परे ।
चापशक्त्यादिकधरे नियुद्धकुशले परे ॥
आरोग्यं परमैश्वर्यं राज्यान्तकमकंटकम् ।
वरश्च देहि मे मातः कार्तिकेये यथा तव ॥
ॐ दुर्गे त्वं ब्रह्मरूपासि सुरतेजोमहाबले ।
महानन्दकरे देवि प्रसीद परमेश्वरि ॥
ॐ दुर्गां शिवां शान्तिकरीं ब्रह्माणीं ब्रह्मणः प्रियाम् ।
सर्वलोकप्रणेत्रीं च प्रणमामि सदा उमाम् ॥
मंगलां शोभनां शुद्धां निष्कलां परमां कलाम् ।
विश्वेश्वरीं विश्वमातां चण्डिकां प्रणमाम्यहम् ॥
सर्वदेवमयीं देवीं सर्वलोकभयापहाम् ।
विन्ध्यस्थां विन्ध्यनिलयां दिव्यस्थाननिवासिनीम् ॥
ब्रह्मेशविष्णुनमितां प्रणमामि सदा शिवाम् ।
योगिनीं योगमातां च चण्डिकां प्रणमाम्यहम् ।
ईशानमातरं देवीमीश्वरीमीश्वरप्रियाम् ।
प्रणतोऽस्मि सदा दुर्गां संसारार्णवतारिणीम् ।
य इदं पठति स्तोत्रं शृणुयाद्वापि यो नरः ।
स मुक्तः सर्वपापेभ्यो मोदते दुर्गया सह ॥
ॐ महिषघ्नि महामाये चामुंडे मुंडमालिनि ।

आयुरारोग्यमैश्वर्य्यं देहि देवि नमोऽस्तु ते ॥
भूतप्रेतपिशाचेभ्यो रक्षोभ्यश्च महेश्वरि ।
देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा ॥
कुंकुमेन समारब्धे चन्दनेन विलेपिते ।
विल्वपत्रकृतापीडे दुर्गेऽहं शरणं गतः ॥
ॐ सर्वमङ्गलमंगल्ये शिवे सर्वार्थसाधिके ॥
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ।
ॐ रूपं देहि जयं देहि भाग्यं भगवति देहि मे ।
पुत्रान्देहि धनं देहि सर्वान् कामान् प्रदेहि मे ॥

एष पुष्पाञ्जलिः ॐ साङ्गसायुधसवाहनसपरिवारदक्षयज्ञविनाशिन्यै महाघोरायै योगिनीकोटिपरिवृतायै भद्रकाल्यै ॐ ह्रीँ दुर्गादेव्यै नमः ॥ एवं षष्ठीपर्य्यन्तं पूजयेत् ॥ इति पूजान्ते शिवं ब्रह्माणञ्च पूजयेत् ॥

(अथ द्वितीययां रेमन्तपूजा)

तत्तु आचारात् यत्र मृण्मयीमूर्तिर्न भवति तत्र पात्रे एव अवाहनं विधाय पूजयेत् इति सम्प्रदायः ॥ तत्राश्वशालायां सर्वतः परिवृतामनुलिप्तां नानावर्णपुष्पालंकृतां सुधूपितां कृत्वा अश्वशालायाः पश्चिमदिशि वप्रत्रयावृततण्डुलचूर्णस्थण्डिलं प्रकल्प्य तदुपरि चन्दनादिना मण्डलं विधाय तत्र मूर्तौ वा रेमन्तं उच्चैःश्रवसं च पूजयेत् ॥ तत्र क्रमः । कुशत्रयतिलजलान्यादाय ॐ अद्याश्विने मासि शुक्ले पक्षे द्वितीयायान्तिथावमुकगोत्रस्यामुकशर्मणः सकलाश्वमृत्यूत्पातपीडाप्रशमननैरुज्यदीर्घायुष्ट्वबलपुष्टिसमृद्धिकामो दुर्गाप्रीतिकामश्च रेमन्तमुच्चैःश्रवसं तुरंगमश्चाहं पूजयिष्ये । इति संकल्प्य पुष्पाक्षतमादाय रेमन्तं द्विभुजं खडगपाणिं रक्तवर्णं नानालङ्कारभूषितम् कशाहस्तं ध्यात्वा ॐ भगवान् रेमन्त इहागच्छ इह तिष्ठेत्यावाह्य । मूर्तौ च ॐ मनोजूतिर्जुषता माज्यस्येत्यादिमन्त्रेणावाह्य एतानि पद्यादोन्येषोर्घ्यः ॐ रेमन्ताय नमः ॥ इति पञ्चोपचारैः पूजयेत् । ततः पुष्पाञ्जलिमादाय ।

ॐ नमो देवाधिदेवाय तुरङ्गवलचारिणे ।
सूर्य्यपुत्राय देवाय तुरंगाणां हिताय च ॥

तुरंगोपरि संयम्य मृगायां परिधावति।
साश्वमश्वाधिपं रक्ष शरणं त्वां व्रजाम्यहम् ।।
ॐअश्वरूपोऽसि तेजस्वी खड्गपाणिर्भयानकः ।
सवर्णासम्भवः सौरो रेमन्तस्त्वं प्रसीद मे ।।

इति ध्यानपुष्पाञ्जलिः रेमन्ताय नमः ।। वस्त्रं दत्वा अञ्जलिं बध्वा ।

ॐ सूर्य्यपुत्र महाबाहो छायाहृदयनन्दन ।
शान्ति यच्छ तुरंगणां रेमन्ताय नमोऽस्तु ते ।।
प्रवरस्त्वं तुरंगाणां बलं दर्पस्तथा वयः ।
तं तेजसां गतिं बीज रेमन्तं प्रणमाम्यहम् ।।

इति प्रणमेत् ।। ततः ॐ उच्चैः श्रवा इहागच्छ इह तिष्ठेत्यावाह्य। ॐ उच्चैःश्रवसे नमः । इति पञ्चोपचारैः पूजयेत् ।। ॐ तुरंगा इहागच्छत इह तिष्ठतेत्यावाह्य । ॐ तुरंगेभ्यो नमः । इति पञ्चोपचारैः पूजयेत् ।। वस्त्रं दत्वा अञ्जलिं बध्वा ।

ॐ अंगच्छत्रमनिष्टानि क्षमस्व पुरुषोत्तम ।
कुलाभिजनजात्यादि यञ्जनैर्लक्षणान्वितैः ।।
भर्तारमभिरक्षस्व शिवं तव भवेत्सदा ।।
तुरंगम चिरजीव परशस्त्रैरलक्षितः ।
सदा मां समरे रक्ष स्वामिकार्य्यं तदा कुरु ।।

इति प्रणमेत् ।। ततः अश्वकर्णे जपेत् ।

ॐ उच्चैःश्रव नमस्तुभ्यं नमः क्षीराब्धिनन्दन ।
वाहान् वर्धय वाहेन्द्र सर्वोत्पातं विनाशय ।।
ॐ गन्धर्वकुलजातोऽसि मा भूयाः कुलदूषकः ।
ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ।।
तेजसा चैव सूर्य्यस्य मुनीनां तपसा तथा ।
रुद्रस्य ब्रह्मचर्य्येण पवनस्य बलेन च ।।
प्रभावाच्च हुताशस्य वहस्व त्वं तुरंगम ।
स्मर त्वं राजपुत्रोऽसि कौस्तुभं च मणिं स्मर ।।

सुरासुरैर्मथ्यमानात् क्षीरोदादमृतादिभिः ।
जात उच्चैःश्रवाः पूर्वं तेन जातोसि तत्स्मर ।।

यां गतिं ब्रह्महा गच्छेत् पितृहा मातृहा तथा ।
भूम्यर्थेऽनृतवादी च रणे यश्च पराङ्मुखः ।।

सूर्य्याचन्द्रमसौ राहुः यावत्पश्यन्ति दुष्कृतम् ।
तां गतिं व्रजसि क्षिप्रं तच्च पापं भवेत्तव ।।

विकृतं यदि गच्छेथाः युद्धेऽध्वनि तुरंगम ।
रिपून् विजित्य समरे सहभर्त्रा सुखीभव ।।

पृष्ठतोऽस्ति यशो देवः साहसो हृदयस्थितः ।
जंघायामनिलस्तेऽस्ति तेजः सर्वशरीरगम् ।।

त्वमुच्चैः श्रवसो वंश्यः प्रशंस्यो रणकर्मणि ।
युध्यस्व पुरुषो देवः शिरसा प्रणमाम्यहम् ।।

येन सत्येन रेमन्तं येन सत्येन भास्करम् ।
वहसे तेन सत्येन विजयस्व वहस्व माम् ।।

एवं नवमीपर्य्यन्तं पूजयेत् ।। शान्तिस्वस्त्ययने तुरंगानुद्दिश्य कारयेत् ।। धान्य-भल्लातक-वचाकुष्ठं-सर्षपलोह-निम्बपत्र-गुग्गुल-घृतहिंगुभिः पञ्चरङ्गसूत्रेण पीतवस्त्रैश्च पोटलिकां कृत्वा अश्वरक्षार्थमश्वानां कंठे बध्नीयात् ।। अश्वशालायां निम्बाज्यसर्षपञ्च दद्यात् । छागादिबलिं दद्यात् ।। बलिदानसंकल्पस्तु । ॐ अद्येत्यादि अश्वानामुत्पातपीडाप्रशमनपूर्वकदीर्घायुष्ट्वसमृद्धिकामोऽमुं छागं वह्निदैवतं रेमन्तायाहं घातयिष्ये । इति बलिं दत्वा गीतवाद्यादिकं कारयेत् । ताडनवाहनादि वर्जयेत् ।। ततः षष्ठ्यां पूर्वक्रमेणैव पूजां कृत्वा गजपूजा कर्तव्या ।। तद्यथा—

(अथ षष्ठ्यां गजपूजा)

शालायाः प्रागुदग्भागे स्थंडिलं कल्पयेद्बुधः ।
चतुर्द्वारं चतुर्हस्तं मंडपं तु सुशोभनम् ।
तत्राब्जं षोडशदलं निर्मातव्यं सकर्णिकम् ।।
सिततण्डुलचूर्णेन प्रयत्नेन मनीषिणा ।

विदिक्षु पूर्णकलशान् पूर्णपात्रयुतान् न्यसेत् ।
सप्तहस्तेषु दण्डेषु पताकाश्च तथा न्यसेत् ।।
दिग्गजानान्तु विन्यासमीपधीभिः प्रकल्पयेत् ।।

ततः कुशादिकमादाय ॐ अद्याश्विने मासि शुक्ले पक्षे षष्ठ्यां तिथौ अमुकगोत्रस्यामुकशर्म्मणो गजसमृद्धिकामः कुमुदऐरावतादीन् दिग्गजानहं पूजयिष्ये ।। (अन्यार्थं पूजयिष्यामि) ततः पूर्वदले । ॐ इन्द्र इहागच्छ इह तिष्ठेत्यावाह्य । ॐ इन्द्राय नमः इति पञ्चोपचारैः प्रत्येकं पूजयेत् ।। ॐ ऐरावत इहागच्छेत्यावाह्य ॐ ऐरावताय नमः । ॐ अभ्रमो इहागच्छ इह तिष्ठ । ॐ अभ्रमवे नमः । ॐ अग्ने इहागच्छ । ॐ अग्नये नमः । ॐ पद्म इहागच्छ । ॐ पद्माय नमः । ॐ कपिले इहागच्छ । ॐ कपिलायै नमः । दक्षिणदले । ॐ यम इहागच्छ । ॐ यमाय नमः । ॐ पुष्पदन्त इहागच्छ इह तिष्ठ ॐ पुष्पदन्ताय नमः । ॐ पिङ्गले इहागच्छ इह तिष्ठ । ॐ पिङ्गलायै नमः । नैर्ऋत्यदले । ॐ रक्षोऽधिपते इहागच्छ इह तिष्ठेत्यावाह्य । ॐ रक्षोऽधिपतये नमः । ॐ वामन इहागच्छ । ॐ वामनाय नमः । ॐ अनुपमे इहागच्छ ॐ ॐ अनुपमायै नमः । पश्चिमदले । ॐ वरुण इहागच्छ । ॐ सार्वभौम इहागच्छ ॐ सार्वभौमाय नमः । ॐ ताम्रकर्णि इहागच्छ । ॐ ताम्रकर्ण्यै नमः । वायव्ये । ॐ वायो इहागच्छ इह तिष्ठ । ॐ वायवे नमः । ॐ अञ्जन इहागच्छ । ॐ अञ्जनाय नमः । ॐ शुभ्रदन्ति इहागच्छ इह तिष्ठ । ॐ शुभ्रदन्त्यै नमः उत्तरे । ॐ कुवेर इहागच्छ । ॐ कुवेराय नमः । ॐ नील इहागच्छ । ॐ अङ्गने इहागच्छ । अंगनायै नमः । ऐशान्ये । ॐ ईशान इहागच्छ इह तिष्ठ । ॐ ईशानाय नमः । ॐ कुमुद इहागच्छ । ॐ कुमुदाय नमः । ॐ अञ्जनावति इहागच्छ । ॐ अञ्जनावत्यै नमः । मध्ये । ॐ विष्णो इहागच्छ इह तिष्ठ । ॐ विष्णवे नमः ॐ श्रीः इहागच्छ इह तिष्ठेत्यावाह्य । ॐ श्रियै नमः । ॐ सूर्य्य इहागच्छ इह तिष्ठ ॐ सूर्य्याय नमः । ॐ पृथिवि इहागच्छ । ॐ पृथिव्यै नमः । ॐ अन्तरिक्ष इहागच्छ । ॐ अन्तरिक्षाय नमः । पुनः पूर्वादितः । ॐ वज्र इहागच्छ इह तिष्ठ । ॐ वज्राय नमः । ॐ शक्ते इहागच्छ । ॐ शक्तये नमः । ॐ दण्ड इहागच्छ इह तिष्ठ ॐ दण्डाय नमः । ॐ खड्ग इहागच्छ इह

तिष्ठ ॐ खड्गाय नमः। ॐ पाश इहागच्छ। इह तिष्ठ, ॐ पाशाय नमः। ॐ अङ्कुश इहागच्छ इह तिष्ठ। ॐ अंकुशाय नमः। ॐ गदे इहागच्छ। ॐ गदायै नमः। ॐ शूल इहागच्छ। ॐ शूलाय नमः इत्यस्त्राणि संपूज्य। गजं च

पञ्चोपचारैः संपूज्य मन्त्रयेत्तस्य कर्णयोः।
करिणं तं समारुह्य कृत्वा तस्य प्रदक्षिणम्॥
ॐ श्रीगजस्त्वं हृतो राज्ञा भवानस्य गजाग्रणीः।
गन्धमाल्याम्बुभक्ष्यैस्त्वां पूजयिष्यति पार्थिवः।
लोकस्तदाज्ञया पूजां करिष्यति तथा तव।
पालनीयस्त्वया राजा युद्धेऽध्वनि तथा गृहे॥
तिर्यग्भावं समुत्सृज्य दिव्यभावमनुस्मर।
देवासुरे तथा युद्धे श्रीगजस्त्रिदशैः कृतः॥
ऐरावतः स्वतः श्रीमान् विष्णुर्नाम च वारणः।
श्रीगजानां तु तत्तेजः सर्वमेवोपतिष्ठति॥
तत्तेजस्तव नागेन्द्र दिव्यभावसमन्वितम्।
उपतिष्ठतु भद्रं ते व्रज राजानमाहवे।
इत्येवमभिविश्वस्व शुभेऽहनि नराधिपः।
आरोहयेत्ततो नागं सर्वमङ्गलसंयुतम्॥
ज्येष्ठयोगे पुरा तत्र गजाष्टौ च महाबलाः।
पृथिवीमावहन् पूर्वं सशैलवनकाननाम्॥
कुमुदैरावतौ पद्मः पुष्पदन्तोऽथ वामनः।
सर्वभौमः सुप्रतीकोऽप्यञ्जनोऽमितविक्रमः॥
सर्वे ह्येते महावीर्य्या इत्यष्टौ देवयोनयः।
तेषां पुत्राश्च पौत्राश्च बलान्यष्टौ समाश्रिताः।
भद्रमल्लो मृगश्चैव गजः संकीर्ण एव च।
नानारत्नं प्रसूतास्तान् स्मर योनिं महागज।
पान्तु वो वसवो रुद्राः आदित्याश्च मरुद्गणाः।
भर्तारं रक्ष नागेन्द्र समयः प्रतिपाल्यताम्।
अवाप्नुहि जयं युद्धे समये स्वस्ति नो व्रज॥
श्रीस्ते सोमाद् बलं कृष्णात्तेजः सूर्य्याद् यवोऽनिलात्॥
सौर्य्यं मेरोर्यवं रुद्राद्यशो देवपुरन्दरात्।

मेरुः शक्रश्च नागाश्च दिशश्च सह दैवतैः ।
अश्विभ्यां सह गन्धर्वाः पान्तु त्वां सर्वतः सदा ॥
युद्धे रक्षन्तु नागास्त्वां दिवश्च सह दैवतैः ।
अश्विन्यौ सह गन्धर्वैः पान्तु त्वां सर्वतः सदा ॥

इति प्रणम्य। कुशादिकमादाय। ॐ अद्येत्यादिगजानामुत्पात-पीडाप्रशमनपूर्वकसमृद्धिकामोऽमुं छागं वह्निदैवतमैरावतादिदिग्गजेभ्योऽहं घातयिष्ये ॥ इति बलिं दत्वा विसर्जनं कुर्य्यात् । ॐ विष्णो पूजितोऽसि प्रसीद। एवं सर्वान् आवाहितदेवान् आवाहनपदेनैव विसर्जयेत् ॥ ॐ श्रीर्मयि रमस्व। ततो दक्षिणा। ॐ अद्याश्विने मासि शुक्ले पक्षे षष्ठ्यां तिथौ गजपूजनकर्मप्रतिष्ठार्थमेतावद्द्रव्य-मूल्यकहिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे ॥ इति गजपूजाविधिः ॥

(अथ बिल्वाभिमन्त्रणम्)

ततः षष्ठ्याः सायंकाले कदली, दाडिम, धान्य, हरिद्रा, मान, कञ्चु, अशोक, जयन्त्यादियुतं बिल्वाभिमन्त्रणं कुर्य्यात् ॥ बिल्ववृक्ष-समीपं गत्वा वृक्षाग्रे ॐ वेतालाय नमः। ॐ मणिभद्राय नमः। ॐ त्रिपुरान्तकाय नमः। ॐ करणाय नमः। ॐ हेतुकाय नमः। ॐ अग्निजिह्वारसाय नमः इति संपूज्य, ततः आचम्य कुशत्रयतिलजला-न्यादाय। ॐ अद्याश्विने मासि शुक्ले पक्षे षष्ठ्यां तिथौ सायाह्ने अमुकगोत्रस्यानुकशर्मणो मम सपरिवारस्योपस्थितशरीराविरोधेन सर्वोपद्रवशान्तिपूर्वकसर्वानिष्टविनाशार्थंनिखिलकल्मषनिवृत्तिपूर्वकश्री-दुर्गाप्रीतिकामः श्वःकर्तव्यवार्षिकशरत्कालीनश्रीदुर्गामहापूजाकर्मणि बिल्ववृक्षे साङ्गसायुधसवाहनसपरिवारायाः श्रीदुर्गादेव्या बोधनामन्त्र-णाधिवासनकर्माण्यहं करिष्ये। इति संकल्प्य।

ॐ देव वृक्षवर श्रेष्ठ स्थानं ते सुमनोहरम् ।
क्रीडन्त्यागत्य विबुधाः मार्जये तत् प्रसीद मे ॥

इति गोमयोदकेन संमार्ज्यं ।

ॐ बिल्ववृक्ष महाभाग सदा त्वं पापनाशन ।
मम विघ्नविनाशाय बिल्ववृक्षाय ते नमः ।

ॐ बिल्ववृक्ष सदा भक्त्या सर्वकल्याणहेतवे ।
ममैश्वर्यप्रकाशाय बिल्ववृक्षाय ते नमः ।

इति प्रणम्य ।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

इति गंगाजलेन पञ्चगव्येन पञ्चामृतेन च स्नापयेत् । एषोऽर्घः ॐ बिल्ववृक्षाय नमः । इति पञ्चोपचारैः संपूज्य वस्त्रं दत्वा । पुष्पाञ्जलिमादाय ।

ॐ बिल्ववृक्ष महाभाग महेशस्य सदा प्रिय ।
शिवदर्शनकज्योतिः प्रसीदाब्धिसुतास्तन ॥

ॐ नमो बिल्वतरवे सदा शंकररूपिणे ।
सफलानि ममाङ्गानि कुरुष्व शिवहर्षद ॥

एष पुष्पाञ्जलिः ॐ बिल्ववृक्षाय नमः ॥ ततः बिल्ववृक्षे ।

ॐ महारजतसंकाशां पूर्णचन्द्रनिभाननाम् ।
नानारत्नसमाकीर्णां कंकणैः कटकैरपि ॥
विभ्राजमानां दशभिर्बाहुभिः सुमनोहरैः ।
शरदंभोजसंकाशविकासि मुखपंकजम् ।
इन्दीवराभैर्विषमैर्लोचनैस्त्रिभिरुत्तमैः ।
विद्योतयन्तीं नयनैरुद्दामद्युतिदामभिः ।
त्रिशूलं करवालं च चक्रं बाणं च शक्त्यपि ।
चिन्तयेद्वामभागे तु खेटकं पूर्णचापकम् ।
पाशाङ्कुशञ्च परशुं ज्वालामालोपशोभिताम् ।
किञ्चिदूर्ध्ववामपादं माहिषोपरिसंस्थिताम् ।
माहिषं छिन्नशिरसमधस्तात्परिचिन्तयेत् ।
खड्गचर्मधरं तत्र समुद्भूतं महासुरम् ।
बिल्ववृक्षस्थितां ध्यायेत् सर्वकामार्थदायिनीम् ॥

एवं ध्यात्वा ॐ ह्रीं दक्षयज्ञे स्थायिनि दुर्गे रक्ष रक्ष । ॐ भूर्भुवः स्वर्भगवति श्रीदुर्गे इहागच्छ इह तिष्ठेत्यावाह्य ।

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा नमोऽस्तु ते ।।

एषोऽर्घः ॐ साङ्गसायुधसवाहनसपरिवारायै भूर्भुवःस्वर्भगवत्यै श्रीदुर्गादेव्यै नमः ।। इति पञ्चोपचारैः संपूज्य ।

ॐ सुत्रामाणं पृथिवीं द्यामनेहसꣳसुशर्माणमदितिꣳस्वस्तये ।
दैवीं नावꣳस्वरितामनागसमस्रवन्तीमारुहेम स्वस्तये ।।

इति वृक्षं स्थापयित्वा हरिद्रानिषिक्तत्रिगुणीकृतसूत्रेण दक्षिणावर्तेन बिल्ववृक्षं पञ्चधा वेष्टयेत् । ततः बिल्ववृक्षाग्रे ॐ वेतालाय नमः । ॐ मणिभद्राय नमः । ॐ यक्षकाय नमः । ॐ त्रिपुरान्तकाय नमः । ॐ करणाय नमः । ॐ हेतुकाय नमः । ॐ अग्निजिह्वाय नमः । इति गन्धपुष्पाक्षतैः पूजयेत् । वस्त्रं दत्वा पुष्पाञ्जलिमादाय ।

ॐ प्रार्थयामि महामाये पूजार्थं त्वां शुभाप्तये ।
देवकार्य्यहितार्थाय जगदम्ब नमोऽस्तु ते ।।
ॐ जगत्पूज्ये जगन्मातर्जगदानन्दहेतवे ।
बिल्ववृक्षेऽधिवासं च कुरुष्वाद्य नमोऽस्तु ते ।।
ॐ रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
विभूतिराज्यप्रतिपत्तिहेतोर्यथैव रामेण हतो दशास्यः ।
तथैव शत्रून् विनिपातयामि (तव प्रसादाज्जगदम्बिकेहम्) ।।
पल्लवैः श्रीफलोपेतैः शाखाभिः सुरनायिके ।
पल्लवे संस्थिते देवि पूजां गृह्ण सुरेश्वरि ।।
अशेषसुखलाभाय नानाविभवहेतवे ।
नेतव्यः श्वो दिने गेहे सर्वकामप्रदा भव ।।
धर्मार्थकाममोक्षाय वरदा भव शोभने ।
देवि चण्डाम्बिके चण्डि चण्डविग्रहकारिणि ।
विल्वशाखां समाश्रित्य तिष्ठ देवि यथासुखम् ।।

इति संप्रार्थ्य । अञ्जलिम्बध्वा ।

ॐ त्रैलोक्यनमिते देवि नमस्ते शंकरप्रिये ।
शक्रेण सम्बोध्य स्वराज्यमाप्तं तस्मादहं त्वां प्रतिबोधयामि ।।
ॐ एह्येहि भगवत्यम्बे विल्ववृक्षनिवासिनि ।
श्वोदिने वर्तते कार्य्यमतस्त्वां पूजयाम्यहम् ।।

इति प्रणमेत् । ततो विल्ववृक्षमामन्त्रयेदनेन ।

ॐ नमस्ते विल्ववृक्षाय सर्वकामप्रदाय च ।
दातव्यं श्वोदिने मह्यं पूजनीयं फलद्वयम् ॥
महादेवप्रियोऽसि त्वं श्रीवृक्षः सर्वकामदः ।
दुर्गायागनिमित्ताय शाखामेकां प्रयच्छ मे ।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ।
अहमद्याश्विने षष्ठ्यां सायाह्ने बोधयाम्यतः ॥
ॐ श्रीफलोऽसि महाभाग सदा त्वं शंकरप्रियः ।
चण्डिकारोपणार्थाय त्वामहं वरये प्रभो ।
ॐ देव देवप्रियं शुद्धं श्रीवृक्षं चण्डिकाप्रियम् ।
आमन्त्रयामि पूजार्थं विल्ववृक्ष नमोऽस्तु ते ॥

ॐ ऐं क्रें ख् स् ह ल् क्ष् क्लीं भगवति विल्ववृक्षस्थिते दुर्गे उत्तिष्ठोत्तिष्ठ निद्रां जहि २ प्रतिपद्यस्व मम शत्रून् हन २ पातय २ ह्रीं श्रीं खें फट् स्वाहा, इति बोधयित्वा स्तुतिं कुर्य्यात् ॥

ॐ मेरुमन्दरकैलासहिमवच्छिखरे गिरौ ।
जातः श्रीफलवृक्ष त्वमंबिकायाः सदा प्रियः ॥
श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः ।
नेतव्योऽसि महावृक्ष पूज्यो दुर्गास्वरूपकः ॥

इति विल्वतरुं स्पृष्ट्वा पठेत् ॥ पुनः ।

ॐ शिवपूजक मालूर प्रियस्पर्श महातरो ।
स्पृशामि त्वां महापापसंचयान्मे प्रणाशय ॥

इति मन्त्रेण फलद्वयसहितां विल्वशाखां स्पृशन् नवपत्रिकाम् (१) अधिवासयेदनेन ॥

ॐ पूजां कर्तुं महेशान्यास्त्वामहं चाधिवासये ।
मूले समागते ऋक्षे सप्तम्यामागमिष्यसि ॥
ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥

इति प्रणम्य नीराजनं कुर्य्यात् ॥

---

(१) रम्भा, कचुः, हरिद्रा, च जयन्ती विल्वदाडिमौ । अशोको माणकश्चैव धान्यादिर्नवपत्रिकाः । समूला पत्रिका ग्राह्या हरिद्रा धान्यकं विना ॥

(अथ सप्तमीकृत्यम्)

अथ सप्तम्यां प्रातःकाले कृतनित्यक्रियो यजमानः पूर्वदिनाभिमन्त्रितबिल्ववृक्षसमीपं गत्वा आचम्य बिल्ववृक्षं दुर्गां पञ्चोपचारैः संपूज्य कृताञ्जलिः प्रसादयेदनेन ।

ॐ वनस्पते नमस्तुभ्यं वृक्षराज शिवप्रिय ।
दुर्गासंप्रीतिकामोऽहं करोम्यर्चां तवाद्य मे ॥
ॐ बिल्ववृक्ष महाभाग सर्वदा शंकरप्रिय ।
गृहीत्वा तव शाखान्तु दुर्गापूजां करोम्यहम् ॥
शाखाच्छेदोद्भवं दुःखं नच कार्य्यं त्वया प्रभो ।
देवैर्गृहीत्वा शाखां ते पूजिताश्चेति विश्रुतिः ॥
पुत्रायुर्धनवृध्यर्थं नेष्यामि त्वामुमाप्रियाम् ।
बिल्वशाखां समाश्रित्य राज्यं देवि प्रयच्छ मे ॥
ॐ आगच्छ चण्डिके देवि सर्वकल्याणहेतवे ।
कात्यायनि गृहणार्चां नमस्ते शङ्करप्रिये ॥

इति प्रसाद्य । ॐ छिन्धि छिन्धि फट् ह्रीँ स्वाहा । ॐ दुर्गे दुर्गे रक्षिणि स्वाहा इति मन्त्रद्वयेनैकच्छेदेन स्त्रीपशुदृष्टिगोचररहितं वायुनैर्ऋत्यकोणेतरफलद्वय-(१) सहितां बिल्वशाखामानीय वाद्यादिकं कारयित्वा नवपत्रिकासहितां बिल्वशाखां श्वेतापराजितालतया हरिद्रारञ्जितनूतनवस्त्रेण वेष्टयित्वा शिविकोपरि दत्वा उन्मादपातित्यक्लैव्यादीक्षितत्वादि (२) दोषरहितसुब्राह्मणद्वारानीय दुर्गापूजनगृहप्रांगणे पीठोपरि स्थापयित्वा,

---

(१) माहेन्द्रस्थं च ईशस्थं ब्राह्मणस्य प्रशस्यते । ऊर्ध्वस्थमुत्तरस्थं च क्षत्रियस्य वरानने । वायव्यस्थं च वैश्यस्य शूद्रस्य च वरानने । माहेन्द्रस्थं तथेशस्थं सर्वेषामथवा प्रिये । समं वृत्तं समं स्थूलं शस्तं कीटादिदूषितम् । न ग्राह्यं परमेशानि कदाचिदूर्ध्वमध्यमम् । स्नानस्थाने नीयमानेच्युते गुल्मे महेश्वरि । मृण्मय्यां च च्युतिर्यत्र जायते मरणं ध्रुवम् ॥ इतिमत्स्यसूक्ते । (२) स्त्रीणां दृष्टिः पशोर्दृष्टिर्यथा नैव तु छेदने । तथा कुर्य्यात् प्रयत्नेन शिविकायां प्रवेशयेत् ॥ उन्मत्तं पतितं क्लीवं वामनं छिद्रसंयुतम् । न योजयेद्दरिद्रञ्च मन्त्रहीनं न वेशयेत् ॥ छेदने, नयने, काले, स्थापने च विशेषतः । भग्ने तु मरणं विद्यात् प्रायश्चित्तं तथा चरेत् ॥ (प्राणतोषिण्याम्)

ॐ परिधत्त धत्त वाससैना७ंशतायुषीं कृणत दीर्घमायुः ।
शतं च जीव शरदः सुवर्चा वसूनि चार्ये विभृतासि जीवन् ।।

अनेन वस्त्रं सिन्दूरं च दत्वा ॐ बिल्वशाखायै नमः। इति पञ्चोपचारैः संपूज्य पूर्वोक्ताष्टशाखासहितबिल्वशाखायां ॐ साङ्गेत्यादि दुर्गायै नमः। इति पञ्चोपचारैः संपूज्य। गोमयेन कृतमण्डले पूर्वोक्तक्रमेणैव भूतानि संपूज्य माषभक्तबलिं दत्वा ।। श्वेतसर्षपयवपुष्पाणि चतुर्दिक्षु विकीर्य्य भूतानि अपसारयेत् ।। पुनर्बिल्वशाखायां ॐ चामुण्डायै नमः। इति पञ्चोपचारैः संपूज्य देव्याः आसनं (नवपत्रिकासहितबिल्वशाखाधारपीठं) धृत्वा ॐ चामुण्डे चल चल इति चालयित्वा पञ्चगव्येन स्नापयित्वा संस्कृत्य ततो द्वारपूजामारभेत्। ॐ अस्त्राय फट् इति द्वारं संप्रोक्ष्य नवपत्रिकासहितबिल्वशाखायाः ऊर्ध्वभागे। ॐ विष्णो इहागच्छ इह तिष्ठेत्यावाह्य। ॐ विष्णवे नमः। एवं पञ्चोपचारैः पूजयेत् ।। ॐ महालक्ष्मि इहागच्छ ॐ महालक्ष्म्यै नमः। ॐ सरस्वति इहागच्छ। ॐ सरस्वत्यै नमः। दक्षिणशाखायाम्। ॐ विघ्नेश इहागच्छ इह तिष्ठेत्यावाह्य। ॐ विघ्नेशाय नमः। ॐ गंगे इहागच्छ। ॐ गंगायै नमः। वामशाखायाम्। ॐ क्षेत्रेश इहागच्छ इह तिष्ठ। ॐ क्षेत्रेशाय नमः। ॐ यमुने इहागच्छ ॐ यमुनायै नमः। ॐ वास्त्वीश इहागच्छ। ॐ वास्त्वीशाय नमः ।। ॐ अस्त्राय फट् इति देहल्यै नमः। एवं संपूज्य ।। ततः कदल्यादिनवपत्रिकासहितां बिल्वशाखां प्रतिमाञ्च गीतवाद्यादिना प्रवेशयेदनेन ।। ॐ चामुण्डे चल चल चालय चालय दुर्गे पूजालयं प्रविश तिष्ठ ॐ दुर्गे २ रक्षिणी स्वाहा।

ॐ प्रविश्य तिष्ठ यज्ञेऽस्मिन् यावत्पूजां करोम्यहम् ।।
पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये ।।
ॐ आगच्छ मद्गृहे देवि सर्वकल्याणहेतवे।
बलिं पूजां यथा शक्त्या गृहाण दाक्षि चण्डिके ।।
ॐ आगच्छ मद्गृहे देवि अष्टाभिः शक्तिभिः सह।
पूजाभागं गृहाणेमं सान्निध्यमिह कल्पय ।।
ॐ त्वं परा परमा शक्तिः त्वमेव हरवल्लभा।

त्रैलोक्योद्धारहेतुस्त्वमवतीर्णा युगे युगे ॥
ॐ आरोपितासि दुर्गे त्वं मृण्मये श्रीफलेऽपि च ।
स्थिरा नितान्तं भूत्वा मे गृहे त्वं कामदा भव ॥

इति संचाल्य ॐ ऐँ ह्रीँ क्लीँ स्थाँ स्थीँ त्वमम्बिके स्थिरा भव ॥ इति पूजास्थाने पीठोपरि स्थिरीकृत्य । देव्याः दक्षिणदिशि नवपत्रिकां संस्थापयेत् ॥ ततः शुभे लग्ने बिल्वपत्रे घृतेन कज्जलं विधाय बद्धाञ्जलिः पठेत् ।

ॐ इदं नेत्रत्रयं दिव्यं चन्द्रसूर्यानलप्रभम् ।
ताराकारमयं देवि पश्य त्वं भुवनत्रयम् ॥

ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे ।
ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षꣳसूर्य आत्मा जगतस्तस्थुषश्च ।

ततः कज्जलेन तत्तद्देवताया गायत्रीपाठपूर्वकं, यथा ऊर्ध्वनेत्रे ॐ चण्डिकायै विद्महे भगवत्यै धीमहि तन्नो दुर्गा प्रचोदयात् ॥ इति मन्त्रेण चक्षुर्दानं कारयेत् । ततः दक्षिणनेत्रे । ततो वामनेत्रे । ततः कूष्माण्डबलिं दत्वा पूजामारभेत् ॥ तत्र क्रमः । कुशादिकमादाय ॐ अद्याश्विने मासि शुक्ले पक्षे महासप्तम्यां तिथौ अमुकगोत्रस्यामुकशर्मणः सपरिवारस्योपस्थितशरीराविरोधेन महाभयाभावपूर्वकविपुलधनधान्यसुतान्वितातुलविभूतिचतुर्वर्गफलप्राप्तिपूर्वकश्रीदुर्गाप्रीतिकामः साङ्गसायुधसवाहनवसपरिवारायाः भगवत्याः श्रीदुर्गादेव्याः वार्षिकशरत्कालीनपूजनमहं करिष्ये । ॐ संकल्पार्थाः सिद्धयः सन्तु मनोरथाः । इति संकल्प्य । कुशपुष्पाक्षतमादाय देव्या हृदये अनामिकांगुष्ठाभ्याम् ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳसमिमन्दधातु । विश्वदेवास इह मादयन्तामोंप्रतिष्ठ ॐ साङ्गसायुधसवाहनसपरिवारभूर्भुवःस्वर्भगवतिश्रीदुर्गेदेवि इह सुप्रतिष्ठिता भव ॥ ॐ अस्य प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्राऋषयः ऋग्यजुःसामाथर्वणच्छन्दांसि प्राणशक्तिर्देवता ह्रीँ हुँ आँ वीँ क्रौँ ह्रीँ शक्तिः क्रौँ कीलकं जगत्सृष्टिकारिणी नवपत्रिकासहितश्रीनवचण्डिकाख्यदुर्गादेव्याः प्राणप्रतिष्ठायां विनियोगः । ॐ आँ ह्रीँ हूँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हाँ ॐ अँ सँ हँ सः ह्रीँ हँ सः

साङ्गसायुधसवाहनसपरिवारायाः श्रीदुर्गादेव्याः प्राणाः इह प्राणाः। पुनः. ॐ आँ ह्रीँ हूँ क्रौँ यँ रँ लँ वँ शँ षँ सँ होँ ॐ क्षँ सँ हँ सः ह्रीँ ॐ हँ सः साङ्गेत्यादि श्रीदुर्गादेव्याः जीव इह स्थितः। ॐ आँ ह्रीँ हूँ क्रौँ यँ रँ लँ वँ शँ षँ सँ होँ ॐ क्षँ सँ हँ सः ह्रीँ ॐ हँ सः साङ्गेत्यादि श्रीदुर्गादेव्याः सर्वेन्द्रियाणि वाङ्मनःत्वक्चक्षुःश्रोत्र-जिह्वाघ्राणप्राणा इहागत्य चिरं सुखं तिष्ठन्तु स्वाहा ।। इति देव्याः प्राणप्रतिष्ठां कृत्वा आवाहयेत्। एवं सर्वासु प्रतिमासु प्राणप्रतिष्ठा ज्ञातव्या ।। ततः पुष्पमादाय ।।

ॐ आवाहयाम्यहं देवीं मृण्मये श्रीफलेऽपि च।
आयुरारोग्यमैश्वर्य्यं देहि देवि नमोऽस्तु ते ।।
ॐ कैलासशिखराद्देवि विन्ध्याद्रेः हिमपर्वतात् ।।
आगत्य बिल्वशाखायां मृण्मये कुरु सन्निधिम् ।।
ॐ दुर्गे देवि इहागच्छ सान्निध्यमिह कल्पय।
यज्ञभागं गृहाणेमं योगिनीकोटिभिः सह ।।

ॐ ऐँ ह्रीँ क्लीँ चामुण्डे दक्षयज्ञविनाशिनि साङ्गसायुध-सवाहनसपरिवार श्रीदुर्गे देवि इहागच्छ इह तिष्ठेति स्थापयित्वा कृताञ्जलिः पठेत् ।।

ॐ एह्येहि भगवत्यम्बे शत्रुक्षयजयप्रदे।
भक्तितः पूजयामि त्वां दुर्गे देवि सुरार्चिते।
पल्लवैश्च फलोपेतैः पुष्पैश्च सुमनोहरैः।
पल्लवे संस्थिते देवि पूजये त्वां प्रसीद मे ।।
ॐ दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय।
यज्ञभागं गृहाणेममष्टाभिः शक्तिभिः सह ।।
ॐ आयाहि वरदे देवि लोकानुग्रहकारिणि।
यज्ञभागं गृहाणेमं यन्मया परिकल्पितम्।
ॐ दुर्गे देवि जगन्मातः सृष्टिसंहारकारिणि।
पत्रिकासु समस्तासु सान्निध्यमिह कल्पय ।।
शारदीयामिमां पूजां करोमि कमलेक्षणे।
आज्ञापय महादेवि दैत्यदर्पविनाशिनि ।।
संसारार्णवदुष्पारे सर्वभारनिकृन्तने।
त्रायस्व वरदे देवि नमस्ते शंकरप्रिये ।।

ॐ ये देवाः याश्च देव्यश्च चलिता याश्चलन्ति ये ।
आवाहयामि तान् सर्वान् चण्डिके परमेश्वरि ।।
प्राणान् रक्ष यशो रक्ष पुत्रदारधनं सदा ।
सर्वरक्षाकरी यस्मात् त्वं हि देवि जगत्प्रिये ।
प्रविश्य तिष्ठ यज्ञेऽस्मिन् यावत्पूजां करोम्यहम् ।
ममानन्दकरे देवि सर्वसिद्धिं च देहि मे ।।
ॐ आगच्छ चण्डिके देवि सर्वकल्याणहेतवे ।
पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये ।
आवाहयामि देवि त्वां मृण्मये श्रीफलेऽपि च ।
कैलाशशिखराद्देवि विन्ध्याद्रेः हिमपर्वतात् ।
आगच्छ बिल्वशाखायां चण्डिके कुरु सन्निधिम् ।।
स्थापितासि मया देवि पूजये त्वां प्रसीद मे ।।
त्वमेव जगतां मातः चतुर्वर्गफलप्रदे ।।
आयुरारोग्यमैश्वर्य्यं देहि देवि नमोऽस्तु ते ।।
देवि चण्डाम्बिके चण्डि चण्डविग्रहकारिणि ।
बिल्वशाखां समाश्रित्य तिष्ठ यज्ञे सुरेश्वरि ।।
ॐ देवि त्वं जगतांमातः सृष्टिसंहारकारिणि ।
पत्रिकासु समस्तासु सान्निध्यमिह कल्पय ।।
ॐ चण्डि त्वं चण्डरूपासि सुरतेजोमहाबले ।
प्रविश्य तिष्ठ यज्ञेऽस्मिन् यावत्पूजां करोम्यहम् ।।

इति आवाह्य । ततो देवीं ध्यायेत् । यथा ।।

ॐ जटाजूट समायुक्तामर्धेन्दुकृतशेखराम् ।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम् ।।
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसम्पन्नां सर्वाभरणभूषिताम् ।
सुचारुदशनां तद्वत्पीनोन्नतपयोधराम् ।।
त्रिभंगस्थानसंस्थानां महिषासुरमर्दिनीम् ।।
कपालं खेटकं घंटां दर्पणं तर्जनीं धनुः ।
ध्वजं डमरुकं पाशं वामहस्तेषु बिभ्रतीम् ।
शक्तिं च मुद्गरं शूलं खड्गं वज्राङ्कुशं तथा ।।
शंखं चक्रं शरश्चैव दक्षिणेषु च बिभ्रतीम ।।

अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् ।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ।।
हृदि शूलेन निर्भिन्नं निर्गतं तु विभूषितम् ।
रक्तरक्तीकृताङ्गञ्च रक्तविस्फारितेक्षणम् ।
वेष्टितं नागपाशेन भ्रकुटीकुटिलाननम् ।
सपाशवामहस्तेन धृतकेशञ्च दुर्गया ।
वमद्रुधिरवक्त्रं च देव्याः सिंहं प्रदर्शयेत् ।
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम् ।
किञ्चिदूर्ध्वं तथा वाममङ्गुष्ठं महिषोपरि ।।
स्तूयमानं च तद्रूपममरैः सन्निवेशयेत् ।।
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चण्डरूपातिचण्डिका ।
आभिःशक्तिभिरष्टाभिः सततं परिवेष्टिताम् ।
चिन्तयेत् सततं दुर्गां धर्मकामार्थमोक्षदाम् ।।

इदं ध्यानपुष्पं साङ्गत्यादि श्रीदुर्गायै नमः ★ ।। ततः स्वागतम्, अभिमुखीकरणम्, आसनम्, उद्वर्तनम् पाद्यम्, अर्घ्यम्, स्नानीयम्, आचमनीयम्, श्रीखण्डचन्दनम्, रक्तचन्दनम्, अक्षतम्, सिन्दूरं, पुष्पमालां धूपं, दीपं, बिल्वपत्रम् नैवेद्यादिकं, कज्जलं, व्यजनं, चामरं, घंटावाद्यम् सर्वं पूर्वोक्तप्रथमदिनकलशस्थप्रधानश्रीदुर्गापूजायाः प्रत्येकं तत्तन्मन्त्रोच्चारणपूर्वकं दद्यात् ।

(ततो नवपत्रिकासु पूजामारमेत्)

तत्र संकल्पं कुर्य्यात् । कुशत्रयतिलजलान्यादाय ॐ तत्सत् अद्याश्विने मासि शुक्ले पक्षे महासप्तम्यां तिथौ अमुकगोत्रस्यामुकशर्म्मणो मम सप्तजन्मार्जितपापक्षयपूर्वक निखिलविभवप्राप्तिकामः

★ ॐ देवेशि भक्तिसुलभे परिवारसमन्विते । यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव । ॐ तवेयं महिमांमूर्तिस्तस्यां त्वां सर्वगां प्रभो । भक्तिस्नेहसमाकृष्टां दीपवत्स्थापयाम्यहम् ।। इति

D प्रसारितसंहतांगुलीमूलपर्वणोरंगुष्ठौ निक्षिप्य आवाहयेत् । इति ॐ आवाहिता भव । आसनं दत्त्वा ॐ अस्मिन् वरासने देवि सुखासीनेऽक्षरात्मिके । प्रतिष्ठिता भवेः सा त्वं प्रसीद परमेश्वरि । इह सुप्रतिष्ठिता भव । ॐ अनन्या

श्रीनवपत्रिकासहितां श्रीदुर्गां स्नापयिष्ये ॥ इति संकल्प्य । ॐ ह्रीं दुर्गायै नमः । इति पञ्च पुष्पाञ्जलिं दत्वा भृंगारस्थतत्तत्तीर्थोदकेन स्नापयेत् ।

ॐ आत्रेयी भारती गंगा यमुना च सरस्वती ।
सरयू गंडकी श्वेता कावेरो कौशिकी तथा ॥
भोगवती च पाताले स्वर्गे मन्दाकिनी तथा ।
एताः सुमनसो भूत्वा भृंगारैः स्नापयन्तु ते ।
ॐ दुर्गा चण्डेश्वरी चण्डी वाराही कार्तिकी तथा ।
नारसिंही तथा काली इन्द्राणी वैष्णवी तथा ॥
भद्रकाली विशालाक्षी भैरवी सर्वरूपिणी ।
एताः सुमनसो भूत्वा भृङ्गारैः स्नापयन्तु ते ॥
ॐ सिन्धुभैरवशोणाश्च ये ह्रदा भुवि विश्रुताः ।
सर्वे सुमनसो भूत्वा भृंगारैः स्नापयन्तु ते ॥
ॐ तक्षकाद्याश्च ये नागाः पातालतलवासिनः ।
सर्वे सुमनसो भूत्वा भृंगारैः स्नापयन्तु ते ॥
ॐ ग्रहाः ऋक्षास्तथा नागाः करणास्तिथयस्तथा ।
ऋषयो देवपुत्राश्च ये चान्ये देवयोनयः ।
सर्वे सुमनसो भूत्वा भृंगारैः स्नापयन्तु ते ॥

इति भृंगारस्थसुवासितजलेन ॥

ॐ लवणेक्षुरसासर्पिर्दधिदुग्धजलान्तकाः ।
समुद्राः सप्त चैवान्ये भृङ्गारैः स्नापयन्तु ते ॥

ॐ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
आग्नीयागर्भं दधिरे विरूपास्ता आपः शꣳस्योना भवन्तु ॥

तत्र देवेशि मूर्तिशक्तिरियं प्रभोः । सान्निध्यं कुरु तस्यां त्वं भक्तानुग्रहतत्परे ॥ ॐ इह सन्निधेहि । ॐ आज्ञया तव देवेशि कृपांभोधे गुणांबुधे आत्मना । वैकदृप्तां त्वां संरुणद्धि महेश्वरि ॥ इति सन्निधत्स्व । ॐ अज्ञानाद्दुर्मनस्त्वाद्वा वैकल्यात्साधकस्य च । मम ऊनं भवेत्कृत्यं तदद्याभिमुखीभव । इह सम्मुखीभव ॥ ॐ दशपियूषवर्षिण्या पूरयेद्यज्ञविष्टरम् । मूर्तौ हि यज्ञसंपूर्तौ स्थिरा भव महेश्वरि । ततः अमृतकरणम् धेनुमुद्रया मूर्तौ यन्त्रे वा ॐ स्वभक्तवाङ्मनश्चक्षुःश्रोत्रदूरार्पितस्थिते । स्वतेजःपञ्जरेणाशु वेष्टिता भव सर्वतः ॥

इति समुद्रजलेन ॥

ॐ अनन्तादिमहानागा दानवा राक्षसाश्च ये ।
पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ।
जलेचराः भूमिचराः वायकाश्चरजन्तवः ।
सर्वे सुमनसो भूत्वा भृङ्गारैः स्नापयन्तु ते ॥

इति विशेषार्घ्योदकेन ॥

ॐ जगत्पूज्ये त्रिलोकेशे सर्वदानवभंजिनि ।
अष्टांगार्घ्यं गृहाण त्वं देवि विश्वार्तिहारिणि ॥
ॐ कुरुक्षेत्रं प्रयागं च वटश्चाक्षयसंज्ञकः ।
गोदावरी वियद्गंगा नर्मदा मणिकर्णिका ।
सर्वाण्येतानि तीर्थानि भृंगारैः स्नापयन्तु ते ॥

इति प्रयागोदकेन ।

ॐ मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् ।
स्वर्गस्रोतःसमुद्भूतं स्नानं भवतु तेन ते ॥

इति गंगाजलेन ।

(अष्टकलशैः स्नानम्)

ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तया चार्जीकीये शृणु ह्याशुषो मया ॥

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
व्योमगंगाम्बुपूर्णेन आद्येन कलशेन तु ॥

इति गंगाजलपूरितघटेन ।

ॐ मरुतस्त्वामभिषिञ्चन्तु भक्तिमन्तः सुरेश्वरि ।
मेघाम्बुपरिपूर्णेन द्वितीयकलशेन तु ॥

इति वृष्टिपूरितघटेन ।

ॐ सारस्वतेन तोयेन संपूर्णेन सुरोत्तमे ॥
विद्याधराश्चाभिषिञ्चन्तु तृतीयकलशेन तु ॥
ॐ महो अर्णः सरस्वती प्रचेतयतु केतुना ।
धियो विश्वा विराजति ॥

इति सरस्वतीजलपूर्णघटेन ।

ॐ शक्राद्याश्चाभिषिञ्चन्तु लोकपालाः समागताः ।
सागरोदकपूर्णेन चतुर्थकलशेन तु ॥

इति सागरोदकपूरितघटेन ।

ॐ वारिणा परिपूर्णेन पद्मरेणुसुगन्धिना ।
पञ्चमेनाभिषिञ्चन्तु नागाश्च कलशेन तु ॥

इति पद्मरजोमिश्रितजलपूर्णघटेन ॥

ॐ हिमवद्धेमकूटाद्यास्त्वामभिषिञ्चन्तु पर्वताः ।
निर्झरोदकपूर्णेन षष्ठेन कलशेन च ॥

इति निर्झरोदकपूरितघटेन ।

सर्वतीर्थाम्बुपूर्णेन कलशेन सुरेश्वरीम् ।
सप्तमेनाभिषिञ्चन्तु ऋषयः सतप्तखेचराः ॥

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥

इति सर्वतीर्थोदकपूरितघटेन ॥

ॐ वसवस्त्वामभिषिञ्चन्तु कलशेनाष्टमेन तु ।
अष्टमंगलसंयुक्ते दुर्गे देवि नमोऽस्तु ते ॥

इति शीतलजलपूरितघटेन ।

ॐ गंगा गोदावरी रेवा पयोस्नी यमुना तथा ।
सरस्वत्यादितीर्थानि स्नानार्थं परिगृह्यताम् ॥

इति यमुनोदकेन ।

ॐ आत्रेयी भारती गंगा करतोया सरस्वती ।
सरयूर्गण्डकी चापि श्वेतगंगा च कौशिकी ॥
भोगवती च पाताले स्वर्गे मन्दाकिनी तथा ।
एताश्चान्याश्च या नद्यो भृंगारैः स्नापयन्तु ते ॥

इति कौशिकीजलेन ॥

ॐ सीता चालकनन्दान्यचक्षर्भद्रा दृषद्वती ।
तुङ्गभद्रा कृष्णवर्णा पयोष्णी नर्मदा तथा ॥

तापी भागीरथी सिप्रा वितस्तैरावती तथा ।
गोदावरी विपाशा च शुतद्रुः सिन्धुरेव च ।
चर्मण्वती च कावेरी ताम्रपर्णी महानदी ।
करतोया वाहुदा च भृंगारैः स्नापयन्तु ते ॥

इति सरोवरोदकेन ।

ॐ सागराः सरितः सर्वाः स्वर्गश्रोतोनदस्तथा ।
तिस्रः कोठचोऽर्द्ध कोटचश्च तीर्थानि जलदा नदाः ।
कूपाः सरः प्रस्रवणाः देवखाताः सगर्तकाः ॥
कुल्याश्च निर्भरीवाप्यो यावन्तश्च जलाशयाः ।
अभिषिञ्चन्तु सर्वे त्वां मन्त्रपाठवशीकृताः ॥
आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ।
विश्वᳪहिरिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतएमि ॥

इति सहस्रधाराजलेन ।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसे त्वामभिषिञ्चामि ॥

इति कुशोदकेन ।

ॐ तापशान्तकरी सीता मधुरास्वादसंयुता ।
स्नानार्थं देवदेवेशि शर्करेयं प्रदीयते ॥

इति शर्करोदकेन ।

ॐ सरस्वत्यै भैषज्येन वीर्य्यायान्नाद्यायाभिषिञ्चामि ।
इन्द्रस्येन्द्रियेण बलायश्रिये यक्षसेऽभिषिञ्चामि ॥

इति पुष्पोदकेन ।

ॐ या फलिनी जगन्मध्ये विश्वेशी सर्वमंगला ।
फलोदकेन तां देवीं स्नापयामि महेश्वरीम् ॥

इति फलोदकेन ।

ॐ उष्णं सुखस्पर्शकरं ज्योतिर्बाहूसमन्वितम् ।
मलापहारकं कल्पं तेन स्नानं समाचर ॥

इति उष्णोदकेन ।

ॐ गन्धाढ्यं शोभनं चैव शीतलं सुमनोहरम् ।
सर्वपापहरं तोयं तत्ते स्नानाय कल्प्यताम् ।।
ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।

इति गन्धोदकेन ।

ॐ पुण्यं पवित्रं स्वच्छं च शीतलं स्वादु यज्जलम् ।
स्नानाय कल्प्यतां तत्ते तथैव श्रमशान्तये ।।

इति शीतलजलेन ।

ॐ गवां मूत्रेण पुण्येन सर्वाघपरिमोषिणा ।
स्नापयामि महादेवीं पुत्रायुर्धनवृद्धये ।।

ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् । होतारᳬ रत्न-धातमम् ।

इति गोमूत्रेण ।

ॐ पवित्रताकरं भूमेः विभूतेः कारणं परम् ।
गोमाय सर्वपापघ्नं तेन त्वां स्नारयाम्यहम् ।।

इति गोमयोदकेन ।

ॐ कर्पूरागुरुकस्तूरीकुंकुमाक्तेन वारिणा ।
शीतलेन महादेवि सर्वांगं स्नापयामि ते ।।

इति कर्पूरजलेन ।

ॐ यद्गवा संगसंभूतं हविषः कारणं हि यत् ।।
दधि तत्तेऽङ्गलावण्यकारणाय भवत्विदम् ।।
दुर्लभं देवि सुस्वादु दधि सर्वप्रियं परम् ।
पुष्टिदं परमं देव्याः स्नानाय प्रतिगृह्यताम् ।।
ॐ दधिक्राव्णोऽकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभिनो मुखाकरत् प्र ण आयूᳬषि तारिषत् ।।

इति दधिघटेन ।

ॐ यद्धोमसाधनत्वेन प्रथितं निगमादिषु ।
यश्चाप्यग्निमुखेनैव भुञ्जन्ते निखिलाः सुराः ।।
यस्मात्पवित्रं नैवास्ति बलवीर्य्यकरं च यत् ।
तेन त्वां स्नापयाम्यद्य गव्येन हविषेश्वरीम् ।
घृतं गव्यं शुचि स्निग्धं सुसेव्यं पुष्टिमिच्छताम् ।।
गृहाण गिरिजे तुभ्यं स्नानाय परमेश्वरि ।

ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ।

दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ।।

इति घृतघटेन ।

ॐ गव्यं क्षीरं दधि घृतं शर्कराक्षौद्रसंयुतम् ।
पञ्चामृतं यदेतच्च तेन त्वां स्नापयाम्यहम् ।।

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ।।

इति पञ्चामृतघटेन ।

ॐ सर्वदा सर्वपापघ्नि अरिष्टानां विघातिके ।
सर्वौषधिजलेनाद्य स्नापयामि सुरेश्वरीम् ।।
ॐ या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।
तासामसि त्वमुत्तमार कामायशꣳहृदे ।।

इति महौषधिजलेन ।।

ॐ जम्बुशाल्मलिवाटचालं वकुलं वदरं तथा ।।
एतन्मिश्रिततोयेन स्नापयामि सुशोभने ।।

इति पञ्चकाषायजलेन ।

ॐ यवगोधूममुद्गाश्च तिलश्च धान्यमेव च ।
एतत्तोयेन देवेशि स्नापयामि प्रसीद मे ।।

इति पञ्चशस्योदकजलेन ।।

ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ।।

इति दूर्वोदकेन ।

ॐ एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः । स्तुषे वामश्विना बृहत् ॥

इति अक्षतोदकेन ।

ॐ मधुरं मृदु मोहघ्नं स्वरभंगविनाशनम् ।
महादेवोदमुत्सृष्टं तव स्नानाय शंकरि ॥

ॐ मधुव्वाता रितायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः मधुनक्तमुतोषसो मधुमत्पार्थिवँ रजः मधुद्यौरस्तु नः पिता मधुमान्नो वनस्पतिः मधुमाँऽअस्तु सूर्य्यः । माध्वीर्गावो भवन्तु नः ॥

इति मधुनोदकेन ।

ॐ नानारूपधरे देवि दिव्यवस्त्रावगुंठिते ।
तवानुलेपमात्रेण चित्तदोषो विनश्यति ॥
ॐ उद्वर्तयामि देवि त्वां यथेष्टं चन्दनादिभिः ।
उद्वर्तनप्रदानेन प्राप्नुयां श्रियमुत्तमाम् ॥

इति तैलयुक्तजलेन ।

ॐ महादेवि महादेवि जगतां हितकारिके ।
रौप्योदकेन देवि त्वां स्नापयामि सुरोत्तमे ॥

इति रौप्योदकेन । ॐ स्वर्णघर्मः स्वाहा । स्वर्णार्कः स्वाहा । स्वर्णशुक्रः स्वाहा । स्वर्णज्योतिः स्वाहा ।

पृथिव्यां स्वर्णरूपेण वर्तते या महेश्वरी ।
स्वर्णोदकेन तान्देवीं स्नापयामि सुरेश्वरीम् ॥

इति स्वर्णोदकेन ।

असौ यस्ताम्रोऽअरुण उत बभ्रुः सुमङ्गलः । ये चैनँ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोवैषाँ हेडईमहे ॥

इति ताम्रोदकेन ।

ॐ यस्मात्परं नापरमस्ति मध्यं देहे गतं यद्वृजिनं निहन्ति ॥
नान्यत्परं हृदयमतस्तदेतत्स्नानाय भूयात्तव पञ्चगव्यम् ॥

ॐ गावः पवित्रा ह्यनघा गावो विश्वस्य मातरः।
गावोऽध्वराणां धात्र्यश्च गोषु सर्वं प्रतिष्ठितम् ॥

इति पञ्चगव्योदकेन ।

यज्ञक्रियाकलापोऽयं सर्वो यस्मिन् प्रतिष्ठितः ।
पयसा तादृशेन त्वां स्नापयामि हरिप्रियाम् ॥
मधुरं गोपयः पुण्यं परिपूतं परिष्कृतम् ।
स्नानार्थं देवदेवेशि गृहाण परमेश्वरि ॥

ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ॥

इति दुग्धघटेन ।

ॐ पुण्यस्त्वं शंख पुण्यानां मङ्गलानाञ्च मङ्गलः ।
विष्णुना विधृतो नित्यं महाशान्ति प्रयच्छ मे ॥

इति शंखोदकेन ।

ॐ रसोत्तमेन विश्वाद्ये मधुरेण मधुप्रिये ।
इक्षूरसेन दुर्गे त्वां स्नापयामि शुभाप्तये ॥

ॐ नारायण्यै विद्महे भगवत्यै धीमहि । तन्नो गौरी प्रचोदयात् ॥

ऐं ह्रीं क्लीं चामुण्डायै विच्चे । इति इक्षुरसोदकेन । ॐ ह्रीं कौमार्य्यै नमः । इति गजदन्तमृत्तिकया । ॐ ह्रीं चण्डिकायै नमः । इति वराहदन्तमृत्तिकया । ॐ ह्रीं कात्यायन्यै नमः । इति वैश्यद्वारमृत्तिकया ॥ ॐ ह्रीं चामुण्डायै नमः ॥ इति वृष-शृङ्गमृत्तिकया । ॐ ह्रीं दुर्गायै नमः । इति वल्मीकमृत्तिकया ॥ ॐ ह्रीं माहेश्वर्य्यै नमः ॥ इति नदमृत्तिकया ॥ ॐ ह्रीं शिवायै नमः । इति नदीमृत्तिकया ॥ ॐ ह्रीं चण्डेश्वर्य्यै नमः ॥ इति नद्युभयकूलमृत्तिकया ॥ ॐ ह्रीं कात्यायन्यै नमः ॥ इति सागर-मृत्तिकया ॥ ॐ ह्रीं कौशिक्यै नमः । इति चतुष्पथमृत्तिकया ॥ ॐ ह्रीं कपालिन्यै नमः ॥ इति गंगामृत्तिकया ॥ ॐ ह्रीं इन्द्राण्यै नमः ॥ इति गोष्ठमृत्तिकया ॥ ॐ ह्रीं चण्डिकायै नमः । इति गोरोचनया ॥ ॐ ह्रीं दुर्गायै नमः ॥ इति नदीसंगमजलेन ॥

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥

प्रद्युम्नश्चानिरुद्धश्च भैरवाद्यास्तथैव च ।
ख्याता ये द्वादशादित्याः रुद्रा एकादशास्तथा ।
मरुतश्चोनपञ्चाशद् वसवोऽष्टर्तवश्च षट् ॥
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहिताः शेषा दिक्पालाः स्नापयन्त्वमी ॥
ॐ एतोन्विन्द्रᳪस्तवाम शुद्धᳪ शुद्धेन साम्ना ।
शुद्धैरुक्थैर्वावृध्वाᳪसᳪशुद्धैराशिर्वान्ममत्तु ॥

इति शुद्धोदकेन ॥

ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
स्नापयामि शिवे भक्त्या नारिकेलोदकेन च ॥

इति नारिकेलोदकेन ॥ एतैर्मन्त्रैः *स्नापयित्वा प्रत्येकं स्नापयेत् पूजयेच्च । तद्यथा । कदल्याम् । ॐ ह्रीँ ब्रह्माणि इहागच्छ इह तिष्ठेत्यावाह्य । स्नापयेदनेन ।

ॐ कदलीतरुसंस्थासि शंभुवक्षःस्थलस्थिते ।
स्नापयाम्यद्य पत्रि त्वां नमस्ते हरवल्लभे ॥

इति स्नापयित्वा ॐ ह्रीँ ब्रह्माण्यै नमः । इति पञ्चोपचारैः पूजयेत् । ततः पुष्पाञ्जलिमादाय ।

ॐ ब्रह्माणि त्वं समागच्छ सान्निध्यमिह कल्पय ।
रंभास्वरूपे मे नित्यं शान्तिं कुरु नमोऽस्तु ते ॥

---

* इत्युक्तं ते महास्नानं शरदर्चाविधौ प्रिये । शक्तौ दिनत्रयं कुर्यादशक्तौ तु दिनद्वयम् । सर्वाभावे नवम्यां तु स्नानमावश्यकं मतम् । दिनान्तरेऽपि कुर्वीत भक्तश्चेद्भक्तिभावितः ॥ नवम्यां तु महास्नानं धनपुत्रविवर्धनम् । सहस्रयज्ञस्य फलं लभते नात्र संशयः । राजा राज्यमवाप्नोति शत्रुनाशस्तथैव च ॥ स्वाभीष्टमाप्नुवन्त्यन्ये महास्नानेन पार्वती । (महाकालसंहितायाम्) रम्भां च द्विभुजां पीतां शूलपुस्तकधारिणीम् । ध्यात्वैवं पूजयेद्दुर्गां सर्वकामार्थदायिनीम् । दाडिमीपत्रिकां रक्तां रक्ताभरणभूषिताम् । रक्तवस्त्रधरां सौम्यामर्धेन्दुकृतशेखराम् । चतुर्भुजां त्रिनयनां महिषोपरिसंस्थिताम् । खड्गचर्मधरां स्कन्धे वामेनोत्पलपुस्तिकाम् ॥

एष पुष्पाञ्जलिः रंभाधिष्ठात्र्यै ॐ ह्रीँ ब्रह्माण्यै **नमः**। **एवं** दाडिमे। ॐ ह्रीँ रक्तदन्तिके इहागच्छ इह तिष्ठेत्यावाह्य **स्नाप**येदनेन।

ॐ दाडिम्यघप्रणाशाय क्षुन्नाशाय तथा नृणाम्।
निर्मितासि पुरा धात्रा प्रसीद त्वमुमाप्रिये॥

इति स्नापयित्वा दाडिम्यधिष्ठात्र्यै ॐ ह्रीँ रक्तदन्तिकायै **नमः**। इति संपूज्य। पुष्पाञ्जलिमादाय।

ॐ दाडिमि त्वं पुरा युद्धे रक्तबीजस्य संक्षये।
उमाकार्य्यं कृतं यस्मात्तस्मान्मे वरदा भव॥

इति प्रणमेत्। धान्ये।

ॐ धान्यवृक्षे निमग्नाञ्च द्विभुजां श्वेतविग्रहाम्।
श्वेतपद्मोपविष्टाञ्च वराभयकरां शुभाम्॥
(श्रीबीजेन सतारेण पूजयेत् कमलाननाम्॥)

ॐ ह्रीँ लक्ष्मि इहागच्छ इह तिष्ठेत्यावाह्य।

ॐ लक्ष्मीस्त्वं धान्यरूपासि प्राणिनां प्राणदायिनी।
स्थिरात्यंतं हि नो भूत्वा गृहे कामप्रदा भव॥

इति स्नापयित्वा। ॐ ह्रीँ धान्याधिष्ठात्र्यै लक्ष्म्यै **नमः**॥ इति संपूज्य पुष्पाञ्जलिं दद्यादनेन॥

ॐ जगतः प्राणरक्षार्थं ब्रह्मणा निर्मितं पुरा।
उमाप्रीतिकरं धान्यं तस्मात्त्वं रक्ष मां सदा॥

इति प्रणमेत्॥ हरिद्रायाम्।

ॐ द्विभुजां पीतवसनां त्रिनेत्रां खड्गधारिणीम्।
महिषस्थां विशालाक्षीमम्बरं वामहस्तके॥

इति ध्यात्वा। ॐ ह्रीँ दुर्गे इहागच्छ इह तिष्ठेत्यावाह्य।

ॐ हरिद्रे हर दुःखानि शङ्करस्य सदा प्रिये।
रुद्ररूपासि देवि त्वं सर्वशान्तिं प्रयच्छ मे॥

इति स्नापयित्वा। ॐ हरिद्राधिष्ठात्र्यै ह्रीँ दुर्गायै **नमः**। इति पञ्चोपचारैः संपूज्य। पुष्पाञ्जलिमादाय।

ॐ हरिद्रे वरदे देवि उमारूपासि सुव्रते ।
मम विघ्नविनाशाय पूजां गृह्ण प्रसीद मे ॥

इति प्रणमेत् ॥ मानके ।

ॐ श्यामाङ्गीं मानपत्रीञ्च नीलनीरजधारिणीम् ।
महिषस्थां त्रिनेत्राञ्च कन्याबीजेन चार्चयेत् ॥

ॐ ह्रीँ चामुण्डे इहागच्छ ।

ॐ ब्राह्मेषु मानो मानेषु माननीयः सुरासरैः ।
स्नापयामि महादेवीं मानं देहि नमोऽस्तु ते ॥

इति स्नापयित्वा ॐ ह्रीँ मानाधिष्ठात्र्यै चामुण्डायै नमः । इति संपूज्य ।

ॐ यस्य पत्रे वसेद्देवीमानवृक्षः शचीप्रियः ।
मम विघ्नविनाशाय पूजां गृह्ण यथासुखम् ॥

इति प्रणमेत् ॥ कचुपत्रिकायाम् ।

ॐ खड्गशूलाङ्कुशधरामभयं दधतीं करैः ।
महिषासुरयुद्धे तु कचूभूतां सदा स्मरेत् ॥

एवं ध्यात्वा । ॐ ह्रीँ कालि इहागच्छ इह तिष्ठेत्यावाह्य । ॐ कचुपत्रिकाधिष्ठात्र्यै ह्रीँ काल्यै नमः इति स्नापयित्वा पूजयेत् ।

ॐ कचु त्वं स्थावरीभूता सद्यःसिद्धिविधायिनी ।
दुर्गारूपेण सर्वत्र स्नानेन विजयं कुरु ॥

इति । ततः पुष्पाञ्जलिमादाय ।

ॐ महिषासुरयुद्धे त्वं कचूभूतासि सुव्रते ।
मम चानुग्रहार्थाय आगतासि हरप्रिये ॥

इति प्रणमेत् । बिल्वशाखायाम् ।

ॐ विपद्धन्त्रीञ्च द्विभुजां महावृषभवाहिनीम् ।
श्वेतामभीतिवरदां गगने तु समर्चयेत् ॥

एवं ध्यात्वा । ॐ ह्रीँ शिवे इहागच्छ इह तिष्ठेत्यावाह्य ॥ स्नापयेत् ।

ॐ श्रीफलः श्रीनिकेतोऽसि सदा विजयवर्धनः ।
देहि मे धर्मकामार्थान् प्रसन्नो भव सर्वदा ॥

ॐ ह्रीँ बिल्वाधिष्ठात्र्यै ह्रीँ शिवायै नमः। इति स्नापयित्वा पाद्यादिभिः संपूज्य पुष्पाञ्जलिं दद्यादनेन।

ॐ महादेवप्रियकरो वासुदेवप्रियः सदा।
उमाप्रीतिकरो वृक्षो बिल्ववृक्ष नमोऽस्तु ते ॥

इति प्रणमेत्। अशोके।

ॐ अशोकपत्रिकां रक्तां सिन्दूरारुणविग्रहाम्।
बाणचापधरां सौम्यां पद्मस्थां नागवाहनाम् ॥

ॐ ह्रीँ शोकरहिते इहागच्छ इत्यावाह्य।

ॐ स्थिरा भव सदा लोके दुर्गे शोकविनाशिनि।
मया त्वं पूजिता नित्यं स्थिरा भव हरप्रिये ॥

इति स्नापयित्वा। पुष्पाञ्जलिमादाय।

ॐ शिवप्रीतिकरो देवो ह्यशोकः शोकनाशनः।
उमाप्रीतिकरो यस्मादशोकं मां सदा कुरु ॥

ॐ अशोकाधिष्ठात्र्यं ह्रीँ शोकरहितायै नमः ॥ इति पूजयेत् प्रणमेच्च। जयन्त्याम्।

ॐ जयन्तीं रक्तवसनां पीताश्च चण्डमालिनीम्।
शूलचक्रधराञ्चैव सर्वालङ्कारभूषिताम्।

एवं ध्यात्वा। (मन्दरेणैव वोजेन वालाद्येन समर्चयेत्)। ॐ ह्रीँ कार्तिकि इहागच्छ इह तिष्ठेत्यावाह्य। स्नापयेदनेन।

ॐ जयन्ती जयरूपासि जगतां जयकारिणी।
स्नापयामीह देवि त्वां जयं देहि गृहे मम ॥

ॐ जयन्त्यधिष्ठात्र्यै ह्रीँ कार्तिक्यै नमः। पुष्पमादाय।

ॐ निशुंभशुंभमथने सेन्द्रैर्देवगणैः सह।
पूजितासि जयन्ती त्वमस्माकं वरदा भव ॥

इति प्रणमेत्। ततोऽञ्जलिं बध्वा।

ॐ पत्रिके नवदुर्गे त्वं महादेवमनोरमे।
पूजां समस्तां संगृह्य रक्षां कुरु महेश्वरि ॥
स्थापितासि महादेवि पत्रिकासु सुरेश्वरि।
आयुरारोग्यविजयं देहि देवि नमोऽस्तु ते ॥

इति प्रणम्य । ततो विजयादीन् वाहनान् प्रत्येकं पूर्वोक्तक्रमेणैव पूजयेत् । ततो देव्या अङ्गे स्वांगे च न्यासं कुर्य्यात् । ॐ ह्रां अंगुष्ठाभ्यां नमः । ॐ ह्रीं तर्जनीभ्यां स्वाहा । ॐ ह्रूँ मध्यमाभ्यां वषट् ।। ॐ ह्रैं अनामिकाभ्यां हूँ । ॐ ह्रौं कनिष्ठाभ्यां वौषट् । ॐ ह्रः अस्त्राय फट् ।। एवं, ॐ ह्रीं हृदयाय नमः । ॐ ह्रीं शिरसे स्वाहा । ॐ ह्रूं शिखायै वषट् । ॐ ह्रैं कवचाय हूँ । ॐ ह्रौं नेत्रत्रयाय वौषट् ।। ॐ ह्रः अस्त्राय फट् ।। ततः पूर्वपूजाक्रमेण ।

ॐ सर्वपापहरा देव्यः सर्वकामफलप्रदाः ।
सर्वशत्रुविनाशिन्यः प्रायान्तु नवचण्डिकाः ।।

एवमावाह्य प्रत्येकाम् उग्रचण्डादिकां नवचण्डिकां पूजयेत् ।। ततो नवदुर्गां पूजयेत् । पूर्वोक्तक्रमेण ।

ॐ याः सर्वाः सुरकार्य्येषु स्वावतीर्णा यथा पुरा ।
आयान्तु नवदुर्गास्ताः सर्वं ददतु वाञ्छितम् ।।

एवमाबाह्य । ब्राह्मीम्, माहेश्वरीम्, सर्वाः नवदुर्गाः पूजयेत् ।। ततः अस्त्राणि पूजयेत् ।। ॐ कपाल इहागच्छ इह तिष्ठेत्यावाह्य । ॐ कपालाय नमः । इति पञ्चोपचारैः संपूज्य पुष्पाञ्जलिं दत्वा प्रणमेदनेन ।

ॐ कपाल त्वं महाभाग सुरापानप्रसाधक ।
सर्वथा कुरु कल्याणं देवीप्रिय सदा मम ।।

ॐ खेटक इहागच्छ इह तिष्ठ ॐ खेटकाय नमः ।

ॐ यष्टिरूपेण खेट त्वं वैरिसंहारकारक ।
देवीहस्तस्थितो नित्यं मम रक्षां कुरुष्व च ।।

एष पुष्पाञ्जलिः । ॐ खेटकाय नमः । प्रणमेत् ।। ॐ घंटे इहागच्छ इह तिष्ठेत्यावाह्य ।

ॐ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य्य या जगत् ।
सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव ।।

इति प्रणमेत् । ॐ धनुरिहागच्छ इह तिष्ठेत्यावाह्य । ॐ धनुषे नमः । इति संपूज्य पुष्पाञ्जलिं दद्यात् ।

ॐ सर्वायुधमहाभाग सर्वासुरनिषूदन ।
धनुर्मां सर्वतो रक्ष साकं सायकसत्तमैः ।।

इति प्रणमेत् । ॐ ध्वज इहागच्छ इह तिष्ठेत्यावाह्य । ॐ ध्वजाय नमः । इति संपूज्य पुष्पाञ्जलिमादाय ।

ॐ शक्रकेतो महावीर्य्य सुवर्णस्त्वां समाश्रितः ।
पक्षिराजो वैनतेयस्तथा नारायणो ध्वज।।
यानि प्रयुक्तान्यरिभिर्दूषणानि समन्ततः ।
निहितानि सदा तानि भवन्तु तव तेजसा ।।

एष पुष्पाञ्जलिः। ॐ ध्वजाय नमः । इति प्रणमेत् ।। ॐ डमरुक इहागच्छ इह तिष्ठ । ॐ डमरुकाय नमः । इति संपूज्य पुष्पाञ्जलिं दद्यात् ।

ॐ दुन्दुभे त्वं सपत्नानां भूयाद्धृदयकंपनः ।
भव भूपतिसैन्यानां तथा विजयवर्धनः ।।
यथा जीमूतघोषेण दृत्यन्ति वरवारणाः ।
तथास्तु तव शब्देन हर्षोऽस्माकं जयावहः ।।

इति प्रणमेत् । ॐ नागपाश इहागच्छ इह तिष्ठेत्यावाह्य । ॐ नागपाशाय नमः । इति संपूज्य पुष्पाञ्जलिं दद्यात् ।

ॐ पाश त्वं नागरूपोऽसि विषपूर्णो विषोदरः ।
शत्रूणां दुःसहो नित्यं नागपाश नमोऽस्तु ते ।।

इति प्रणमेत् । ॐ शक्ते इहागच्छ इह तिष्ठ । ॐ शक्तये नमः । इति संपूज्य पुष्पाञ्जलिं दद्यादनेन ।

ॐ शक्ते त्वं सर्वदेवानां गुहस्य च विशेषतः ।
शक्तिरूपेण सर्वत्र रक्षां कुरु नमोऽस्तु ते ।।

इति प्रणमेत् । ॐ शूल इहागच्छ इह तिष्ठ । ॐ शूलाय नमः । इति संपूज्य पुष्पाञ्जलिं दद्यात् ।

ॐ त्रिशूलाद्धि समुद्धृत्य स्वशक्त्या रोपणात्मकम् ।
त्रिशूलं दत्तवान् शूली तस्मै शूलाय ते नमः ।।

इति प्रणमेत् । ॐ खड्ग इहागच्छ इह तिष्ठ । ॐ खड्गाय नमः इति संपूज्य । पुष्पाञ्जलिं दद्यात् ।

ॐ असिर्विशसिनः खड्गः तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्माधार नमोऽस्तु ते ।।

इति प्रणमेत् । ॐ वज्र इहागच्छ इह तिष्ठ । ॐ वज्राय नमः । इति संपूज्य ।

ॐ शक्रायुध महाभाग सर्वदेवारिसूदन ।
वज्र मां समरे रक्ष देवकार्य्यं सदा कुरु ॥

एष पुष्पाञ्जलिः वज्राय नमः । इति प्रणमेत् ॥ ॐ अंकुश इहागच्छ इह तिष्ठ । ॐ अंकुशाय नमः । इति संपूज्य । पुष्पाञ्जलिमादाय ।

ॐ अंकुशोऽसि नमस्तुभ्यं गजानां नियमः सदा ।
लोकानां सर्वरक्षार्थं विधृतः पार्वतीकरे ॥

इति प्रणमेत् । ॐ शंख इहागच्छ इह तिष्ठ । ॐ शंखाय नमः । इति संपूज्य ।

ॐ पुण्यस्त्वं सर्वपुण्यानां मंगलानाञ्च मंगलम् ।
विष्णुना त्वं धृतो नित्यमतः शान्ति प्रयच्छ मे ॥

इति प्रणमेत् । ॐ चक्र इहागच्छ इह तिष्ठ । ॐ चक्राय नमः ।

ॐ चक्र त्वं विष्णरूपोऽसि विष्णुपाणौ सदा स्थितः ।
देवीहस्तस्थितो नित्यं सुदर्शन नमोऽस्तु ते ॥

इति प्रणमेत् । ॐ शर इहागच्छ इह तिष्ठ । ॐ शराय नमः । इति संपूज्य पुष्पाञ्जलिं दद्यादनेन ।

ॐ आयुः सर्वस्य हि प्राणान् शत्रुप्राणविहारकान् ।
शरान् कृत्वा शलाकाभान् दण्डधाराशुवेगिनः ॥

इति प्रणमेत् । ॐ छुरिके इहागच्छ इह तिष्ठ । ॐ छुरिकायै नमः । इति संपूज्य । पुष्पाञ्जलिमादाय ।

ॐ शूलायुधाद्विनिष्कृष्य कृत्वा मुष्टिग्रहं शुभम् ।
चण्डिकायाः प्रदत्तासि सर्वदुष्टनिवर्हिणी ।
तया विस्तारिता चासि देवानां प्रतिपादिका ॥
सर्वसत्वांगभूतासि सर्वाशुभनिर्वहिणी ।
छुरिके रक्ष मां नित्यं शान्ति यच्छ नमोऽस्तु ते ॥

इति प्रणमेत् । ॐ कट्टार इहागच्छ इह तिष्ठ । ॐ कट्टाराय नमः । इति संपूज्य ।

ॐ रक्ताङ्गानि गजान् रक्ष रक्ष वाजिबलानि च ।
मम देहं सदा रक्ष कट्टारक नमोऽस्तु ते ।।

प्रणमेत् । ॐ कुन्त इहागच्छ इह तिष्ठ ।

ॐ प्रास पातय शत्रूँस्त्वमनया लोकमायया ।
गृहाण जीवितं तेषां मम सैन्यञ्च रक्षताम् ।।

इति प्रणमेत् । ॐ वर्मन् इहागच्छ इह तिष्ठ । ॐ वर्मणे नमः । इति संपूज्य । पुष्पाञ्जलिमादाय ।

ॐ शर्मप्रद त्वं समरे वर्मन् सैन्येयशोधने ।
रक्ष मां रक्षणीयोऽहं तावनेय नमोऽस्तु ते ।।

ॐ परशो इहागच्छ इह तिष्ठ । ॐ परशवे नमः । इति संपूज्य । पुष्पाञ्चलिमादाय ।

ॐ परशो त्वमतितीक्ष्णोऽसि सर्ववैरिविमर्दन ।
देवीहस्तगतश्चासि सदा तुभ्यं नमो नमः ।।
यानि यानीह मुख्यानि प्रसिद्धान्यायुधानि च ।
क्षयकारीणि शत्रूणां विख्यातानि जगत्त्रये ।।
यानि यान्यम्बिका धत्ते करेषु स्वेषु सर्वदा ।
भुशंडीपाशपरिघभिन्दिपालासिलागुडाः ।
ऋष्टितोमरकुन्ताश्च पट्टिशो मुशलस्तथा ।।
गदाशतघ्नीकुणपच्छूरिकाकर्तरीमुखाः ।।
सर्वांस्तान्पूजयाम्यद्य सप्तम्यां च विशेषतः ।
सर्वे रक्षन्तु मां नित्यं सर्वसिद्धिं ददत्वपि ।।

इति दत्वा प्रणमेत् ।। ॐ चामर इहागच्छ इह तिष्ठ । ॐ चामराय नमः । पुष्पाञ्जलिं दद्यात् ।

ॐ शशांककरसंकाश हिमपिंडीरपांडुर ।
प्रोत्सारय त्वं दुरितं चामरामरवल्लभ ।।

ॐ छत्र इहागच्छ इह तिष्ठ ।

ॐ यथाम्बुदश्छादयते शिवायेमां वसुन्धराम् ।
तथा मां छादय च्छत्रयुद्धेऽध्वनि गतं सदा ।।

इति प्रणमेत् । ततः प्रथमदिनोक्तक्रमेणैव इन्द्रादिदशदिक्-पालान् आवाह्य प्रत्येकं तत्तन्मन्त्रेण पूजयेत् ॥ ततः आदित्यादि-नवग्रहान् आवाह्य पूर्वोक्तक्रमेण पूजयेत् ॥ ततः सिंहं ध्यात्वा पूजयेत् ।

ॐ तीक्ष्णदंष्ट्रः करालास्यः सटाशोभितकंधरः ।
चतुरंघ्रिर्वज्रनखो महासिंहः प्रकीर्तितः ॥

ततो मनो जूतिरिति मन्त्रेण सिंहस्य प्राणप्रतिष्ठां कृत्वा । ॐ ह्रीं ह्रां वज्रनख दंष्ट्रायुध महासिंहासन इहागच्छ इह तिष्ठेत्यावाह्य ।

ॐ सिंहं नमन्तमध्वो अयासं हरिमरुषं दिवो अस्यपतिम् ।
सूरो ह्यप्सु प्रथमः पृच्छते गा अस्य चक्षसा परियात्युक्षा ॥

ॐ वज्रनखाय दंष्ट्रायुधाय महासिंहासनाय नमः । इति पञ्चोपचारैः पूजयेत् । ततः पुष्पाञ्जलिं दद्यादनेन ।

ॐ विजयो जयदो जेता विश्वघाती प्रियङ्करः ।
दुःखहा धर्मदश्चैव सर्वारिष्टविनाशकः ॥
इत्यष्टौ तव नामानि यस्मात् सिंहपराक्रमः ।
तेन सिंहासने नित्यं नाम्ना देवेषु गीयते ॥
ॐ सिंह त्वं हरिरूपोऽसि स्वयं विष्णुर्न संशयः ।
पार्वत्या वाहन त्वं हि अतस्त्वां पूजयाम्यहम् ॥
त्वयि स्थितः शिवः साक्षात् त्वयि शक्रः सुरेश्वरः ॥
त्वयि स्थितो हरिर्देवः त्वदर्थं तप्यते तपः ॥
नमस्ते सर्वतो भद्र शिवो भव महीपते ।
त्रैलोक्यस्य तु सर्वस्य सिंहासन नमोऽस्तु ते ॥
ॐ आसनं चासि दुर्गायाः नानालंकारभूषितम् ।
मेरुसिंहप्रतीकाश सिंहासन नमोऽस्तु ते ॥

इति पुष्पाञ्जलिं दत्वा प्रणमेत् ॥ ततः महिषासुरं ध्यात्वा पूजयेत् ।

महिषं विशिरःस्कन्धं दानवं खड्गपाणिनम् ।
हृदि शूलेन निर्भिन्नं नानालङ्कारभूषितम् ।
रक्तरक्ती कृताङ्गं च रक्तविस्फारितेक्षणम् ।
वमद्रुधिरवक्त्रं च चिन्तयेन्महिषासुरम् ॥

ततः ॐ मनो जूतिरिति मन्त्रेण महिषासुरस्य प्राणप्रतिष्ठां कृत्वा ॐ ह्री ह्रां हूं महिषासुर इहागच्छ इह तिष्ठेत्यावाह्य ॐ महिषासुराय नमः। इति पञ्चोपचारैः संपूज्य पुष्पाञ्जलिमादाय प्रणमेदनेन।

ॐ महिष त्वं महावीर इन्द्रादिदेवमर्दक।
देव्यास्त्रताडितो भूत्वा गतः स्वर्गं नमोऽस्तु ते ॥
ॐ हतं हि सुरराज त्वं देवानां दर्पनाशकः।
पितुर्वरप्रार्थनया महिषीगर्भसम्भवः।
कात्यायन्या समं योद्धुं सामर्थ्यं कस्य विद्यते।
केनासुरेण विधृतः समरे मधुसूदनः।
केनान्येन विजित्वा ते त्रिदशाः सेवकीकृताः।
मन्वन्तरत्रयं भुक्तं देवराज्यमकंटकम् ॥
बभूव कस्य वा सेना वरार्धशतसंमिता।
रुद्ररूप धरायतो महिषासुर ते नमः।
ॐ महिषस्त्वं महावीर शिवरूप सदाशिव।
अतस्त्वां पूजयिष्यामि क्षमस्व महिषासुर ॥

इति प्रणमेत्। ततो द्वितीयोक्तक्रमेण रेमन्तोच्चैःश्रवतुरंगमांश्च पूजयेत्। ततो नवभैरवान् पूजयेत्। पुष्पमादाय।

ॐ भैरवं परमं देवं सर्वकामप्रसाधकम्।
पूजयाम्यग्रतो देव्याः सर्वाभीष्टफलप्रदम् ॥
ॐ भीषणास्यं त्रिनयनं अर्धचन्द्रविभूषितम्।
स्फटिकाभं कंकणदिभूषाशतसमावृतम् ॥
अष्टवर्षवयस्कञ्च कुण्डलोल्लसितं भजे।
धारयन्तं दण्डशूले भैरव्यादिसमायुतम् ॥

इति ध्यात्वा पूजयेत्। ॐ असितांगभैरव इहागच्छ इह तिष्ठेत्यावाह्य। ॐ इँ ह्रीँ अँ असिताङ्गभैरवाय नमः। इति पञ्चोपचारैः पूजयेत्। तथैव। ॐ ऐँ ह्रीँ ईँ रुरुभैरव इहागच्छ इह तिष्ठेत्यावाह्य। ॐ रुरवे भैरवाय नमः। इति पूजयेत्। दक्षिणे। ॐ ऐँ ह्रीँ ॐ चण्डभैरव इहागच्छ इह तिष्ठ। ॐ चण्डभैरवाय नमः। ॐ ऐँ ह्रीँ ऋँ क्रोधभैरव इहागच्छ इह तिष्ठ। ॐ क्रोधभैरवायनमः। पश्चिमे। ॐ ऐँ ह्रीँ उन्मत्तभैरव इहागच्छ इह तिष्ठ। ॐ उन्मत्तभैरवाय नमः॥

ॐ ऐँ ह्रीँ ऐँ भयंकर भैरव इहागच्छ इह तिष्ठेत्यावाह्य। ॐ भैरवाय नमः। उत्तरे। ॐ ऐँ ह्रीँ श्रोँ भीषणभैरव इहागच्छ इह तिष्ठेत्यावाह्य। ॐ भीषणभैरवाय नमः। मध्ये। ॐ ऐँ ह्रीँ श्रँ संहारभैरव इहागच्छ। ॐ संहारभैरवाय नमः। ॐ ऐँ ह्रीँ कँ कपालीभैरव इहागच्छ। ॐ कपालीभैरवाय नमः। एवं संपूज्य पुष्पाञ्जलिमादाय प्रणमेदनेन

ॐ करकलितकपालः कुण्डली दण्डपाणि-
स्तरुणतिमिरलोलव्यालयज्ञोपवीती।
क्रतुसमयसपर्य्याविघ्नविच्छेदहेतु-
र्जयति बटुकनाथः सिद्धिदः साधकानाम्॥

इति प्रणम्य बलिं दद्यादनेन। ॐ जय जय बटुकनाथ कपिल-जटाभार भास्वत्त्रिनेत्र ज्वालामुख देवीपुत्र सर्वान् विघ्नान् नाशय २ सर्वोपचारसहितं बलिं गृह्ण २ गृह्णापय २ स्वाहा। इत्युत्सृजेत्। ततश्चतुरो बटुकान् पूजयेत्। ॐ श्रीँ सिद्धपुत्रबटुक इहागच्छ इह तिष्ठ। पंचोपचारैः पूजयेत्। एवं ॐ श्रीँ ज्ञानपुत्रबटुकाय नमः। ॐ श्रीँ सहजपुत्रबटुकाय नमः। ॐ श्रीँ समयपुत्रबटुकाय नमः। ॐ ततः वामावर्तेन नवभैरवीः प्रत्येकां पूजयेत् ध्यायेच्च

ॐ भावयेच्च महादेवीं चन्द्रकोटिसमप्रभाम्।
हिमकुंदेन्दुधवलां पञ्चवक्त्रां त्रिलोचनाम्।
अष्टादशभुजैर्युक्तां सर्वानन्दकरोद्यताम्।
प्रहसन्तीं विशालाक्षीं देवदेवस्य संमुखीम्।

इति ध्यात्वा, श्री भैरवीम् १ महाभैरवीम् २ सिंहभैरवीम् ३ धूम्रभैरवीम् ४ भीमभैरवीम् ५ उन्मत्तभैरवीम् ६ वशीकरणभैरवीम् ७ मोहनभैरवीम् ८ संहारभैरवीमिति नवभैरवीः पूजयेत्। ततः।

ॐ अभीष्टसिद्धिं मे देहि शरणागतपालिके।
भक्त्या समर्पये तुभ्यमिदमावरणार्चनम्॥

इति देव्यै समर्पयेत्। ततः अष्टौ क्षेत्रपालान् पूजयेत्। ततो मनो जूतिरितिमन्त्रेण गणेशस्य प्राणप्रतिष्ठां कृत्वा। ॐ गणेश इहागच्छ इह तिष्ठेत्यावाह्य। पुष्पमादाय।

ॐ आतून इन्द्र क्षुमन्तं चित्रंग्राभं संगृभाय। महाहस्ती दक्षिणेन।

ॐ सिन्दूराभं त्रिनेत्रं पृथुतरजठरं पद्महस्तं शुभेशं
दन्तं पाशांकुशेष्टान् पुरुकर विलसद्बीजपूराभिरामम् ।।
बालेन्दुद्योतमौलिं करिपतिवदनं दानपूरार्द्रगंडम् ।
भोगीन्द्रावद्धभूषं भजत गणपतिं रक्तवस्त्राङ्गरराम् ।।

इति ध्यानपुष्पं ॐ गं गणेशाय नमः। इति पञ्चोपचारैः संपूज्य पुष्पाञ्जलिमादाय प्रणमेदनेन ।

ॐ सर्वविघ्नहरो देवः एकदन्तो गजाननः ।
देवीगृहेऽर्चितः प्रीत्या सर्वविघ्नं विनाशय ।।

इति प्रणम्य । ॐ मनो जूतिरिति मन्त्रेणमूषिकमावाह्य । ॐ ह्रीँ मूषिक इहागच्छ इह तिष्ठ । पञ्चोपचारैः संपूज्य पुष्पाञ्जलिं दद्यात् ।

ॐ वृषाकार महाभाग वृषरूप महाबल ।
कर्मरूप वृषस्त्वं हि गणेशस्य च वाहन ।।
नमस्करोम्यहं देव पूजासिद्धिं प्रयच्छ मे ।।

इति प्रणमेत् । ततो मनो जूतिरिति मन्त्रेण प्राणप्रतिष्ठां दत्वा । ॐ ह्रीँ क्लीँ कमलवासिन्यै क्लीँ ह्रीँ भूर्भुवस्वर्भगवति महालक्ष्मि इहागच्छ इह तिष्ठेत्यावाह्य पुष्पमादाय ।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।

इति वैदिकमन्त्रेणावाह्य (१) ।

---

(१) अत्रेदमूह्यम् । श्रीसूक्तं तु पञ्चदशमन्त्रात्मकम् । तद्यथा ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।१।। तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ।।२।। अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ।।३।। कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ।।४।। चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मनेमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ।।५।। आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः । तस्य फलानि तपसा नुदन्तु या अन्तरायाश्च बाह्या अलक्ष्मीः ।।६।। उपैतु मा देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ।।७।। क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।

ॐ कान्त्या काञ्चन सन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैः ।
हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम् ।
बिभ्राणाम्बरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलाम् ।
क्षौमाबद्धनितम्बविम्बललितां वन्देऽरविन्दस्थिताम् ॥

इति ध्यानपुष्पं । ॐ महालक्ष्म्यै नमः । एवं पञ्चोपचारैः संपूज्य वस्त्रादिकं दत्वा । पुष्पाञ्जलिमादाय प्रणमेदनेन ।

ॐ विश्वरूपस्य भार्यासि पद्मे पद्मालये शुभे ।
सर्वतः पाहि मां देवि महालक्ष्मि नमोऽस्तु ते ॥
ॐ धनं धान्यं धरां धर्मं कीर्तिमायुर्यशःश्रियम् ।
तुरगान् दन्तिपुत्रांश्च महालक्ष्मि प्रयच्छ मे ॥

इति प्रणमेत् ॥ ततो मनो जूतिरितिमन्त्रेण महासरस्वत्याः प्राणप्रतिष्ठां विधाय । ॐ ह्रीं भूर्भुवस्वर्महासरस्वति इहागच्छ इह तिष्ठेत्यावाह्य पुष्पमादाय ।

अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥८॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥ मनसः काममाकूतिं वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥ कर्दमेन प्रजाभूता मयि संभव कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे । निचदेवीं मातरं श्रियं वासय मे कुले ॥१२॥ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३॥ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मी जातवेदो मआवह ॥१४॥ तामावह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥१५॥ इति ।

(तत्र देव्याः पञ्चोपचारपूजाविधौ) आपः सृजन्तु स्निग्धानि—इतिमन्त्रेण जलम्, गन्धद्वारां दुराधर्षामितिमन्त्रेण चन्दनम् मनसः काममाकूतिमिति मन्त्रेण अक्षतम्, आर्द्रां पुष्करिणीं पुष्टिमितिमन्त्रेण पुष्पं, क्षुप्तिपासामिति मन्त्रेण नैवेद्यमाचमनीयं च देव्ये समर्पयेत् ।

(षोडशोपचारपूजाविधौ तु) हिरण्यवर्णामिति मन्त्रेण आसनम्, अश्वपूर्वामितिमन्त्रेण स्वागतम्, कोसोस्मितामितिमन्त्रेण पाद्यम्, आर्द्रांयः करिणीमितिमन्त्रेण अर्घ्यम्, आपः सृजन्तु स्निग्धानीतिमन्त्रेण स्थानीयम्, कर्दमेन प्रजाभूतेतिमन्त्रेण वसनम्, तांमआवहेतिमन्त्रेण चन्दनम्, क्षुत्पिपासामितिमन्त्रेण मधुपर्कम्,

ॐ पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ।।

ॐ वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्दप्रभाम्
चन्द्रार्धाङ्कितमस्तकां निजकरैः संबिभ्रतीमादरात् ।
मुद्रामक्षगुणं सुधाढ्यकलशं विद्याञ्च हस्ताम्बुजैः
बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये ।।

इति ध्यानपुष्पं ॐ महासरस्वत्यै नमः । एवं पञ्चोपचारैः संपूज्य ।

ॐ भद्रकाल्यै नमो नित्यं सरस्वत्यै नमोनमः ।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च ।।

इति प्रणमेत् । ततः पूर्ववत् मनो जूतिरितिमन्त्रेण कार्तिकेयस्य प्राणप्रतिष्ठां विधाय । ॐ देवसेनान्यै स्वाहा भू० साङ्गसायुधसवाहन-सपरिवारश्रीकार्तिकेय इहागच्छ इह तिष्ठेत्यावाह्य ।

ॐ यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यम्महि जातन्ते अर्वन् ।।
ॐ कार्तिकेयं महाभागं मयूरोपरिसंस्थितम् ।
तप्तकाञ्चनवर्णाभं शक्तिहस्तं वरप्रदम् ।
दिवसं शत्रुहंतारं नानालंकारभूषितम् ।।

इदं ध्यानपुष्पं ॐ साङ्गसायुधसवाहनाय श्रीकार्तिकेयाय नमः । एवं सोपचारैः संपूज्य पुष्पाञ्जलिमादाय ।

ॐ कार्तिकेय महाभाग गौरीहृदयनन्दन ।
कुमार रक्ष मां नित्यं दैत्यार्दन नमोऽस्तु ते ।।

इति प्रणमेत् । ॐ मनो जूतिरिति मन्त्रेण मयूरस्य प्राणप्रतिष्ठां विधाय । ॐ ह्रीँ एँ सुलोचनमयूर इहागच्छ इह तिष्ठ । ॐ ह्रीँ एँ

आदित्यवर्णं तपसेतिमन्त्रेण पुष्पबिल्वपत्रे, उपैतु मादेवसख इति मन्त्रेण सुगन्धिद्रव्यं सिन्दूरं च, गन्धद्वारामितिमन्त्रेण धूपं, मनसः काममाकूतिमिति मन्त्रेण नैवेद्यम्, चन्द्रां प्रभासामिति मन्त्रेणदीपम्, आर्द्रां पुष्करिणीं पुष्टिमिति मन्त्रेण आचमनीयम् । ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्नि-षाणामुंम इषाण सर्वलोकंम इषाण ।। इति मन्त्रेण च पुष्पाञ्जलिं दद्यात् । इति वैदिककल्पः ।।

सुलोचनाय मयूराय नमः। पञ्चोपचारैः संपूज्य पुष्पाञ्जलिं दद्यात्।

ॐ नानाचित्रविचित्राङ्ग गरुडाज्जननं तव।
अनंतशक्तिसंयुक्तं कालाहिर्भक्षणं तव ॥
गरुडस्त्वं महाभाग अतस्त्वं प्रणमाम्यहम् ॥

ततः शिवस्य प्राणप्रतिष्ठां विधाय। ॐ शिव इहागच्छ इह तिष्ठेत्यावाह्य ध्यायेत्।

बन्धूकाभं त्रिनेत्रं शशिशकलधरं स्मेरवक्त्रं वहन्तम्
हस्तैः शूलं कपालं वरदमभयदं चारुहारं भजामि।
वामोरूस्तं भगायाः करतलविलसच्चारुरक्तोत्पलायाः
हस्तेनाश्लिष्टदेहं मणिमयविलसद्भूषणायाः प्रियायाः ॥

एवं ध्यात्वा षोडशोपचारैः संपूज्य पुष्पाञ्जलिमादाय।

ॐ नमः शिवाय शान्ताय कारणत्रयहेतवे।
निवेदयामि चात्मानं त्वं गतिः परमेश्वर ॥

इति प्रणमेत्। ततो गौरीमावाह्य प्राणप्रतिष्ठां विधाय। ॐ भगवति गौरि इहागच्छ इह तिष्ठेत्यावाह्य।

ॐ गौरीं चतुर्भुजां चण्डीं त्रिनेत्रां मुकुटोज्ज्वलाम्।
पद्मदर्पणहस्तां च वरदाभयहस्तकाम् ॥
दिव्यवस्त्रपरीधानां दिव्याभरणभूषिताम्।
प्रसन्नवदनां देवीं शिवोत्संगे तु वामतः ॥

इति ध्यानपुष्पं ॐ गौर्यै नमः। एवं सर्वोपचारैः संपूज्य पुष्पाञ्जलिमादाय प्रणमेदनेन।

ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

ततो नन्दिनः प्राणप्रतिष्ठां विधाय। ॐ नन्दिन् इहागच्छ इह तिष्ठेत्यावाह्य ध्यायेत्।

ॐ चामीकराचलप्रख्यं सर्वाभरणभूषितम्।
वालेन्दुमुकुटं सौम्यं त्रिनेत्रं च चतुर्भुजम् ॥
दीप्तशूलमृगीटंकहेमवेत्रधरं विभुम्।
चन्द्रविम्बाभवदनं हरिवक्त्रमथापि वा ॥

एवं ध्यात्वा । ॐ नन्दिने नमः इति पञ्चोपचारैः पूजयेत्। यत्र यत्र जयायाः विजयायाश्च योगिन्याः प्रतिमा तत्र प्राणप्रतिष्ठां विधाय पूजयेत्। यत्र च नास्ति प्रतिमा तत्र आवाह्य पूजयेत्। तद्यथा देव्याः वामे जयां ध्यायेत्।

ॐ तप्तकाञ्चनसंकाशां द्विभुजां लोललोचनाम्।
कटाक्षविशिखोपेतां दिव्याम्बरपरिच्छदाम्।
दिव्याभरणसंयुक्तां ध्यायेत् सिद्धिप्रदायिनीम्॥

ॐ ह्रीँ ह्रां जये इहागच्छ इह तिष्ठ। ह्रीँ जयायै नमः। देव्याः दक्षिणभागे विजयां ध्यायेत्।

ॐ दलिताञ्जनसंकाशां द्विभुजां खञ्जनेक्षणाम्।
कटाक्षविशिखोद्दीप्तां कज्जलाञ्चितलोचनाम्॥
दिव्याम्बरपरीधानां नानारत्नविभूषिताम्।
ध्यायेत्तां विजयां नित्यां सर्वसिद्धिप्रदायिनीम्॥

ॐ ऍं ह्रां विजयायै नमः। ततः ब्रह्माणं ध्यात्वा पूजयेत्।

ॐ तरुणादित्यसंकाशं चतुर्वक्त्रं चतुर्भुजम्।
चतुर्वेदमयं वक्त्रं धर्मकामार्थमोक्षदम्॥

ह्रां कँ ब्रह्मणे नमः। ततः सावित्रीँ ध्यात्वा पूजयेत्।

ॐ तप्तकाञ्चनवर्णाभां द्विभुजां लोललोचनम्।
दिव्याभरणवेषाढ्यां दिव्याम्बरपरिच्छदाम्॥
सिन्दूरतिलकोद्दीप्तामञ्जनाञ्चितलोचनाम्॥

ॐ ह्रां सां सावित्र्यै नमः।

(अथ छागबलिदानम्)

अथ बलिं (छागं) स्नापयित्वा रक्तमाल्येन पट्टडोरकेण वा वेष्टयित्वा स्वयमुत्तरमुखः बलिं स्नापयेदनेन।

ॐ वाराही यमुना गंगा करतोया सरस्वती।
कावेरी चन्द्रभागा च सिन्धुर्भैरवशोणगाः॥
अजस्नाने महेशानि सान्निध्यमिह कल्पय॥

ॐ पशुपाशविनाशाय हेमकूटस्थिताय च ।
पराय परमेष्ठिने हूँकाराय च मूर्तये ॥
ॐ शृंगे पृष्ठे ललाटे च कर्णयोर्जंघयोस्तथा ।
मेढ्रे च सर्वगात्रेषु मुञ्चन्तु पशुदेवताः ॥

इति स्नापयित्वा । कुशोदकेन प्रोक्षयेत् । ॐ अग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पिबैताअपः । ॐ वायुः पशुरासीत्तेनायजन्त स एतं लोकमजमत । तस्मिन्नग्निः स ते लोको भविष्यति तं पिबैताअपः । एवं सूर्य्यःपशुपरासीदित्यादि । ततः कुशोदकेन ॐ वाचं ते शुन्धामि प्राणं ते शुंधामि चक्षुस्ते शुन्धामि श्रोत्रं ते शुन्धामि नाभिं ते शुन्धामि मेढ्रं ते शुन्धामि पायुं चरित्राँस्ते शुन्धामीति प्रयुक्ताङ्गं प्रोक्षयेत् । ॐ मनस्त आप्यायतां वाक् त आप्याताम् प्राणस्त आप्यायतां चक्षुस्त आप्यायताᳬ श्रोत्रं त आप्यायताम् । यत्ते क्रूरं यदास्थितं तत्त आप्यायतां निष्टयायतां तत्ते शुध्यतु शमहोभ्यः । ओषधे त्रायस्व स्वधिते मैनᳬहिᳬसीः । ॐ ऐं ह्रीं श्रीं चन्द्रमण्डलाधिष्ठितविग्रहायै पशुरूपचण्डिकायै इमं पशुं प्रोक्षामि स्वाहा । ॐ दुर्गे दुर्गे रक्षिणी स्वाहा ।

ॐ पशुपाशविनाशाय हेमकूटस्थिताय च ।
परापराय परमेष्ठिने ॐ काराय च मूर्तये ॥

इति छागं संप्रोक्ष्य । ॐ छागाय नमः इति संपूज्य शृंगद्वये सिन्दूरं दत्वा । पशोरङ्गेषु देवतानां पञ्चोपचारैः पूजा कार्य्या । यथा शिरसि । ॐ रुधिरवदने इहागच्छ इह तिष्ठ । ॐ रुधिरवदनायै नमः । मुखे । ॐ सरस्वत्यै नमः । नासिकायाम् । ॐ महाभैरवि इहागच्छ० ॐ महाभैरव्यै नमः । ललाटे । ॐ चण्डिके इहागच्छ० । ॐ चण्डिकायै नमः । कर्णद्वये । ॐ बृहस्पते इहागच्छ इह तिष्ठ । ॐ बृहस्पतये नमः । चक्षुर्द्वये । ॐ चन्द्रादित्यौ इहागच्छतम् इह तिष्ठतम् । ॐ चन्द्रादित्याभ्यान्नमः । जिह्वायाम् । ॐ महादन्तिके इहागच्छ इह तिष्ठ । ॐ महादन्तिकायै नमः । ग्रीवायाम् । ॐ उग्रदन्तिके इहागच्छ इह तिष्ठ । ॐउग्रदन्तिकायै नमः । पादचतुष्टये । ॐ धर्म इहागच्छ इह तिष्ठ । धर्माय नमः । उदरे । ॐ वैष्णव्यै नमः । पुच्छे । ॐ रक्तदन्तिके इहागच्छ० । ॐ रक्तदन्तिकायै नमः ।

सर्वांगे । ॐ छागपश्वधिष्ठात्रिदेवता इहागच्छत इह तिष्ठत । ॐ छागपश्वधिष्ठात्रिदेवताभ्यो नमः । एवं संपूज्य बद्धाञ्जलिः पठेत् ।

ॐ पशुरुत्पादितोदे वैर्यज्ञार्थे च विधानतः ।
इदानीं च महोत्साहे छेत्तव्योसि मया पुनः ।।
ॐ छाग त्वं बलिरूपेण मम भाग्यादुपस्थितः ।
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ।
चण्डिकाप्रीतिदानेन दातुरापद्विनाशिने ।
वैष्णवीबलिरूपाय बले तुभ्यं नमोनमः ।
ॐ यज्ञार्थे पशवः सृष्टाः यज्ञार्थे पशुघातनम् ।
अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः ।
ॐ पशुयोनिप्रसूतोऽसि ब्रह्मणा निर्मितः पुरा ।
अतस्त्वां घातयाम्मद्य तस्माद्यज्ञे वधोऽवधः ।।

इति पुष्पाञ्जलिं दत्वा संकल्पं कुर्य्यात् । कुशत्रयतिलजलान्यादाय । ॐ अद्याश्विने मासि शुक्ले पक्षे महासप्तम्यां तिथौ अमुकगोत्रस्यामुकशर्मणः उपस्थितशरीराविरोधेन शाश्वतदुर्गाप्रीतिपूर्वकसेव्येश्वरकर्तृकसम्मानसदायुद्धविजयदीर्घायुष्ट्वबलपुष्टिनैरुज्यप्राप्तिपुत्रपौत्रादिसमृद्धिसर्वविधसौमनस्यप्राप्तिपुर्वक साङ्गसायुधसवाहनसपरिवारश्रीदुर्गाप्रीतिकामोऽमुं छागं वह्निदैवतं ह्रीँ भगवत्यै श्रीदुर्गादेव्यै तुभ्यमहं घातयिष्ये । इति संकल्पं (१) विधाय ।

ॐ बलिरेष मया दत्तः पशूनां च पशूत्तमः ।
गृह्ण गृह्ण महादेवि रक्ष मां दुरितार्णवात् ।।

इति देव्यै पुष्पाञ्जलिं दत्वा । ततः खड्गं पाद्यादिभिः संपूज्य प्रार्थयेत् । ध्यायेच्च ।

ॐ कृष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणम् ।
उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् ।।
रक्ताम्बरधरं चैव पाशहस्तं कुटुम्बिनम् ।
पिबमानं च रुधिरं भुंजानं क्रव्यसंहतिम् ।।

---

(१) संकल्पं कृत्वा ॐ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति । दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु इति । संकल्पमन्त्रः सर्वत्र पठनीयः ।

क्षोभयन्तं जगत्सर्वं कम्पनादिप्रचारणैः ।
वेष्टितं मृत्युकालाभ्यां वामदक्षिणभागतः ।।
भुंक्ष्वैतस्य पशो रक्तं चव्यसंहतिमेव च ।
छिन्धीममिव मे शत्रुं मंगलानि प्रयच्छ मे ।।
रसना त्वं चण्डिकायाः सुरलोकप्रसाधकः ।।

एवं ध्यात्वा ॐ ह्रीँ क्रूँ फट् खड्गाय नमः इति पाद्यादिभिः संपूज्य ।

ॐ असिर्विशसिनः खड्ग स्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्माधार नमोऽस्तु ते ।।
इत्यष्टौ तव नामानि पुरा प्रोक्तानि वेधसा ।
नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः ।
रोहिण्यश्च शरीरं ते धाता देवो जनार्दनः ।
पिता पितामहश्चैव त्वं मां पालय सर्वदा ।
नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः ।
भवशुद्धोऽमर्षणश्च अतितेजो महाबलः ।
इयं येन धृता क्षोणी हतश्च महिषासुरः ।
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः ।
ॐ खड्गायासुरनाशाय शक्तिकार्य्याय तत्पर ।
पशुश्छेद्यस्त्वया शीघ्रं खड्गनाथ नमोऽस्तु ते ।।

इति पुष्पाञ्जलिं दत्वा । ॐ कालि कालि वज्रेश्वरि लौहदण्डाय खड्गाय नमः । इति संपूज्य पशोः कर्णे । ॐ पशुपाशाय विद्महे विप्रकीर्णाय धीमहि । तन्नश्छागः प्रचोदयात् ।। इति पशुगायत्रीं जप्त्वा पशोः ग्रीवायां खड्गेन ॐ ह्रीँ ह्रौँ कालि कालि विकटदंष्ट्रे करालिनि स्फेँ स्फेत्कारिणि किलि किलि मम शत्रून् खादय खादय छेदय छेदय सर्वदुष्टान् मारय मारय इमं पशुं खड्गेन छिन्धि छिन्धि कालि कालि पिब २ रुधिरं स्फेँ स्फौँ किरि किरि कालिकायै नमः । इति खड्गस्पर्शं कारयेत् । पठेच्च ।

ॐ यज्ञार्थं पशवः सृष्टा यज्ञार्थे पशुघातनम् ।
यज्ञस्य मारणे त्वं हि ध्रुवं गन्ता त्रिविष्टपम् ।।
खड्गघात महद्दुःखं विनिर्जित्य पशूत्तम ।
देवीवरप्रसादेन मामात्मानश्च तारय ।।

ततो बन्धनमोचनमन्त्रं पठेत्, परीक्षयेच्च ।

ॐ रक्षार्थं बन्धनस्थोऽसि मुक्तये मोचितो मया ।
देव्याः प्रीतिं समुत्पाद्य स्वर्गं गच्छ पशूत्तम ॥
इमं देहं परित्यज्य भूत्वा दैववपुर्धरः ।
मोदस्व प्रमथैः सार्धं यावदिन्द्राश्चतुर्दश ॥

ततः ह्रौं इति मन्त्रेण पशुं छेदयेत् । ततः समांसरुधिरं शिरश्चानीय ॐ ऐं ह्रीं कौशिकि समांसरुधिरेणाप्यायताम् । इति उत्सृज्य । बिल्वपत्रे समांसरुधिरं भागत्रयं विधाय ॐ समांसछागरुधिरबलये नमः । इति गन्धपुष्पाभ्यां संपूज्य एष समांसरुधिरबलिः ॐ विदारिकायै नमः । नैऋत्ये । ॐ पापराक्षस्यै नमः । वायव्ये । ॐ पूतनायै नमः । ऐशान्यां । ॐ कालिकायै नमः आग्नेय्याम् । ॐ दिव्यकपालं गृहाण महा तृप्तिं कुरु कुरु स्वाहा इति बलिमुत्सृज्य ततः छागमस्तकं सदीपं कृत्वा ॐ अद्याश्विने मासीत्यादि श्रीमद्दुर्गादर्शनाभिवन्दनस्पर्शनाभिपूजनस्नपनतर्पणजनितपूर्वपूर्वाधिकपुण्याधिकपुण्यप्राप्तिकाम इमं सप्तदीपच्छागशीर्षबलिं भगवत्यै श्रीदुर्गादेव्यै तुभ्यमहं सम्प्रददे । ॐ सप्तदीपछागशीर्षबलये नमः । इति गन्धपुष्पाभ्यां वारत्रयं सम्पूज्य ॐ ह्रीं दुर्गायै नमः इति उत्सृज्य ।

ॐ जय त्वं सर्वभूतेशे सर्वभूतसमावृते ।
रक्ष मां निजभूतेभ्यो बलिं भुंक्ष्व नमोऽस्तु ते ॥
ॐ भालस्थं फेलिनं रक्तं पशूकंठविनिर्गतम् ।
माध्वीकं पिब देवि त्वं तुष्टा भव सुरेश्वरि ॥

ॐ एष सप्तदीपछागशीर्षबलिः श्रीदुर्गायै नमः । ॐ ह्रीं नमो भगवति महिषमर्दिनि हूँकारमूर्ते पशुमस्तकं गृह्ण गृह्ण हूँ फट् स्वाहा । इति देव्यै निवेद्य कृताञ्जलिः पठेत् ।।

ॐ जय देवि जगन्मातर्जय पापौघनाशिनि ।
जय जन्मजराव्याधितृणदावानलाकृते ॥
जयसर्वविपत्तिघ्नि जय त्रिदशवन्दिते ।
जय नित्यानन्दरूपे जय कल्याणदायिनि ॥
ॐ घोरदंष्ट्रे करालास्ये मत्स्यमांसबलिप्रिये ।
बलिं गृह्ण महादेवि पशुरक्तं समांसकम् ॥

ॐ आहवे रुधिराकांक्षि बलिं गृह्ण प्रसीद मे ।
त्रिनेत्रे विकरालास्ये मुंडमालाविभूषिते ।।
सर्वासुरकृतान्ते त्वं खड्गखट्वाङ्गधारिणि ।
महिषघ्नि महामाये दैत्यदर्पनिषूदिनि ।।
छागलेन बलिं दद्मि गृहाण हरवल्लभे ।
इमं छागबलिं देवि गृहीत्वा कालरात्रिके ।।
प्रीता भव महाकालि रक्ष मां देवि चण्डिके ।
आयुर्देहि धनं देहि भाग्यं कीर्तिञ्च देहि मे ।
स्त्रियं देहि सुतान् देहि सर्वान् कामांश्च देहि मे ।।
उग्रचण्डे प्रचण्डासि प्रचण्डकरवालिनी ।
महाचण्डोग्रदोर्दण्डे विश्वेश्वरि नमोऽस्तु ते ।
रक्ष मां शरणापन्नं त्वत्पादार्पितमानसम् ।।
हर पापं हर क्लेशं हर शोकं हराशुभम् ।
हर रोगं हर क्षोभं हर दैत्यं हर प्रिये ।।

इति पठित्वा दण्डवत् प्रणमेत् ।

ॐ गुह्यकालि जगद्धात्रि सर्वान्तर्यामिनीश्वरि ।
गृहीत्वेमं पशुबलिं यथोक्तफलदा भव ।।
ॐ कायेन मनसा वाचा त्वत्तो नान्या गतिर्मम ।
अन्तश्चारेण भूतानां द्रष्ट्री त्वं परमेश्वरि ।।
ॐ कात्यायनि महामाये दुर्गे दुर्गार्तिहारिणि ।
ततस्तुभ्यं जगद्धात्रि कालरात्रिस्वरूपिणि ।।

इति पुष्पाञ्जलिं महादेव्यै निवेदयेत् । ततः । आचारात् खड्गशोणितविन्दुं ललाटे धारयेत् ।

ॐ यं यं स्पृशामि पादेन यं यं पश्यामि चक्षुषा ।
स स मे वश्यतां यातु यदि शक्रसमो भवेत् ।।

ततश्छागबलिदानप्रतिष्ठार्थं दक्षिणां दद्यात् । ॐ अद्याश्विनशुक्लमहासप्तम्यां तिथौ कृतैतत्साङ्गसायुधसवाहनसपरिवारश्रीभवतीदुर्गाप्रीतिकामुकछागबलिदानप्रतिष्ठार्थमेतावद्द्रव्यमूल्यकहिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे । ततः पूर्वोक्तं ।

ॐ दुर्गे देवि महामावे महामाये महाप्रभे ।

इत्यादिस्तोत्रं पठेत् । ततो नीराजनं कुर्यादनेन ।

ॐ मङ्गले कालिके दुर्गे महिषासुरमर्दिनि ।
इदं नीराजनं देवि गृहाण सुरसुन्दरि ।
ॐ समस्तयोगिनीचक्रे परिवारगणावृते ।
आरात्तिकमिदं दुर्गे कृपया प्रतिगृह्यताम् ।

इदं नीराजनं ॐ साङ्गेति श्रीदुर्गायै नमः । ततऽ कर्पूरनीराजनं दद्यादनेन ।

ॐ त्वं चन्द्रसूर्य्यज्योतींषि विद्युदग्न्योस्तथैव च ।
त्वमेव जगतां ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥
इति सप्तमीकृत्यम् ।

(अथ महाष्टमीकृत्यम्)

अथाष्टम्यां तिथौ (दिने) कुशादिकमादाय संकल्पं कुर्य्यात् । ॐ अद्याश्विने मासि शुक्ले पक्षे महाष्टम्यां तिथौ अमुकगोत्रस्यामुकशर्मणः सपरिवारस्योपस्थितशरीराविरोधेन महाभयाभावपूर्वकश्रीदुर्गाप्रीतिकामः साङ्गसायुधसवाहनसपरिवारभगवत्याः श्रीदुर्गादेव्याः पूजनमहं करिष्ये । इति संकल्प्य पूर्ववत् भूतशुद्धिप्राणायामं न्यासादिकं विधाय प्रतिमानिर्माल्यमपसार्य्य । ॐ जटाजूटसमायुक्तामित्यादिना देवीं ध्यात्वा पूर्ववत् पूजां कुर्य्यात् । विशेषतो देव्याः आवरणपूजां पीठपूजां च कुर्य्यात् । तद्यथा, गन्धपुष्पाक्षतैरष्टदलकमलेषु अग्निकोणे ॐ हृदयाय नमः । नै० को० ॐ दुर्गे शिखायै वषट् । ई० को० रक्षिणीकवचाय हूं । मध्ये स्वाहा नेत्राभ्यां वौषट् । सर्वदिक्षु ॐ दुर्गे २ रक्षिणी स्वाहा अस्त्राय फट् । ततः ॐ ह्रीं जयन्त्यै नमः । ह्रीं मङ्गलायै । ॐ काल्यै । भद्रकाल्यै । कपालिन्यै । दुर्गायै । क्षमायै । शिवायै । धात्र्यै । स्वधायै । स्वाहायै । इति सर्वाः सम्बोधन पदेनावाह्य चतुर्थ्यन्तपदेन पाद्यादिभिः पूजयेत् ।

---

(१) आश्विने शुक्लपक्षे तु सप्तम्यादितिथित्रये । महाशब्दः प्रयोक्तव्यो नान्यत्रेति विनिश्चयः ॥ इति देवीपुराणे ।

(अथार्धरात्रौ[1] निशापूजा)

अथ कृतनित्यक्रियो यजमानः सकलपूजाद्रव्यं संस्थाप्य पूर्वाभिमुखः उत्तराभिमुखो वा भूत्वा उपविश्य आचम्य कुशत्रयतिलजलान्यादाय ॐ अस्यां महाष्टम्यां रात्रौ अमुकगोत्रस्यामुकशर्मणः सपरिवारस्योपस्थितशरीराविरोधेन दुर्भिक्षदुःखनिवृत्तिदीर्घायुष्ट्वबलपुष्टिनैरुज्यध्वजमानाकुलविमानवरारोहणकब्रह्मलोकगमनपूर्वकहर्षविजयकामः सोपावासः श्रीदुर्गादेव्याः पूजनमहं करिष्ये। इति संकल्प्य पूजामारभेत्। देव्याः

स्मरणं कीर्तनं चैव दर्शनं स्पर्शनं (वन्दनं) तथा।
पूजनं चेति पञ्चांगं कर्म प्रोक्तं सदा बुधैः॥

तत्र प्रथमं श्रीदुर्गादेव्याः स्मरणस्य संकल्पं कुर्य्यात्। कुशादिकमादाय। ॐ अस्यां महाष्टम्यां रात्रौ सर्वविधमहाभयाभावकामः श्रीदुर्गादेव्याः स्मरणमहं करिष्ये। एवं

ॐ चन्द्रमौलिपदप्राप्त्यै महाष्टम्यां महेश्वरि।
अद्याहं स्मरणं दुर्गे करिष्ये तव प्रीतये॥
ॐ सर्वानिष्टविनाशार्थमभयार्थं सुरेश्वरि।
भवबन्धविमोक्षार्थं ज्ञानं प्राप्तुं महेश्वरि।
अद्याहञ्च महाष्टम्यां करिष्ये स्मरणं तव॥

एवं पुनः कीर्तनस्य संकल्पं कुर्य्यात्।

ॐ नामानुकीर्तनं तेऽद्य महाष्टम्यां शिवप्रिये।
कलिकल्मषनाशार्थं करिष्ये धनवृद्धये॥
ॐ अत्युत्कृष्टपदं प्राप्तुं दुःखात् ततुं पुनः पुनः।
अद्य दुर्गे महाष्टम्यां करिष्ये कीर्तनं तव॥

एवं दर्शनस्य संकल्पः।

ॐ अद्याहन्ते महाष्टम्यां पुण्यप्राप्तिसुखाप्तये।
दुर्गे देवि महामाये करिष्ये दर्शनं तव।

---

१. अष्टम्यामर्धरात्रे तु यत्किञ्चित्कुरुते नरः। सर्वं तदक्षयं याति नवदुर्गाप्रयोगतः॥ इति शक्तिसङ्गमतन्त्रे।

ॐ महाश्रियं महाज्ञानं महैश्वर्य्यं महाबलम् ।
आयुर्बलं यशो वित्तं विद्यां विज्ञानमेव च ।
प्राप्तुकामोद्य सर्वज्ञे करिष्ये दर्शनं तव ।।
ॐ आनन्दार्थं महादुर्गे गोदानफलप्राप्तये ।
वृद्धयर्थं चैव वंशानां करिष्ये वन्दनं तव ।।

एवं पूजनस्य ।

ॐ अद्याहञ्च महाष्टम्यां शत्रुनाशाय चण्डिके ।
सुश्रीवृद्धयर्थकामश्च मनोवाञ्छितकामुकः ।।
नाना-शुभफलप्राप्तयै सर्वबाधाक्षयाय च ।
अद्याहन्ते महाष्टम्यां करिष्ये पूजनं तव ।।

एवं संकल्प्य पूजामारभेत् ।

न तत्र देशे दुर्भिक्षं न च दुःखं प्रवर्त्तते ।
नाकाले म्रियते कश्चित् पूज्यते यत्र चण्डिका ।।
विधायैवं च संकल्पं स्नापयेच्च ततोऽम्बिकाम् ।
पञ्चगव्येन दिव्येन तथा पञ्चामृतेन च ।।
शीतोदकेन शुद्धेन तथा च तिलवारिणा ।
पवित्रेक्षुरसेनैव नारिकेलोदकेन च ।।
कर्पूरसलिलेनैव तथा कुंकुमवारिणा ।
अगरूद्धकरम्येण तथा चन्दनबारिणा ।।

इत्यादि महास्नानोक्ततत्तद्द्रव्येण तत्तम्मन्त्रेण च शक्तश्चेत्,

स्नापयित्वा महामायां दुर्गां दुर्गतिहारिणीम् ।
जयन्तीत्यादिमन्त्रेण प्राणायामं विधाय च ।।
जटाजूटसमायुक्तामर्धेन्दुकृतशेखराम् ।
ध्यानेनानेन तां ध्यात्वा जयन्तीमन्त्रपूर्वकम् ।।

ॐ दुर्गे दुर्गे रक्षिणी स्वाहान्तमन्त्रेण षोडशोपचारं पूर्वोक्तकल्पेन पूजयेत् । साङ्गेत्यादि ॐ भूर्भुवःस्वर्भगवत्यै श्रीदुर्गादेव्यै नमः इति सर्वं समर्पयेत् । ततः

ॐ दुर्गे देवि महामाये महामाये महाप्रभे ।।

इत्यादिना पुष्पाञ्जलिं दत्वा प्रणम्य देव्याः आवरणपूजां कुर्य्यात्। तद्यथा। तत्र जयन्त्याद्यष्टोत्तरशतं योगिनीः प्रणवपूर्वकं ह्रीँकारबीजं दत्वा संबोधनपदेनावाह्य चतुर्थ्यन्तपदेन पाद्यादिभिः पञ्चोपचारैः प्रत्येकं पूजयेत्। तद्यथा। देव्याः दक्षिणपार्श्वे। ॐ ह्रीं जयन्ति इहागच्छ इह तिष्ठ। ॐ ह्रीँ जयन्त्यै नमः इति पञ्चोपचारैः पूजयेत्॥ ॐ ह्रीँ मंगले इहागच्छ इह तिष्ठ। ॐ ह्रीँ मंगलायै नमः। ॐ ह्रीँ कालि (१) इहागच्छ। ॐ ह्रीँ काल्यै नमः। ॐ ह्रीँ भद्रकालि इहागच्छ। ॐ ह्रीँ भद्रकाल्यै नमः। ॐ ह्रीँ कपालिनि इहागच्छ। ॐ ह्रीँ कपालिन्यै नमः। ॐ ह्रीँ दुर्गे इहागच्छ। ॐ ह्रीँ दुर्गायै नमः। ॐ ह्रीँ क्षमे इहागच्छ। ॐ ह्रीँ क्षमायै नमः। ॐ ह्रीँ शिवे इहागच्छ। ॐ ह्रीँ शिवायै नमः। ॐ ह्रीँ धात्रि इहागच्छ। ॐ ह्रीँ धात्र्यै नमः। ॐ ह्रीँ स्वधे इहागच्छ। ॐ ह्रीँ स्वधायै नमः। ॐ ह्रीँ स्वाहे इहागच्छ ॐ ह्रीँ स्वाहायै नमः। ततो देव्याः पृष्ठभागे। ॐ ह्रीँ श्रीँ उग्रचण्डे इहागच्छ इह तिष्ठ ॐ (ह्रीँ श्रीँ सर्वत्र) ह्रीँ श्रीँ उग्रचण्डायै नमः। ॐ प्रचण्डे इहागच्छ। ॐ ह्रीँ प्रचण्डायै नमः। ॐ ह्रीँ चण्डोग्रे इहागच्छ ॐ ह्रीँ चण्डोग्रायै नमः। ॐ ह्रीँ चण्डनायिके इहागच्छ ॐ ह्रीँ चण्डनायिकायै नमः। ॐ ह्रीँ चण्डे इहागच्छ ॐ ह्रीँ चण्डायै नमः। ॐ ह्रीँ चण्डवति इहागच्छ ॐ ह्रीँ चण्डवत्यै नमः। ॐ ह्रीँ रुद्रचण्डे इहागच्छ। ॐ ह्रीँ रुद्रचण्डायै नमः। ॐ ह्रीँ चण्डरूपे इहागच्छ। ॐ ह्रीँ चण्डरूपायै नमः। ॐ ह्रीँ चण्डिके इहागच्छ ॐ ह्रीँ चण्डिकागै नमः। ततो देव्याः वामपार्श्वे। ॐ ह्रीँ उग्रदंष्ट्रे इहागच्छ। ॐ ह्रीँ उग्रदंष्ट्रायै नमः। एवं ॐ ह्रीँ महादंष्ट्रे इहागच्छ। चतुर्थ्यन्तपदपूर्वेऽपि प्रणवानन्तरं ह्रीँकारं सर्वत्र संयोजयेत्। ॐ महादंष्ट्रायै नमः। ॐ ह्रीँ शुभदंष्ट्रे इहागच्छ ॐ शुभदंष्ट्रायै नमः। ॐ ह्रीँ करालिनि इहागच्छ ॐ करालिन्यै नमः। ॐ ह्रीँ भीमनेत्रे इहागच्छ ॐ भीमनेत्रायै नमः। ॐ ह्रीँ विशालाक्षि इहागच्छ ॐ विशालाक्ष्यै नमः ॐ ह्री मंगले इहागच्छ ॐ मंगलायै नमः। ॐ ह्रीँ विजये इहागच्छ ॐ विजयायै नमः। ॐ ह्रीँ जये इहागच्छ ॐ जयायै नमः। ततो देव्याः पुरतः॥ ॐ

---

(१) इहागच्छ—इति पदेन सह इह तिष्ठ इति सर्वत्र योज्यम्।

ह्रीँ नन्दिनि इहागच्छ इह तिष्ठ ॐ ह्रीँ नन्दिन्यै नमः। ॐ ह्रीँ भद्रे इहागच्छ ॐ भद्रायै नमः। ॐ ह्रीँ लक्ष्मि इहागच्छ ॐ लक्ष्म्यै नमः। ॐ ह्रीँ कीर्ते इहागच्छ। ॐ कीर्त्यै नमः। ॐ ह्रीँ यशस्विनि इहागच्छ ॐ ह्रीँ यशस्विन्यै नमः। ॐ ऐँ श्रीँ कोटियोगिन्यै नमः। एवं पुष्टयै नमः। ॐ ह्रीँ मेघेइहागच्छ ॐ मेधायै नमः। ॐ ह्रीँ शिवेइहागच्छ ॐ शिवायै नमः। ॐ ह्रीँ साध्वि इहागच्छ ॐ ह्रीँ साध्व्यै नमः। ॐ ह्रीँ यशो इहागच्छ ॐ यशायै नमः। ॐ ह्रीँ शोभने इहागच्छ ॐ शोभनायै नमः। ॐ ह्रीँ जये इहागच्छ ॐ जयायै नमः। ॐ ह्रीँ धृते इहागच्छ ॐ धृत्यै नमः। ॐ ह्रीँ आनन्दे इहागच्छ ॐ आनन्दायै नमः। ॐ ह्रीँ सुनन्दे इहागच्छ ॐ सुनन्दायै नमः। अथ देव्याः समीपे ह्रीँकारवर्जं सकलाश्चतुष्षष्टि द्वात्रिंशत् षोडशाष्टौ च देव्यः पूज्याः। ॐ विजये इहागच्छ ॐ विजयायै नमः। ॐ मंगले इहागच्छ ॐ मंगलायै नमः। ॐ भद्रे इहागच्छ ॐ भद्रायै नमः। ॐ धृते इहागच्छ ॐ घृत्यै नमः। ॐ शान्ते इहागच्छ ॐ ॐ शान्त्यै नमः। ॐ ऋद्धे इहागच्छ ॐ ऋद्धयै नमः। ॐ क्षमे इहागच्छ ॐ क्षमायै नमः। ॐ शिवे इहागच्छ ॐ शिवायै नमः। ॐ सिद्धे इहागच्छ ॐ सिद्धयै नमः। ॐ तुष्टे इहागच्छ ॐ तुष्टयै नमः। ॐ पुष्टे इहागच्छ ॐ पुष्टयै नमः॥ ॐ उमे इहागच्छ ॐ उमायै नमः। ॐ रते इहागच्छ ॐ रत्यै नमः। ॐ दीप्ते इहागच्छ ॐ दीप्तायै नमः। कान्ते इहागच्छ ॐ कान्त्यै नमः। ॐ यशे इहागच्छ ॐ यशायै नमः। ॐ लक्ष्मि इहागच्छ ॐ लक्ष्म्यै नमः। ॐ त्रिपुरे इहागच्छ ॐ त्रिपुरायै नमः। ॐ ऋद्धे इहागच्छ ॐ ऋद्ध्यै नमः। ॐ शक्ते इहागच्छ ॐ शक्त्यै नमः। जयावति इहागच्छ ॐ जयावत्यै नमः। ॐ ब्राह्मि इहागच्छ ॐ ब्राह्म्यै नमः। जयन्ति इहागच्छ ॐ जयन्त्यै नमः। ॐ अपराजिते इहागच्छ ॐ अपराजितायै नमः। ॐ अजिते इहागच्छ ॐ अजितायै नमः। ॐ मानसि इहागच्छ ॐ मानस्यै नमः। ॐ श्वेते इहागच्छ ॐ श्वेतायै नमः। ॐ दिते इहागच्छ ॐ दित्यै नमः॥ ॐ माये इहागच्छ ॐ मायायै नमः। ॐ महामाये इहागच्छ ॐ महामायायै नमः। ॐ मोहिनि इहागच्छ ॐ मोहिन्यै नमः। ॐ रतिलालसे इहागच्छ ॐ रतिलालसायै नमः। ॐ तारे इहागच्छ ॐ तारायै नमः। ॐ

विमने इहागच्छ ॐ विमनायै नमः। ॐ गौरि इहागच्छ ॐ गौर्य्यै नमः। ॐ कौशिकि इहागच्छ ॐ कौशिक्यै नमः। ॐ मते इहागच्छ ॐ मत्यै नमः। ॐ दुर्गे इहागच्छ ॐ दुर्गायै नमः। ॐ क्रिये इहागच्छ ॐ क्रियायै नमः। ॐ अरुन्धति इहागच्छ ॐ अरुन्धत्यै नमः। ॐ घंटे इहागच्छ ॐ घंटायै नमः। ॐ कर्णे इहागच्छ ॐ कर्णायै नमः। ॐ कपालिनि इहागच्छ ॐ कपालिन्यै नमः। ॐ रौद्रि इहागच्छ ॐ रौद्र्यै नमः। ॐ कालि इहागच्छ ॐ काल्यै नमः। ॐ मयूरि इहागच्छ ॐ मयूर्य्यै नमः। ॐ त्रिनेत्रे इहागच्छ ॐ त्रिनेत्रायै नमः। ॐ स्वरूपे इहागच्छ ॐ स्वरूपायै नमः। ॐ बहुरूपे इहागच्छ ॐ बहुरूपायै नमः। ॐ रिपुहे इहागच्छ ॐ रिपुहायै नमः। ॐ चर्चिके इहागच्छ ॐ चर्चिकायै नमः। ॐ अम्बिके इहागच्छ ॐ अम्बिकायै नमः। ॐ सुरपूजिते इहागच्छ ॐ सुरपूजितायै नमः। ॐ वैवस्वते इहागच्छ ॐ वैवस्वतायै नमः। ॐ कौमारि इहागच्छ ॐ कौमार्य्यै नमः। ॐ माहेश्वरि इहागच्छ ॐ माहेश्वर्य्यै नमः। ॐ वैष्णवि इहागच्छ ॐ वैष्णव्यै नमः। ॐ महालक्ष्मि इहागच्छ ॐ महालक्ष्म्यै नमः। ॐ कार्तिकि इहागच्छ ॐ कार्तिक्यै नमः। ॐ शिवदूति इहागच्छ ॐ शिवदूत्यै नमः। ॐ वाराहि इहागच्छ ॐ वाराह्यै नमः। ॐ चामुण्डे इहागच्छ ॐ चामुण्डायै नमः। ततः देव्याः प्रदक्षिणक्रमेण मातरः पूज्याः। ॐ ह्रीं ब्रह्माणि इहागच्छ ॐ ह्रीं ब्रह्माण्यै नमः। ॐ ह्रीं माहेश्वरि इहागच्छ ॐ ह्रीं माहेश्वर्य्यै नमः। ॐ ह्रीं कौमारि इहागच्छ ॐ कौमार्य्यै नमः। ॐ ह्रीं वैष्णवि इहागच्छ ॐ वैष्णव्यै नमः। ॐ ह्रीं वाराहि इहागच्छ ॐ ह्रीं वाराह्यै नमः। ॐ ह्रीं इन्द्राणि इहागच्छ ॐ ह्रीं इन्द्राण्यै नमः। ॐ ह्रीं चामुण्डे इहागच्छ ॐ चामुण्डायै नमः। ॐ ह्रीं महालक्ष्मि इहागच्छ ॐ ह्रीं महालक्ष्म्यै नमः। मध्ये, ॐ ह्रीं चण्डिके इहागच्छ ॐ ह्रीं चण्डिकायै नमः। ततः मातृणां पुरोभागे अष्टभैरवान् पूजयेत्। ॐ भूर्भुवस्वर्भगवन् भैरव इहागच्छ इह तिष्ठेत्यावाह्य पुष्पमादाय

ॐ भैरवं परमं देवं सर्वकामप्रसाधकम्।
पूजयाम्यग्रतो देव्याः सर्वाभीष्टफलप्रदम्॥

एष पुष्पाञ्जलिः ॐ भैरवाय नमः। एवं सर्वान् पञ्चोपचारैः पूजयेत्। ॐ असिताङ्गभैरव इहागच्छ ॐ असिताङ्गभैरवाय नमः।

ॐ कालभैरव इहागच्छ। ॐ कालभैरवाय नमः। ॐ क्रोधभैरव इहागच्छ ॐ क्रोधभैरवाय नमः। ॐ उन्मत्तभैरव इहागच्छ ॐ उन्मत्तभैरवाय नमः। ॐ कपालिभैरव इहागच्छ ॐ कपालिभैरवाय नमः। ॐ भीषणभैरव इहागच्छ ॐ भीषणभैरवाय नमः।। ॐ संहारभैरव इहागच्छ ॐ संहारभैरवाय नमः। ॐ बटुकभैरव इहागच्छ ॐ बटुकभैरवाय नमः। इति नवभैरवपूजां विधाय पुष्पाञ्जलिमादाय प्रणमेत्।।

ॐ भैरवं परमं देवं शत्रुक्षयकरं विभुम्।
प्रणमामि सदोपास्यं वीरभावसमाश्रितम्।।

ततः अष्टौ क्षेत्रपालान् यक्षान् पूजयेत्। ॐ यक्षराज इहागच्छ इह तिष्ठ ॐ यक्षराजाय नमः। ॐ हूं क्षौं हेतुक क्षेत्रपाल इहागच्छ ॐ हेतुकाय क्षेत्रपालाय महाभीषणाय नमः स्वाहा। ॐ बलिभद्र इहागच्छ ॐ बलिभद्राय नमः। ॐ चित्रमण्ड इहागच्छ ॐ चित्रमण्डाय नमः। ॐ सेन्द्रयक्ष इहागच्छ ॐ सेन्द्रयक्षाय नमः। ॐ जंभ इहागच्छ ॐ जंभाय नमः। ॐ वेताल क्षेत्रपालइहागच्छ ॐ वेतालाय क्षेत्रपालाय नमः। ॐ भीषण क्षेत्रपाल इहागच्छ ॐ भीषणाय क्षेत्रपालाय नमः। ॐ एकपादयक्ष इहागच्छ ॐ एकपादयक्षाय नमः। ॐ अग्निजिह्वक्षेत्रपाल इहागच्छ। ॐ अग्निजिह्वक्षेत्रपालाय नमः। ॐ कालक्षेत्रपाल इहागच्छ। ॐ कालक्षेत्रपालाय नमः। ॐ जंगयक्ष इहागच्छ ॐ जंगयक्षाय नमः। ततो देव्याः अंगानि पूजयेत्।। (ॐ कालि २ हृदय इहागच्छ) ॐ कालि २ हृदयाय नमः। (ॐ कालि २ वज्रिणि शिर इहागच्छ) ॐ कालि २ वज्रिणिशिरसे नमः। ॐ कालि २ कालेश्वरि शिखायै नमः। ॐ कालि वज्रेश्वरि शिखायै नमः। ॐ कालि २ वज्रेश्वरि कवचाय नमः। ॐ कालि २ वज्रेश्वरि लोहदंष्ट्रायै स्वाहा नेत्रत्रयाय नमः। ॐ कालि २ लोहदंडायै अस्त्राय नमः। ततो देव्याः पञ्चवक्त्रपूजा। ॐ ईशान इहागच्छ इह तिष्ठ ॐ ईशानाय नमः। इति शिरसि। ॐ कालि २ तत्पुरुष इहागच्छ ॐ कालि २ तत्पुरुषाय नमः। इति मुखे। ॐ वज्रेश्वरि अघोराय नमः। इति हृदये। ॐ लोहदंष्ट्रे वामदेव इहागच्छ। ॐ लोहदंष्ट्रायै वामदेवाय नमः। इत्यधः। स्वाहा सद्योजात इहागच्छ। ॐ स्वाहासद्योजाताय नमः। इति सर्वाङ्गे ।। अथास्त्रपूजा।। ॐ कपाल इहागच्छ ॐ

कपालाय नमः । ॐ खेटक इहागच्छ ॐ खेटकाय नमः । एवं प्रत्येकमावाहनपदेनावाह्य चतुर्थ्यन्तपदेन पाद्यादिभिः पूजयेत् । ॐ घंटायै नमः । ॐ दर्पणाय नमः । ॐ तर्जन्यै नमः । ॐ धनुषे नमः । ॐ ध्वजाय नमः । ॐ डमरुकाय नमः । ॐ पाशाय नमः । दक्षिणहस्ते । ॐ शक्तये नमः । ॐ मुद्गराय नमः । ॐ शूलाय नमः । ॐ खड्गाय नमः । ॐ वज्राय नमः । ॐ अंकुशाय नमः । ॐ शंखाय नमः ॐ चक्राय नमः । ॐ शराय नमः । ॐ सर्वेभ्यो देव्यस्त्रेभ्यो नमः ।

ॐ यानि यानीह मुख्यानि प्रसिद्धान्यायुधानि च ।
क्षयकारीणि शत्रूणां विख्यातानि जगत्त्रये ॥
ॐ सर्वांस्तान् पूजयाम्यद्य महाष्टम्यां विशेषतः ।
सर्वे रक्षन्तु मां नित्यं सर्वसिद्धिं ददत्वपि ॥

ॐ देव्याः किरीटाद्यलंकारेभ्यो नमः । इत्यस्त्रपूजा ॥ ॐ वज्रनखदंष्ट्रायुधाय महासिंहासनाय हूँ फट् स्वाहा सिंहासनाय नमः । ततो नवदुर्गापूजा । ॐ ह्रीँ ब्रह्माणि इहागच्छ ॐ ब्रह्माण्यै नमः । चतुर्थ्यन्तपदपूर्वेऽपि ह्रीँकारं योजयेत् । ॐ ह्रीँ माहेश्वरि इहागच्छ । ॐ माहेश्वर्यै नमः ॐ ह्रीँ वैष्णवि इहागच्छ । ॐ वैष्णव्यै नमः । ॐ ह्रीँ वाराहि इहागच्छ। ॐ वाराह्यै नमः । ॐ ह्रीँ नारसिंहि इहागच्छ । ॐ नारसिंह्यै नमः । ॐ ह्रीँ इन्द्राणि इहागच्छ ॐ इन्द्राण्यै नमः । ॐ ह्रीँ चामुण्डे इहागच्छ। ॐ चामुण्डायै नमः। ॐ दुर्गे दुर्गे रक्षिणी स्वाहा ॐ ह्रीँ भगवति दुर्गे इहागच्छ । ॐ ह्रीँ भगवत्यै श्रीदुर्गायै नमः। ततः सिद्धपुत्रवटुकं ज्ञानपुत्रवटुकं सहजपुत्रबटुकं समयपुत्रवटुकं च संपूज्य । ततः क्षेत्रपालान् पूजयेत् । ॐ हूँ क्षौँ हेतुकक्षेत्रपालमहाभीषण हूँ नमः स्वाहा । इति संपूज्य पूर्वोक्तक्रमेण छागबलिदानं कुर्य्यात् ॥ संकल्पं कुर्य्यात् । यथा ॐ अस्यां महाष्टम्यां रात्रौ शाश्वतदुर्गाप्रीतिसेव्येश्वरकर्तृकसम्मानसदायुद्धविजयदीर्घायुष्ट्वबलपुष्टिसमृद्धिपुत्रपौत्रादिसर्वविधसौमनस्यप्राप्तिकामनया अमुं छागं वह्निदैवतं भगवत्यै श्रीदुर्गादेव्यै तुभ्यमहं घातयिष्ये ॥ ततः छागं स्नापयित्वा तथा देवान् संपूज्य खड्गं पूजयित्वा बलिं दद्यात् । ततः पुष्पाक्षतमादाय ॐ दह दह मथ मथ छिन्धि छिन्धि भज २ स्फोटय २ कर्तय २ दाहय २ मारय २ अस्मच्छत्रून् दुर्गे २ रक्षिणी स्वाहा ॐ दुर्गायै नमः । ॐ क्रय २ छादय २ विच्छेदय २ निर्मूलय २ अस्मच्छत्रून्

दुर्ग दुर्ग रक्षिणी स्वाहा। ॐ हन २ दह २ भक्षय २ भासय २ नाशय २ आवेशय २ मोहय २ आस्फोटय २ उच्चाटय २ संकोचय २ अस्मच्छत्रून् वशं कुरु २ दुर्गे २ रक्षिणी स्वाहा। ॐ खड्गेन, वज्रेण, शलाकया, शूलेन, अंकुशेन, कर्तृकया, पाशेन, पट्टिशेन, चक्रेण, मम लक्ष्मीं, यशः, कीर्ति, वलम्, ऐश्वर्य्यं, तेजः तेजसा मां रक्ष २ चर्मणा धनुषा, दर्पणेन, भिन्दिपालेन, खर्परया, अक्षमालया, कमण्डलुना, परशुना, शक्त्या, दारान् पुत्रान् जनान् गृहान् मण्डलानि मां रक्ष २ ॐ दुर्गे दुर्गे रक्षिणी स्वाहा इति दुर्गादेव्यै नमः इति आत्मरक्षां समारोप्य पिष्टकमयं शत्रोः पुत्तलिकां विन्यस्य मूर्तौ प्राणप्रतिष्ठां दत्वा स्ववामहस्ते कृष्णपुष्पं कृत्वा विमुखः क्रोधदृष्टिः भूत्वा पुत्तलिकाशिरसि पुष्पं दद्यादनेन मन्त्रेण। यथा—

ॐ विलयं यान्तु ते सर्वे ये मां हिंसन्ति शत्रवः।
मृत्युरोगभयक्लेशाः पतन्तु रिपुमस्तके॥

ततोऽनेन मन्त्रेण खड्गमभिमन्त्र्य शत्रोः पुत्तलिकां छेदयेत्। तद्यथा ॐ दीप्तशतसहस्र तेजोप्रसम विष्वग्ज्वलित चण्डि चण्डोग्र-लोलजिह्वया जनसहस्रान्त इमं शत्रुमस्तकं छिन्धि २ भिन्धि २ क्रौं खूं खँ खः खड्गाय नमः। अञ्जलिं वध्वा पठेत्।

ॐ त्रिनेत्र विकरालास्य मुण्डमालाविभूषण।
सर्वाऽशुभकृतान्तस्त्वं खड्ग खट्वांगशूलधृक्॥

रुधिरं किलि २ किरि २ घोरांश्च दह २ स्वाहा इति शत्रुपुत्तलिकां छेदयेत्। ततो नैर्ऋत्ये त्रिकोणमण्डलकं कृत्वा माषभक्तघृतपक्वान्ना-पूपपूरिकापायसादिद्रव्यमेकत्रोपकृत्य बलिं दद्यात्। यथा ॐ अस्यां महाष्टम्यां रात्रौ लोकपालादिनवग्रहनक्षत्रसुराऽसुरगणगन्धर्वयक्षराक्षस-विद्याधरपन्नगगजेन्द्रपशुभूतपिशाचक्रव्यादमनुष्यगणयोगिनीगणडाकिनी-गणा इमं नानाद्रव्यबलिं गृह्णन्तु स्वाहा। इति प्रचुरबलिं समुत्सृजेत्॥

ॐ शिवाः कंकालवेतालाः पूतनाजम्बुकादयः।
ते सर्वे तृप्तिमायान्तु बलिदानेन तोषिताः॥

इति भूतबलिं दत्वा नीराजनं कृत्वा आवाहितदेवताविसर्जनं कुर्य्यात्॥

(अथ महानवम्यां त्रिशूलिनीपूजा)

ततो महानवम्यां त्रिशूलिनीश्रीदुर्गादेव्याः पूजनम्। कुशादिकमादाय ॐ अद्याश्विने मासि शुक्ले पक्षे महानवम्यां तिथौ दिव्याधिकरणकदेवतागणपरिवृतत्वसहस्राश्वमेधशतवाजपेययज्ञसमफलप्राप्तिपूर्वकशरीरारोग्यबलपुष्टिसुखसौमनस्यप्राप्तिकामनया श्रीदुर्गाप्रीतिकामः साङ्गसायुधसवाहनसपरिवारश्रीत्रिशूलिनीदुर्गादेवीपूजनमहं करिष्ये। इति संकलप्य त्रिशूले ॐ त्रिशूलिनि दुर्गे इहागच्छ इह तिष्ठेत्यावाह्य, पूर्ववत् पूजां विधाय, विधिवत् विशेषपूजां च विधाय पुष्पाञ्जल्यादिकं दत्त्वा नवशक्तीः पूजयेत्। पुष्पाञ्जलिमादाय

ॐ यद्दत्तं भक्तिमात्रेण पत्रं पुष्पम् फलं जलम्।
आवेदितञ्च नैवेद्यं तद्गृहाणानुकम्पया॥
नाथे योनिसहस्रेषु येषु येषु व्रजाम्यहम्।
तेषु तेषु च सा भक्तिरच्युतास्तु सदा त्वयि॥
ॐ देवी दात्री यशःश्रीश्च देवी सर्वमिदं जगत्।
देवी जयति सर्वत्र या देवी सा हि मे गतिः॥

अन्यत् सर्वं पूर्ववत् पूजादिकं कृत्वा श्रीदुर्गारूपां कुमारिकां (१) संपूज्य भोजये (२) तद्यथा—पूजागृहद्वारि दोषरहितां कुमारी-

---

(१) कुमारीपूजनफलन्तु उक्तं यामले—कुमारी पूजिता हन्ति कलुषं पूर्वसञ्चितम्। कुमारिकां विजानीयात्साक्षात्प्रकृतिरूपिणीम्॥ वसन्ति सततं देहे कुमार्या योगिनीगणाः। स सर्वसिद्धिमाप्नोति यः कुमारीं समर्चयेत्॥ कुमारीपूजनं भक्त्या शरत्पूजनकर्मणि। बलिहोमादयश्चास्य कलां नार्हन्ति षोडशीम्॥

महाकालसंहितायामपि—न तथा तुष्यति शिवा बलिहोमस्तुतीरणैः। कुमारीपूजनेनात्र यथा सद्यः प्रसीदति॥

(२) कुमारीभोजनफलमेवम्—भोजिता चेत्कुमारी स्याद् भोजितं भुवनत्रयम्। नवरात्रे समायाते नवम्यन्तं निशातधीः॥ नानोपहारैरभ्यर्च्य कुमारी वृद्धिपूर्वकम्। वृद्धिक्रमेण प्रयजेद्वाञ्छितां सिद्धिमाप्नुयात्॥ कुमारीं न स्पृशेद् भक्त्या भावयुक्तेन चेतसा। अन्यथा मृत्युमाप्नोति नोचेद्देवी पराङ्मुखी॥ (—यामले)

मासने संस्थाप्य तस्यां देवीबुद्धिं विधाय, तस्याः पादौ प्रक्षाल्य तज्जलं स्वमस्तके न्यस्य कुमारीध्यानं कुर्यात् । तद्यथा

ॐ प्रसन्नवदनाम्भोजां प्रोद्यद्बालार्कसप्रभाम् ।
रक्ताम्बरां रक्तमाल्यां नानालङ्कारभूषिताम् ।।
सस्मितां दिव्यकन्याभिः क्रीडारसपरायणाम् ।
ध्यायेत् कुमारिकां बालां स्वभक्ताभीष्टसिद्धिदाम् ।।

एवं ध्यात्वा वस्त्रं परिधाप्य सिन्दूरादिकं कृत्वा पञ्चोपचारैः सम्पूज्य कुमारीं भोजयेदनेन, ऐँ ह्रीँ श्रीँ स्त्रीँ सौँ सर्वशक्तिस्वरूपायै सर्वसिद्धिदायै भगवत्यै कुमार्यै भक्ष्यभोज्यनानाविधान्नकल्पितषड्रसोपेतमिदं महाभोगनैवेद्यं तुभ्यमहं निवेदयामि गृहाण २ भुङ्क्ष्व प्रसीद २ सर्वसिद्धिम्मे प्रयच्छ २ ऐँ ह्रीँ श्रीँ नमः स्वाहा ।। भक्षयन्त्यां कुमार्यां कृताञ्जलिः स्तोत्रमेतत्पठेत् ।

ॐ जयकालि महाभीमे भीमरावे भयापहे ।
संसारदावाग्निशिखे वृजिनार्णवतारिणि ।।
ब्रह्मेन्द्रोपेन्द्रभूतेशप्रभृत्यमरवन्दिते ।
सर्गपालनसंहारकारिण्यहितमारिणि ।।
गुणातीतेऽपि सगुणे महाकल्पान्तनर्तकि ।
कुमारीरूपमास्थाय विज्ञाप्रज्ञास्वरूपिणि ।
आगतासि ममागारं शारद्यर्चासमाप्तये ।
त्वमेवैतेन रूपेण देवेभ्यः प्रथिता पुरा ।
दत्तवत्यसि साम्राज्यं वरानपि समीहितान् ।।
मह्यमप्यद्य देवेशि वरं देहि सुपूजिता ।
शत्रुनाशं राज्यलाभं शरीरोग्यमेव च ।।
त्वत्पादाम्बुजयोर्भक्तिं याचेऽहं चतुरो वरान् ।
नमस्ते भगवत्यम्ब नमस्ते भक्तवत्सले ।
नमस्ते जगदाधाररूपिणि त्राहि मां सदा ।।

ततः तां सम्यग् भोजनादिना सन्तोष्य दक्षिणां दत्त्वा भक्त्या प्रणम्य प्रस्थापयेत् ।

---

(३) निषिद्धकुमारीलक्षणन्तु— श्यामां दीर्घदतीमोतुनयनां पिङ्गमूर्द्धजाम् । तनूमूनगतिं क्रुद्धां कुब्जां खञ्जां च खर्विकाम् । भ्रूकेशाल्पत्वसहितां तथा चैव गलद्व्रणाम् । जातस्तनरजोऽनङ्गां प्रयत्नेन विवर्जयेत् ।। (महाकालसंहितायाम्) पुष्पवतीं न भोजयेदिति केचित् ।

(अथ दशमीकृत्यम्)

अथ कृतनित्यक्रियो यजमानः पूर्ववत् पूजां समस्तां कृत्वा विशेषनैवेद्यादिकं दत्त्वा एकस्मिन् पात्रे अष्टदलयन्त्रं विलिख्य तत्र दूर्वाहरिद्रासहिताऽपराजितालतां स्थापयित्वा पूजां कुर्य्यात्। तद्यथा। कुशत्रयतिलजलान्यादाय ॐ अद्याश्विने मासि शुक्ले पक्षे विजयदशम्यां तिथौ अमुकगोत्रस्यामुकशर्मणः सपरिवारस्य सदारापत्यमित्रस्य सकलारिष्टझटितिप्रशमनपूर्वकशरीरारोग्यबलपुष्टिसुखसौमनस्यप्राप्तिपूर्वकजन्मजन्मान्तरार्जितनिखिलकलुषविलयपूर्वक - नवग्रहोपग्रहजनितसर्वविघ्ननिवारणपूर्वकयात्राविजयकामनया साङ्गसायुधसवाहनसपरिवारश्रीभगवत्यपराजितादुर्गादेवीपूजनमहं करिष्ये ॥ इति संकल्प्य ॐ भगवति अपराजिते इहागच्छ इह तिष्ठेत्यावाह्य पुष्पमादाय।

ॐ चतुर्भुजां पीतवसनां सर्वाभरणभूषिताम्।
खड्गचर्मवरदाभयहस्तां त्रिनेत्रां ईषद्धसितवदनाम् ॥

शुद्धस्फटिकसंकाशां चन्द्रकोटिसुशीतलाम्।
वरदाभयहस्तां च पीतवस्त्रैरलंकृताम्।
नानाभरणसंयुक्तां चक्रवाकैश्च वेष्टिताम् ॥

इति ध्यानपुष्पम् ॐ अपराजितायै नमः। इति पञ्चोपचारैः संपूज्य। ॐ क्रिये इहागच्छ इह तिष्ठ ॐ क्रियायै नमः। ॐ उमे इहागच्छ। ॐ उमायै नमः। दक्षिणे। ॐ जये इहागच्छ ॐ जयायै नमः। वामे। ॐ विजये इहागच्छ। ॐ विजयायै नमः। इति पञ्चोपचारैः संपूज्य अपराजितलताहरिद्रापीतवस्त्रदूर्वाः सिद्धार्थकश्च देवोहृदि धृत्वा अभिलषितकामनावाप्तिपूर्वकयात्राविजयकामनया दक्षिणकरे धारयेदनेन।

ॐ चारुणा मुखपद्मेन विचित्रकनकोज्ज्वला।
जया देवी शिवे भक्त्या सर्वकामान् ददातु मे ॥
काञ्चनेन विचित्रेण केयूरेण विभूषिता।
जयप्रदा महामाया शिवभावितचेतसा ॥
विजया च महाभागा ददातु विजयं मम ॥
हारेण तु विचित्रेण भास्वत्कनकमेखला।

अपराजिता रुद्ररता करोतु विजयं मम ॥
ॐ सदापराजिते यस्मात् त्वं लतासूत्तमा स्मृता ।
सर्वकामार्थसिद्ध्यर्थं तस्मात्त्वां धारयाम्यहम् ॥
भवापराजिते देवि मम सर्वसमृद्धये ।
पूजितायां त्वयि श्रेयो ममास्तु दुरितं हतम् ॥
ॐ जयदे वरदे देवि दशम्यामपराजिते ।
धारयामि भुजे दक्षे जयलाभाभिवृद्धये ।
ॐ सदापराजिता त्वं हि लतानामुत्तमा स्मृता ।
यात्राविजयसिद्ध्यर्थं त्वामद्य धारयाम्यहम् ॥
त्वं देवि विश्वनिलये विश्वेषां हितकारिणि ।
धार॰ात्सर्वकामानां सिद्धिर्भवतु मे सदा ।
ॐ जयं देहि जगन्नाथे शत्रोश्चापि पराजयम् ।
त्वद्धारणाद् भवेयुर्मे धनधान्यसुतानि च ॥

इति मन्त्रेणाऽपराजिताधारणम् ॥ ततो नीराजनं कृत्वा ।
ॐ विधिहीनं भक्तिहीनं क्रियाहीनं यदर्चितम् ।
साङ्गं भवतु तत्सर्वं त्वत्प्रसादान्महेश्वरि ॥

ततो देव्याः शरीरे आवरणदेवतानां लीनतां विभाव्य घटोपरि जलं दत्त्वा ॐ ह्रीँ दुर्गे क्षमस्व । इति । ततः त्रिकोणमण्डलं कृत्वा संहारमुद्रया घटात् देव्याः पादयुगात्पुष्पमानीय स्वहृदये स्पर्शं कारयित्वा योनिमुद्रां प्रदर्श्य ॐ निर्माल्यवासिन्यै नमः । ॐ चण्डेश्वर्यै नमः इति पाद्यादिभिः निर्माल्यैश्च प्रपूजयेत् । ततो देव्याः आसनं धृत्वा पुष्पाञ्जलिमादाय पठेत् ॥

ॐ कृता पूजा मया भक्त्या कल्याणं कुरु मे सदा ।
भुक्त्वा भोगान् वरान् दत्त्वा कुरु क्रीडां यथासुखम् ॥
ॐ उत्तिष्ठ देवि चामुण्डे शुभां पूजां प्रगृह्य च ।
कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ॥
ॐ गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥
ॐ गच्छ गच्छ परं स्थानं यत्र देवो महेश्वरः ।
सम्वत्सरे व्यतीते तु पुनरागमनाय च ॥
गृहीत्वा शारदीं पूजां समस्तां शंकरप्रिये ।

गच्छ देवि महामाये अष्टाभिः शक्तिभिः सह ॥
यथाशक्ति कृता पूजा भक्त्या कमललोचने ।
साङ्गं भवतु तत्सर्वं त्वत्प्रसादान्महेश्वरि ॥

ॐ उत्तिष्ठ देवि चामुण्डे शुभां पूजां प्रगृह्य च ।
व्रज स्रोतोजले वृद्धयै स्थापितासि जले त्विह ॥

शक्नुवन्ति न ते पूजां कर्तुं ब्रह्मादयः सुराः ।
अहं किम्वा करिष्यामि मृत्युधर्मा नरोऽल्पधीः ॥
न जाने तेऽम्ब रूपं हि न च शक्ति नवा गुणम् ।
एकामेव हि जानामि भक्ति त्वच्चरणाब्जयोः ॥

तां भक्तिं हृदि संभाव्य शरदर्चां प्रगृह्य च ।
गच्छ देवि निजस्थानं भक्ति दत्त्वा वरान् वहून् ॥

ॐ दुर्गे दुर्गे महाभागे त्राहि मां शंकरप्रिये ।
महिषासुरमर्दोन्माथे प्रणतोऽस्मि प्रसीद मे ॥

ॐ कालि कालि महाकालि कालिके पापहारिणि ।
धर्मार्थमोक्षदे देवि नारायणि नमोऽस्तु ते ॥

ॐ संग्रामे विजयं देहि धनं देहि सदा गृहे ।
धर्मकामार्थसंपत्ति देहि देवि नमोऽस्तु ते ॥

महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
आयुरारोग्यविजयं देहि देवि नमोऽस्तु ते ॥

ॐ आयुर्ददातु मे काली पुत्रान्देहि सदाशिवे ।
धनं देहि महामाये नारसिंहि यशो मम ॥

ॐ राज्यं तस्य प्रतिष्ठा च तस्य लक्ष्मीः सदा स्थिरा ।
प्रभुत्वं तस्य सामर्थ्यं यस्य त्वं मस्तकोपरि ॥

ॐ धन्योऽहं कृतकृत्योऽहं सफलं जीवनं मम ।
आगतासि यतो दुर्गे माहेश्वरि मदाश्रमम् ॥

ॐ कृता पूजा मया भक्त्या नवदुर्गे सुरार्चिते ।
भुक्त्वा भोगं वरं दत्त्वा कुरु क्रीडां यथासुखम् ॥

ॐ मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं महादेवि परिपूर्णं तदस्तु मे ॥

ॐ गृहीतुं शारदीं पूजां मर्त्यमण्डलसंस्थिताम् ।
चण्डिके त्वां नमाम्यद्य स्वयमर्घ्यं प्रगृह्यताम् ॥

ॐ कायेन मनसा वाचा त्वत्तो नान्या गतिर्मम ।
अन्तश्चारेण भूतानां द्रष्ट्री त्वं परमेश्वरी ॥

ॐ सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

ॐ गम्यतामर्थलाभाय क्षेमाय विजयाय च ।
शत्रोर्दर्पविनाशाय पुनरागमनाय च ।
गच्छन्तु देवताः सर्वे दत्त्वा मे वरमीप्सितम् ।
त्वं गच्छ परमेशानि सुखं सर्वगणैः सह ॥

इति पुष्पाञ्जलिं दत्त्वा स्तुतिं कृत्वा देवीं संचाल्य सूर्य्यार्घ्यं दत्त्वा ।

ॐ यज्ञच्छिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम ।
तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥

ॐ अस्मिन् कर्मणि यद्वैगुण्यं जातं तद्दोषप्रशमनाय विष्णोः स्मरणमहं करिष्ये । ॐकारमुच्चरन्

ॐ यानि कानि च पापानि ब्रह्महत्यासमानि च ।
तानि तानि प्रणश्यन्तु प्रदक्षिणपदेपदे ॥

इति प्रदक्षिणं कृत्वा । कलशस्थितदेवताविसर्जनमावाहनपदेनैव कृत्वा ॐ जयन्ती मंगला कालीतिमन्त्रेण जयन्तीं छित्त्वा देव्यं जयन्तीं दत्त्वा दण्डवत् प्रणम्य ।

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्रयन्तु मरुतः सुदानवः इन्द्रप्राशूर्भवासचा ॥

ॐ साङ्गसायुधसवाहनसपरिवार ॐ भूर्भुवस्वर्भगवति श्रीदुर्गे पूजितासि प्रसीद क्षमस्व इति देव्या विसर्जनं विधाय पूर्वपूजितावाहित-निखिलदेवताविसर्जनं तत्तदावाहनपदेनैव कुर्य्यात् । (१) ततो

---

(१) सूर्य्यास्तसमये विष्णुं स्मृत्वा देव्याः मूर्तिं जले प्रवाहयेत् । ॐ निमज्ज्यांभसि संपूज्य देव्या मूर्त्ति यथाविधि । पुत्रायुर्धनवृद्ध्यर्थं स्थापितासि जले मया ॥

भूयसीसकलारिष्टदानं कृत्वा दक्षिणां दद्यात् ।। ॐ कृतैतदाश्विनशुक्ल-प्रतिपदारभ्य दशमीपर्यन्तं कलशस्थापनगणेशादिनवग्रहोपग्रहक्षेत्रपाल-वाहनसिंहासननवदुर्गानवचण्डिकानवपत्रिकाङ्गशस्त्रादिपूजापूर्वकसाङ्ग-सायुधसवाहनसपरिवारश्रीदुर्गापूजाप्रतिष्ठार्थमेतावद्द्रव्यमूल्यकहिरण्य-मग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे ।।

(अथजयन्तीधारणम्)

ॐ त्वं देवि विश्वनिलये विश्वेषां हितकारिणि ।
धारणात्सर्वकामानां सिद्धिर्भवतु मे सदा ।।
ॐ जयन्देहि जगन्नाथे शत्रोश्चापि पराजयम् ।
त्वद्धारणाद भवेयुर्मे धनधान्यसुतानि च ।।
ॐ जयन्ति जयरूपासि जगतां हितकारिणि ।
धारयामि दशम्यां त्वां चतुर्वर्गप्रदा भव ।।
ॐ जयन्ती मंगला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा नमोऽस्तु ते ।।

(अथाभिषेकः)

अथ कलशजलेन पञ्चपल्लवैरभिषेकं कुर्य्यात् । तद्यथा—
ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ।।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान यमो वै निऋ तिस्तथा ।।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ।
ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा ।।
कीर्तिर्लक्ष्मीर्धृतिर्मेधाः पुष्टिः श्रद्धा दया मतिः ।
बुद्धिर्लज्जा वपुश्शान्तिस्तुष्टिः कान्तिश्च मातरः ।।
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ।।
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ।
देवदानवगन्धर्वा यक्षराक्षसकिन्नराः ।।
ऋषयो मनवो गावो देवमातर एव च ।

देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ।
अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च ॥
औषधानि च रत्नानि कालस्यावयवाश्च ये ॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥
ॐ क्षेमंकरी महाकाली चानिरुद्धा सरस्वती ।
मातङ्गी चान्नपूर्णा च राजराजेश्वरी तथा ॥
एतास्त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ।
ॐ उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ॥
चंडा चंडवती चैव चण्डरूपातिचण्डिका ।
उग्रदंष्ट्रा महादंष्ट्रा शुभदंष्ट्रा कपालिनी ॥
भीमनेत्रा विशालाक्षी मंगला विजया जया ।
एतास्त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥
ॐ असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः ।
कपाली भीषणश्चैव संहारोष्टो च भैरवाः ॥
पुरुषः प्रकृतिश्चैव विकारश्चैव षोडश ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥
नश्यन्तु प्रेतकूष्माण्डा राक्षसा दानवाश्च ये ।
विशाला गुह्यका भूताः अभिषेके ताडिताः ॥
रोगाः शोकाश्च दौर्बल्यं दारिद्र्यं चित्तविक्रिया ।
नश्यन्तु चापदः सर्वाः सम्पदः सन्तु सुस्थिराः ॥
अभिषेकेन चानेन पूर्णाः सन्तु मनोरथाः ।
ॐ अमृताभिषेकोऽस्तु । इति (१) अभिषेकविधिः ॥

---

(१) वैदिकाभिषेकमन्त्रास्तु—(संक्षेपतः) ॐ आपो हिष्ठा मयोभुवस्तान ऊर्जे दधातन । महेरणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयतेहनः । उशतीरिव मातरः ॥ तस्मा अरंगमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा चनः ॥ ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥ ॐ परीतोषिञ्चतासुतꣳसोमो य उत्तमꣳहविः । दधन्वां यो नर्यो-अप्स्वा३न्तरा सुषावसोममद्रिभिः ॥ ॐ संते तेयाꣳसि समुयन्तु वाजाः संवृष्ण्या-न्यभिमातिषाहः । आप्यायमानो अमृताय सोम दिविश्रवाꣳस्युत्तमा निधिष्व ॥

(अथ महिषबलिदानम्)

अथ स्वस्विवाचनं कृत्वा यजमानः बलिदानस्थानं गत्वा ॐ अपवित्रः पवित्रो वेत्यादिमन्त्रेण स्थानं सिक्त्वा पृथ्वीमावाहयेत् तद्यथा, पुष्पं गृहीत्वा कृताञ्जलिः पठेत् ।

ॐ आवाहयाम्यहं देवीं भूतधात्रीं सुलक्षणाम् ।
कामदां वैष्णवीमृद्धिं सिद्धिं सर्वत्र पूजिताम् ।।

शस्याढ्यां सुरभिं देवीं धात्रीं सर्वजनस्य च ।
चलत्पंकजसंयुक्तामिहागच्छ वसुन्धरे ।।

इहागच्छ धृते मेधे नानारत्नविभूषिते ।
वसुन्धरे महाभागे सशैलवनकानने ।।

शिवे कामदुघे नित्ये सर्वकामफलप्रदे ।
योगिनीभिः परिवृते सर्वभूतनिवासिनि ।।

रक्ष मां सर्वतो देवि स्थिरा भव सुशोभने ।
कृता पूजा मया भक्त्या बलिदानं यथाविधि ।।

स्थिरा भव सदा देवि गृहे कामप्रदा भव ।
इत्यावाह्य पुष्पं गृहीत्वा ध्यायेत् ।।

ॐ पद्मासनस्थां शशिमौलिरम्यां
दूर्वादलश्यामतमाङ्गयष्टिम् ।।
दैत्यारिपार्श्वं परिमर्दयन्तीं ।
वसुन्धरां तां वरदां स्मरामि ।।

महिषासुरयुद्धेषु सर्वदेवगणैः सह ।
कंपिता क्षोभिता पृथ्वि भज तुष्टिं वधेऽस्य तु ।।

क्षुराग्रक्षेपणात् क्षुण्णा पुरासीन्महिषस्य तु ।
इदानीं शोणितैस्तस्य स्निग्धा भव वसुन्धरे ।।

इदं ध्यानपुष्पं ॐ पृथिव्यै नमः । ॐ सर्वसहायै नमः । ॐ वसुन्धरायै नमः । इति पञ्चोपचारैः पूजयेत् । ततः ।

ॐ पशुपाशविनाशाय हेमकूटस्थिताय च ।
परावराय परमेष्ठिने हूँकाराय च मूर्तये ।।

इति पठित्वा ॐ ह्रः अस्त्राय फट् इति मंत्रेण महिषस्य सर्वाङ्गानि अवलोकयेत् । ॐ मेघाकारस्तम्भमध्ये महिषं बन्धय २ हूँ फट् स्वाहा । इति मन्त्रेण स्तंभे महिषं संयम्य । हरिद्रारागरंजितजलपूर्णं घटं पूजयेत् । तत्र नवदुर्गामावाह्य प्रत्येकं पञ्चोपचारैः पूजयेत् । यथा । ॐ कौमार्य्यैनमः । ॐ वैष्णव्यै नमः । ॐ ब्रह्माण्यै नमः । ॐ माहेश्वर्य्यै नमः । ॐ चामुण्डायै नमः । ॐ वाराह्यै नमः । ॐ ॐ इन्द्राण्यै नमः । ॐ अम्बिकायै नमः । ॐ क्लीँ सर्वलोकनिखिलपापक्षयाय ब्रह्मबोजस्वरूपाय दिव्यतेजसे दिव्यस्वरूपाय नमः । इति संपूज्य तज्जलेन छागपशुवत् महिषं स्नापयेत् ।

ॐ कावेरी यमुना गंगा करतोया सरस्वती इत्यादिमन्त्रेण । केवलमजस्नाने महेशानि इति ऊह्यम् ।

ततः ॐ महिषाय नमः इति पञ्चोपचारैः संपूज्य ॐ ऐँ ऐँ ह्रीँ ह्रीँ श्रीँ श्रीँ हूँ हूँ वरुणमण्डलाधिष्ठितविग्रहायै महिषरूपचण्डिकायै इमं महिषं प्रोक्षयामि स्वाहा । इति महिषं प्रोक्षयेत् । ततः

ॐ युवा सुवासाः परिवीत आगात् सउ स्रेयान् भवति जायमानः ।
तन्धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः ।

इति मन्त्रेण वस्त्रयुगं दत्त्वा शृङ्गमध्ये सिन्दूरमलक्तकं पट्टसूत्रं च दद्यात् । ततः रक्तमालं गृहीत्वा

ॐ महिषासुरयुद्धेषु त्वयापि कामरूपिणा ।
चित्रं तनुत्रयं दह्य कृतं युद्धं सुदारुणम् ॥
अतस्त्वद्वलिदानेन तुष्टा भवतु चण्डिका ।
महिष त्वं महाभाग धर्मवाहनविश्रुतः ॥
प्रियं धान्यं धनं देहि धर्मं चैव स्वभावतः ।
यथावाहं भवान् द्वेष्टि यथा वहसि चण्डिकाम् ॥
तथा मम रिपून् हंसि शुभं वह लुलापकः ।
यमस्य वाहनस्त्वन्तु वररूपधरोऽव्यय ॥
आयुर्वित्तं यशो देहि कासाराय नमोनमः ।
इदं रूपं परित्यज्य गन्धर्वत्वमवाप्नुहि ॥
ललाटे ते शिवो देवः शृङ्गयोः पार्वतीप्रियः ।
दुर्गायाः प्रीतिदत्तो हि शतं वर्षाणि निश्चितम् ॥

इति मन्त्रैः मालां दत्त्वा प्रणम्य। महिषाङ्गे अङ्गदेवतानां पूजा कार्य्या॥ तद्यथा॥ (ब्रह्मरन्ध्रे) ॐ ब्रह्मणे नमः। (नासिकायाम्) ॐ दामिन्यै नमः। (कर्णयोः) ॐ प्रकाशाय नमः। (जिह्वायां) ॐ सर्वमुखाय नमः। ॐ ज्योतिर्भ्यो नमः। (मुखे) ॐ विष्णवे नमः। (ललाटे)। ॐ चन्द्रमसे नमः (दक्षगंडे) ॐ शक्राय नमः। (वामगंडे) ॐ वह्निहृदयाय नमः। (ग्रीवायाम्) ॐ सोमवर्तिने नमः। (केशाग्रे) ॐ निर्ऋतये नमः। (भ्रू मध्ये) ॐ प्रचेतसे नमः। (नासामूले) ॐ श्वसनाय नमः। (स्कन्धे) ॐ धनेश्वराय नमः। (हृदये) ॐ सर्पराजाय नमः। इति पञ्चोपचारैः पूजयेत्॥ ततः स्तम्भं पूजयेत्॥ ॐ स्तंभाय नमः। इति पञ्चोपचारैः पूजयित्वा पुष्पाञ्जलिमादाय।

ॐ स्तंभ त्वं स्थाणुरूपोऽसि ब्रह्मणा निर्मितः पुरा॥
अतस्त्वां पूजयाम्यद्य पशुबन्धनहेतवे॥
ॐ स्तंभमूले वसेद् ब्रह्मा स्तंभमध्ये च माधवः।
स्तंभाग्रे च स्वयं रुद्रस्तस्मात्त्वमचलो भव॥
ॐ यथाचलो गिरिर्मेरुः हिमवांश्च यथाचलः।
यथाचला नगाश्चान्ये तथा त्वमचलो भव।
ॐ सर्वे देवाः सगन्धर्वाः सयक्षोरगराक्षसाः।
तव सान्निध्यमायान्ति तस्मात्त्वमचलो भव॥

ततः ॐ पाशाय नमः। इति पाशं संपूज्य प्रार्थयेत्।

ॐ पाश त्वं वरुणाज्जातः सदा वरुणदैवतः।
अतस्त्वां पूजयाम्यद्य तस्माच्छान्तिं प्रयच्छ मे॥
त्वं साक्षी भगवान् देवः सर्वशत्रुनिवर्हणः।
पूज्योऽसि सर्वभूतानां पाश सिद्धिं कुरुष्व मे।

ततः कुशत्रयतिलजलान्यादाय ॐ अद्येत्यादि अमुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रस्यामुकशर्मणः सदारापत्यस्य सबलवाहनस्य वर्षशतकावच्छिन्नसाङ्गसायुधसवाहनसपरिवारश्रीदुर्गादेवताप्रीतिकामनया इमं महिषं यमदैवतं तुभ्यमहं संप्रददानि। एवमुत्सृज्य पुष्पाञ्जलिमादाय प्रार्थयेत्।

ॐ असुरयोनिप्रसूतोऽसि पूजाहोमादिकर्मणि।
तुष्टा भवतु सा देवी समांसै रुधिरैस्तव॥

कुरु मम रिपुनाशं काम्यसिद्धिं च ऋद्धिम्
हर हर मम दुःखं सर्वपापं कुबुद्धिम् ।
भवतु तव वधो मे भक्तितः पूजितस्य
कुरु भुवि मम सिद्धिं सर्वयज्ञव्रतानाम् ॥

ततः महिषस्य कर्णे ॐ पशुपाशाय विद्महे विश्वकर्मणे धीमहि । तन्नो महिषः प्रचोदयात् ॥ इति पशुगायत्रीं जप्त्वा । ॐ ह्रीँ श्रीँ निखिलब्रह्माण्डखण्डरूपं बलिं गृह्ण २ स्वाहा । इति मन्त्रेण बलिं देव्यै समर्प्य । पूर्ववत् खड्गं संपूज्य ॐ ऐँ श्रीँ इमं महिषं महामोक्षं कुरु २ गृह्ण गृह्ण स्वाहा । इति मन्त्रेण महिषग्रीवायां खड्गस्पर्शं कुर्य्यात् । ततः अञ्जलिं बद्ध्वा प्रार्थयेत् ।

ॐ खड्गपातोद्भवं दुःखं विनिर्जित्य पशूत्तम ॥
देवीवरप्रसादेन मामात्मानं च तारय ।
ॐ यमस्य वाहनत्वेन ख्यातस्त्वमसि कासर ।
वसतः शृङ्गयोरङ्गे मृत्युकालौ सदा तव ॥
भवानेव परिद्वेष्टि जवनाँस्तुरगानपि ।
तव रूपं समास्थाय रंभासुरसुतः पुरा ॥
त्वत्तो नान्यो बलिः कश्चित् देव्याः प्रीतिप्रदायकः ।
अतो ददामि देव्यै त्वां भक्तियुक्तेन चेतसा ।
मयि कल्याणमाधाय गच्छ दानव सद्गतिम् ॥
भगवत्या समं युद्धं कृतवानपमोहितः ।
देव्या त्वं निहितश्चासि तथाक्रान्तं शिरस्तव ॥
वहस्यतश्चण्डिकां त्वं सिरसा भंगुरेण वा ॥

इति महिषं संप्रार्थ्य देवीं प्रार्थयेत् ॥

ॐ जलदसदृशवर्णं चारुविस्तीर्णकर्णम्
धरणिधरसमाङ्गं दीर्घतीक्ष्णाग्रशृङ्गम् ।
वलिमिव सुपुनीतं चण्डि मेध्यं गृहीत्वा
भगवति मम नित्यं राजलक्ष्मीं विधेहि ॥

ततः ॐ क्रीँ फट् इति मन्त्रेण खड्गं गृहीत्वा

ॐ दैवे पैत्रे च सुभगः खड्गस्त्वं खड्गसन्निभः ।
छिन्धि विघ्नान् महाभाग गहानन नमोऽस्तु ते ॥

अनेन खड्गं समर्पयेत् । ततो महिषं छित्वा छागपशुवत् समांसरुधिरं शिरश्च निवेद्य महादेव्यै पुष्पाञ्जलिं दद्यात् ॥ इति महिषबलिः ॥ ॐ॥

(अथ कुमारीविशेषपूजा)

अथ महानवम्यां सुलक्षणां (१) नववर्षावधिकां दुर्गारूपां कुमारिकामानीय विशुद्ध जलेन स्नापयित्वा यथाविधि पूजां कुर्य्यात् । तत्र प्रथमं कुशत्रयतिलजलजान्यादाय संकल्पं कुर्य्यात् । ॐ अद्याश्विने मासि शुक्ले पक्षे महानवम्यां तिथौ अमुकगोत्रस्यामुकशर्मणः सपरिवारस्योपस्थितशरीराविरोधेन धनधान्यसमृद्धिसुखसौमनस्यपुत्रादिनिखिलमनोरथप्राप्तिपूर्वकसाङ्गसायुधसवाहनसपरिवारभगवतीश्रीदुर्गारूपकुमारिकापूजनमहं करिष्ये । इति सकल्प्य पुष्पं गृहीत्वा आवाहयेत् ।

ॐ मन्त्राक्षरमयीं देवीं मातॄणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥
ॐ जगत्पूज्ये जगन्मातः सर्वशक्तिस्वरूपिणि ।
पूजां गृहाण कौमारि कृपयाद्य नमोऽस्तु ते ॥
त्रिपुरां त्रिपुराधारां त्रिवर्षां ज्ञानरूपिणीम् ।
त्रैलोक्यवन्दितां देवीं त्रिपुरां पूजयाम्यहम् ।
कालात्मिकां कलातीतां कारुण्यहृदयां शिवाम् ।
कल्याणजननीं देवीं कल्याणीं पूजयाम्यहम् ॥
अणिमादिगुणाधारां अकाराद्यक्षरात्मिकाम् ।
अनन्तशक्तिकां लक्ष्मी रोहिणीं पूजयाम्यहम् ॥
कामचारीं शुभां कान्तां कालचक्रस्वरूपिणीम् ।
कामदाँ करुणाधारां कालिकां पूजयाम्यहम् ॥
चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जनीम् ।
पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम् ॥
सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ।
सर्वभूतात्मिकां देवीं शांभवीं पूजयाम्यहम् ॥

---

(१) तदुक्तं वाडवानलीये—उत्तमा सा परिज्ञेया सप्ताष्टनवहायना । मध्यमा पञ्चवर्षा च षडब्दा दशहायना । एकद्वित्रिचतुर्वर्षा रुद्राब्दाद्याऽवरा स्मृता ॥

दुर्गमे दुस्तरे कार्य्ये भवदुःखविनाशिनीम् ।
पूजयामि सदा भक्त्या दुर्गां दुर्गतिहारिणीम् ।।
सुन्दरीं सर्ववर्णाभां सुखसौभाग्यदायिनीम् ।।
सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम् ।।

इति संप्रार्थ्य पाद्यादिकं सर्वोपचारमर्घ्यं स्नानीयमाचमनीयम् चन्दनम् सिन्दूरम् अक्षतं धूपं दीपं नैवेद्यं मालाम् ॐ नवदुर्गात्मिकायै कुमारिकारूपिण्यै श्रीदुर्गादेव्यै नमः ।। एवं सर्वं दत्त्वा कृताञ्जलिः प्रार्थयेत् ।।

ॐ समस्तजगतामाद्ये जगदाधाररूपिणि ।
कुमारीरूपमास्थाय प्रविशेदं गृहं मम ।।
भवत्याः कीदृशं रूपं जाने मातरहं नहि ।
कुमारीरूपमेवेदं पश्यामि नरचक्षुषा ।।
भक्तिं मदीयां विज्ञाय त्वत्पादाम्बुजयोः सदा ।
त्वया प्रकटितं रूपमीदृशं सर्वसिद्धये ।।
दृष्टिः कार्य्या न मे पापे संचारेणासतः पथः ।।
दृढा भक्तिः प्रदातव्या केवलं सुरवन्दिते ।।

इति संप्रार्थ्य भोजनस्थानं तामानीय पायसादिपरमान्नं नानोपचारसहितं मिष्टान्नादिदिव्यभोजनं भक्त्या कारयेत् । ततः हस्तपादौ प्रक्ष्याल्य सुवासितपानीयं जलं ताम्बूलं समर्प्य वस्त्रं दत्त्वा अञ्चले सद्रव्यतण्डुलं च दत्त्वा कृताञ्जलिः प्रणमेदनेन ।।

ॐ जय कालि महाभीमे भीमरावे भयापहे ।
संसारदावाग्निशिखे वृजनार्णवतारिणि ।।
ब्रह्मेन्द्रोपेन्द्रभूतेशप्रभृत्यमरवन्दिते ।
सर्गपालनसंहारकारिण्यहितनाशिनि ।।
गुह्यकालि परानन्दरसपूरितविग्रहे ।
परब्रह्मरसास्वादकैवल्यानन्ददायिनि ।।
गुणातीतेऽपि सगुणे महाकल्पान्तनर्तकि ।
कुमारीरूपमास्थाय विज्ञाप्रज्ञास्वरूपिणि ।।
आगतासि ममागारं शारद्यर्चासमाप्तये ।
साम्वत्सरिककल्याणसूचनाय तथैव च ।।
धन्योऽस्मि कृतकृत्योऽस्मि सफलं जीवितं मम ।

यस्मात्त्वमीदृशं रूपं कृत्वा कौमारमुत्तमम् ।।
गुह्यकालि समायाताऽब्दिकपूजाजिघृक्षया ।
त्वमेवैतेन रूपेण देवेभ्यः प्रार्थिता पुरा ।।
दत्तवत्यसि साम्राज्यं वरानपि समीहितान् ।
मह्यमप्यद्य देवेशि वरं देहि सुपूजिता ।।
नमस्ते भगवत्यम्ब नमस्ते भक्तवत्सले ।
नमस्ते जगदाधाररूपिणि त्राहि मां सदा ।।
मातरं वेद्मि रूपं ते न शरीरं न वा गुणम् ।
भक्त्या हृत्स्थितया पूजां तव जानाम्यनन्यधीः ।।
त्वं माता त्वं पिता बन्धुस्त्वमेव जगदीश्वरि ।
त्वं गतिः शरणं त्वं हि स्वर्गस्त्वं मोक्ष एव च ।।
विहाय त्वं जगन्मातर्नान्यां जानामि देवताम् ।
नमस्तेऽस्तु नमस्तेऽतु नमस्तेऽस्तु नमोनमः ।।

इति प्रणम्य द्रव्यदानादिभिः प्रसाद्य विसर्जयेत् । इतिकुमारीपूजा ।। महाष्टम्यां महानवम्याञ्च यथोक्तकल्पेन शतचण्डीविधानेन वा होमं कुर्य्यात् । भूयसीसकलारिष्टदानञ्च कुर्य्यात् ।

इति मिथिलामण्डलान्तर्गतप्रसिद्धमङ्गलवनीग्रामस्थानेकप्राचीन-विद्वद्वरसंगृहीतादर्शपुस्तकमवलोक्य संगृह्य च श्रीदुर्गाचरणकमलचञ्च-रीकश्रीमान्माननीयकुमारश्रीरमानन्दसिंहमहोदयाज्ञप्तसठक्कुरश्रीतारान-न्दशर्म्मसमाज्ञया सङ्कलितेयं शारदीयश्रीदुर्गापूजापद्धतिः मङ्गलवनी-ग्रामवासिना पण्डितश्रीताराचरणशर्म्मणाऽऽश्विनकृष्णैकादश्यां रवौ (शाके १८४८ सम्वत् १९८३) ।।

हवनविधिः

अथ होता कुण्डस्थण्डिलं वा कुशैः परिसमुह्य गोमयेनोपलिप्य तत्र प्रागग्रा उदगग्राश्च तिस्रो रेखाः कुशमूलेन सँल्लिख्य ताभ्यः किञ्चिन्मृद्भागमुद्धृत्य जलेनाभ्युक्ष्य काँस्यपात्रेणाग्निमुपसमाधाय तं यथाविधि पञ्चोपचारैः सम्पूज्य ॐ दुर्गे दुर्गे रक्षिणि स्वाहेति मूलमन्त्रं समुच्चार्य तत्रानन्दमयीं तेजोरूपां परमां शक्तिम्भगवतीं सशिवां दुर्गां ध्यात्वाञ्जलिम्बद्ध्वा पठेत्—

ॐ प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥
ॐ जगद्धात्रि महामाये सर्वशत्रुक्षयङ्करि।
होमद्रव्यं गृहाणाम्ब वह्न्यास्येन महेश्वरि ॥

ततः सङ्कल्पं कृत्वा समिद्धतमेऽग्नौ ॐ भूः स्वाहा, ॐ भुवः स्वाहा, ॐ स्वः स्वाहा—इति व्याहृतित्रयेण घृताहुतीर्दत्त्वा ॐ हिरण्यवर्णांᳬहरिणीमित्यादि श्रीसूक्तेन, ऐं ह्रीं क्लीं चामुण्डायै विच्चे इति यथासंख्यकनवार्णमन्त्रेण वा होमं कुर्यात्। ततः उत्थाय पर्णपूगद्र०ᳵवस्त्राऽऽवेष्टितनारिकेलफलसमन्वितेन घृतपूर्णस्रुवेण पूर्णाहुतिं दद्यादनेन—

ॐ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम्।
कविᳬसम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः स्वाहा ॥

ॐ दुर्गे दुर्गे रक्षिणि स्वाहा ॥ ततः संहारमुद्रया भगवतीं हृदये समानीय क्षमस्वेति विसृज्य स्रुवेण भस्मानीय दक्षिणकरानामिका-गृहीतभस्मना त्र्यायुषं कुर्यादनेन—ॐ त्र्यायुषं यमदग्नेः (इति ललाटे), ॐ कश्यपस्य त्र्यायुषम् (इति ग्रीवायाम्), ॐ यद्देवेषु त्र्यायुषम् (इति दक्षिणबाहुमूले), ॐ तन्मे[1] अस्तु त्र्यायुषम् (इति हृदि)। ततो होमकर्मदक्षिणां दद्यादिति होमविधिः ॥

---

१. स्वपक्षे तन्मे अस्तु त्र्यायुषमिति। अन्यपक्षे तु—तत्ते अस्तु त्र्यायुषमित्यूह्यम्।

श्रीहनुमद्ध्वजदानपद्धतिः

शारदीयनवरात्रपूजायां चैत्रमासीयवासन्तीनवरात्रपूजायां चान्यस्मिन् शुभे दिने वा मिथिलायां हनुमद्ध्वजदानपरम्परा वर्तते। सामान्यतो नवम्यां तिथौ विधिरयं सम्पद्यते—तत्र शनि-भौमान्यतरदिनप्राप्तिर्महत्त्वपूर्णा जायते।

विधिरयं मध्याह्ने सम्पद्यमानो जायते। भगवत्याः स्थानेषु प्राङ्गणैकभागे स्वकीयनिवास-स्थानस्य प्राङ्गणैकभागेऽग्निकोणे ईशानकोणे अश्वत्थवृक्षमूलसमीपे वा हनुमद्ध्वजदानं कर्तव्यम्। परम्परा चेयमेव।

तत्र पूजास्थानं गोमयेनोपलिप्य सपादहस्तपरिमितं गर्त्तं खनित्वा तन्निकटे पूजां कुर्यात्। सर्वप्रथमं ध्वजयोग्यं हरितवंशमानीय तं रक्तपताकान्वितं सिन्दूरपिष्टादिनाऽलङ्कृतं च कुर्यात्।

यथा— सरलश्छिद्ररहितो निर्व्रणो मूलसंयुतः।
सिन्दूरपिष्टलिप्ताङ्गो रक्तवस्त्रपताककः॥
अनुच्छिष्टोऽनुल्लङ्घितः साग्रमूलो ध्वजो यतः।
कुजवारे नवम्यां वाऽन्यस्यां शुभतिथौ दिने॥
सार्धयामोत्तरे काले ध्वजदानविधिः शुभः।

तत्र प्रथमं संकल्पं कुर्यात् कुशत्रयतिलजालान्यादाय—

ॐ अद्यामुके मासि अमुकतिथौ अमुकगोत्रस्य अमुकशर्मणः (सार्वजनिकक्षेत्रे—एतद्ग्रामनिवासिनां नानानामगोत्राणां) उपस्थितशरीराविरोधेन सकलोपद्रवनिवृत्तिपूर्वकसकलमनोरथसिद्ध्यर्थं हनुमद्ध्वजदानं तदङ्गदेवतापूजनं चाहं करिष्ये (अन्यपक्षे करिष्यामि)।

ॐ भूर्भुवः स्वः सूर्यादिपञ्चदेवताः इहागच्छत इह तिष्ठतेत्यावाह्य सूर्यादिपञ्चदेवताभ्यो नमः इति पञ्चोपचारपूजां कुर्यात्।

एवमेव सर्वत्रावाहनं पूजां च कुर्यात्। ॐ भूर्भुवःस्वः ससीतरामलक्ष्मणौ इहागच्छतम् इह तिष्ठतम्-ससीतरामलक्ष्मणाभ्यां नमः।

ॐ भूर्भुवः स्वः वायो इहागच्छ इह तिष्ठ ॐ वायवे नमः।

ॐ नवग्रहाः इहागच्छत इह तिष्ठत ॐ नवग्रहेभ्यो नमः।

ॐ इन्द्रादिदशदिक्पालाः इहागच्छत इह तिष्ठत ॐ इन्द्रादिदशदिक्पालेभ्यो नमः।

ततः ताम्रपात्रे कदलीपत्रे वा रक्तचन्दनसिन्दूरादिना षट्कोणं यन्त्रं विलिख्य हनूमन्तं पूजयेत्।

प्रथमं पुष्पमेकं गृहीत्वा ध्यायेत्—

तप्तकाञ्चनसङ्काशहृदये निहिताञ्जलिः ।
किरीटिनं कुण्डलिनं ध्यायेद्वानरनायकम् ॥

ॐ हनुमन् इहागच्छ इह तिष्ठ, ॐ हनुमते नमः इति पञ्चोपचारैः सम्पूज्य माल्यं वस्त्रं च दत्वा, समोदकलड्डूकानि समर्पयेत्, पुनः पुष्पं गृहीत्वा—

ॐ नानागन्धसमायुक्तं देवतानां सुखावहम् ।
गृहाण कुसुमं देव वायुपुत्र सुखावह ॥

इति समर्पयेत् ।

ततः गर्ते ॐ पृथिवि इहागच्छ इह तिष्ठ ॐ पृथिव्यै नमः । इति संपूज्य गर्त्ते फलद्रव्याणि निक्षिपेत् ।

पुनः ॐ सपताकध्वज इहागच्छ इह तिष्ठेत्यावाह्य ॐ सपताकध्वजाय नमः इति संपूजयेत् ।

ततः

ॐ देवासुराणां सर्वेषां मङ्गलोऽयं महाध्वजः ।
गृह्यतां सुखहेतोर्मे ध्वजः श्रीपवनात्मज ॥

इति मन्त्रेण अमुं सपताकध्वजं श्रीहनुमते नमः इति समर्पयेत् ।

तदनन्तरं पुष्पाञ्जलिं गृहीत्वा—

ॐ अञ्जनीगर्भसंभूतं वायुपुत्रं महाबलिम् ।
सीताशोकविनाशाय सुग्रीवस्य सदाप्रियम् ॥
प्रणमामि सदा भक्त्या सर्वविघ्नविनाशनम् ।
रक्षोघ्नं वरदं शीघ्रं गदिनं सर्वकामदम् ॥
रामेष्टफाल्गुनसखं रणिनः सुखकारकम् ।
समुद्रलङ्घनं देवं कार्यसिद्धयै नमो नमः ॥

इति पुष्पाञ्जलिं समर्प्य रूपं देहीति मन्त्रेण वरं सम्प्रार्थ्य—

सपातकं ध्वजं गर्ते दत्वा पुनः मृत्तिकया आच्छाद्य आवाहितपूर्वान् पूजाक्रमेण विसर्जयेत् । ततो दक्षिणां कुर्यात् ।

ॐ अद्यकृतैतद्हनुमद्ध्वजदानप्रतिष्ठार्थमेतावद्द्रव्यमूल्यकहिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे ।

ततो यथाशक्ति ब्राह्मणान् भोजयेत्, लड्डूकादिकं च वितरेत् ।

इति हनुमद्ध्वजदानविधिः ॥

———

आश्विनशुक्लपूर्णिमायां कोजागरायां

श्रीलक्ष्मीपूजाविधिः

यत्र श्रीदुर्गामण्डपे नवरात्रपूजायां पूजिता लक्ष्मीप्रतिमा न प्रवाहिता तत्र तस्यामेव पूजा विधेया। यत्र लक्ष्मीप्रतिमा विसर्जिता तत्र नूतनां प्रतिमामानीय पूजा कर्तव्या।

स्वकीयगृहे च प्रतिमायां चित्रे पात्रे वा आवाह्य पूजा करणीया।

आश्विनशुक्लपूर्णिमायां सायंकाले कृतनित्यक्रियो यजमानः पूजास्थानमागत्य शुभासने उपविश्य पूजामारभेत।

तत्र सर्वप्रथमं—गणपत्यादिपञ्चदेवतां विष्णुं चावाह्य संपूज्य कुशत्रयतिलजलान्यादाय संकल्पं कुर्यात्।

ॐ अद्याश्विने मासि शुक्ले पक्षे कोजागरान्वितायां पूर्णिमायां तिथौ सायाह्ने अमुकगोत्रस्यामुकशर्मणः सपरिवारस्य सकलदुःखदारिद्र्य-निरासपूर्वकदीर्घायुष्ट्वारोग्यपुत्रपौत्रमहैश्वर्यसुखसम्पदाभिवृद्धिकुला-भ्युदयाद्यभीष्टसिद्धिपूर्वकलक्ष्मीन्द्रप्रीतिकामनयाऽङ्गदेवतापूजापूर्वक-श्रीलक्ष्मीपूजनमहं करिष्ये। (सामूहिकपूजापक्षे--एतद्ग्रामनिवासिनां नानानामगोत्राणां सपरिवाराणां इति योजयेत्, करिष्ये इति स्थाने करिष्यामि इति पठेत्)।

ततः पूजां प्रारभेत्।

ॐ हव्यवाहन इहागच्छ इह तिष्ठ, ॐ हव्यवाहनाय नमः।

ॐ पूर्णेन्दो इहागच्छ इह तिष्ठ, ॐ पूर्णेन्दवे नमः।

ॐ सभार्य रुद्र इहागच्छ इह तिष्ठ, ॐ सभार्यरुद्राय नमः।

ॐ स्कन्द इहागच्छ इह तिष्ठ, ॐ स्कन्दाय नमः।

ॐ नन्दीश्वरमुने इहागच्छ इह तिष्ठ, ॐ नन्दीश्वरमुनये नमः।

ॐ सुरभे इहागच्छ इह तिष्ठ, ॐ सुरभ्यै नमः।

ॐ निकुम्भ इहागच्छ इह तिष्ठ, ॐ निकुम्भाय नमः।

इति पञ्चोपचारः संपूज्य सत्यां प्रतिमायां—ॐ मनोजूतिरिति मन्त्रेण प्राणप्रतिष्ठां विधाय पुष्पं गृहीत्वा ध्यायेत् ।

ॐ या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी,
गम्भीरावर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मी दिव्यैः गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुम्भैः,
नित्यं सा पद्महस्ता वसतु मम गृहे सर्वमाङ्गल्ययुक्ता ।।

इति ध्यात्वा ॐ भूर्भुवः स्वः लक्ष्मि इहागच्छ इह तिष्ठेत्यावाह्य, एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि ॐ लक्ष्म्यै नमः इदमनुलेपनं, इदं रक्तानुलेपनं, इदं सिन्दूरं, इदमक्षतं ॐ लक्ष्म्यै नमः ।

पुष्पं गृहीत्वा

ॐ मन्दारपारिजाताद्यैरनेकैः कुसुमैः शुभैः ।
पूजयामि शिवे भक्त्या कमलायै नमोनमः ।।

एतानि पुष्पाणि ॐ लक्ष्म्यै नमः । इदं रक्तवस्त्रम् ॐ लक्ष्म्यै नमः । इदं विल्वपत्रम्, इदं माल्यम्, एष धूपः, एष दीपः, एतानि विविधनानाप्रकारनैवेद्यानि, इदमाचमनीयम्, इदं नारिकेलोदकं इदं नारिकेलफलं, इदं ताम्बूलम्, इदमाचमनीयं ॐ लक्ष्म्यै नमः । इदं सुगन्धितद्रव्यम्, इदं चामरं ॐ लक्ष्म्यै नमः । एवं क्रमेण यथासंभवविविधोपचारसहितं सर्वं वस्तु पृथक् पृथक् उक्तरीत्या सभक्ति समर्पयेत् । ततः पुष्पाञ्जलिमादाय—

ॐ नमस्ते सर्वभूतानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा भूयात् त्वदर्चनात् ।।

इति त्रिः पुष्पाञ्जलिं समर्पयेत् ।

रूपं देहीत्यादिना वरं संप्रार्थ्य ॐ हिरण्यवर्णां हरिणीमिति श्रीसूक्तमन्त्रैश्च यथासम्भवं पुष्पाञ्जलिमर्पयेत् ।

ततः—ॐ इन्द्र इहागच्छ इह तिष्ठ ॐ इन्द्राय नमः, ॐ कुबेर इहागच्छ इह तिष्ठ ॐ कुबेराय नमः ।

ॐ ऐरावतगज इहागच्छ इह तिष्ठ ॐ ऐरावतगजाय नमः इति पञ्चोपचारैः संपूज्य आरार्त्तिकं कुर्यात् । ततः कोजागरारात्रौ

नृत्यगीतवाद्यादिभिः जागरणं कुर्यात् । मिष्ठान्न-मखाननारिकेलफलं ताम्बूलादिकं च स्वबन्धुजनैः सह भुञ्जीत, सोल्लासं च रात्रिं यापयेत् ।

द्वितीयदिने प्रतिपत्तिथौ—प्रातः पुनः यथायोग्यं पूजामारात्तिकं च विधाय कुमारिका-ब्राह्मणादिभोजनं यथाशक्ति पायसेन मिष्ठान्नेन सह कुर्यात् ।

ततः आवाहितदेवतां तत्तत्-क्रमेणैव विसर्जयेत् । लक्ष्मीं च ॐ श्रीर्मयि रमस्वेतिशब्देन विसर्जयेत् । ततो दक्षिणां दद्यात् । ॐ कृतैतत् साङ्गसायुधसवाहनपरिवारश्रीमहालक्ष्मीपूजनकर्मप्रतिष्ठार्थमेतावद्-द्रव्यमूल्यकहिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणामहं ददे ।

इति कोजागरायां लक्ष्मीपूजा ।।

———

श्रीतारापूजापद्धतिः

श्री तारापूजा विशेषतो मिथिलायां सामान्यतो तिब्बत-चीनक्षेत्रे प्रसिद्धा वर्तते ।

इयं पूजा सामान्यतः कार्तिककृष्णामावास्यान्वितायां कालरात्रौ निशीथे सम्पद्यते, कुत्रचित् च कार्तिककृष्णचतुर्दश्यां रात्रौ निशीथेऽपि जायते व्यवहारात् ।

श्रीतारापूजाऽति महत्त्वपूर्णा कठिना च । इयं पूजा तैरेव सम्पद्यमाना संभाव्यते ये स्वयं पूजापटलपरिचिताः यथाशक्ति पूजां च कुर्वन्ति ।

अस्यां पूजायां सर्वप्रथमं सर्वन्यासादिकं यथाशक्ति श्रीदुर्गापूजापद्धतिरीत्यैव विधेयम् ।

सामान्यार्घ्यस्थापनं सति सम्भवे विशेषार्घ्यस्थापनं च पूर्वोक्तदुर्गापूजापद्धतिक्रमेणैव कर्तव्यम् ।

पूजारम्भपूर्वं भूतवलिं द्वारपूजां च विधिवत्पूर्वोक्तदुर्गापूजापद्धतिरीत्या विधायैव पूजा विधेया । इदमनिवार्यम् ।

उपर्युक्तपूजा-पूर्व-विधिसम्पादनानन्तरं पूजामारभेत् । ततः पुष्पं गृहीत्वा ध्यायेत् ।

ॐ प्रत्यालीढपदां घोरां मुण्डमालाविभूषिताम् ।
खर्वां लम्बोदरीं भीमां व्याघ्रचर्मावृतां कटौ ।।
नवयौवनसम्पन्नां पञ्चमुद्राविभूषिताम् ।
चतुर्भुजां ललज्जिह्वां महाभीमां वरप्रदाम् ।।
खड्गकर्तृसमायुक्तसव्येतरभुजद्वयाम् ।
कपालोत्पलसंयुक्तसव्यपाणियुगान्विताम् ।।
पिङ्गोग्रैकजटां ध्यायेन्मौलावक्षोभ्य भूषिताम् ।
वालार्कमण्डलाकारलोचनत्रयसंयुताम् ।।
ज्वलच्चितामध्यगतां घोरदंष्ट्रां करालिनीम् ।
सावेशस्मेरवदनां स्त्र्यलङ्कारविभूषिताम् ।
विश्वव्यापकतोयान्तःश्वेतपद्मोपरिस्थिताम् ।।

इति ध्यानपुष्पं समर्पयेत् ।

ततः करकच्छपिकया मुद्रया करकलितरक्तचन्दनवज्रपुष्पमिलित-दिनकरकिरणारुणकुसुमाञ्जलौ ध्यात्वा प्रवहन्नासापुटेनाञ्जलावानीय मूलेन कल्पितमूर्त्तावावाहयेत्—

ॐ देवेशि भक्तिसुलभे परिवारसमन्विते ।
यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव ।।

इति मूर्तौ चित्रे वा पुष्पं निःक्षिप्य आवाहनमुद्रया आवाह्य संस्थापनंमुद्रया इह तिष्ठ २ इह सन्निधेहि २ सम्मुखीकरणमुद्रया अवगुण्ठ्य परमीकरणमुद्रया परमीकृत्य नाराचमुद्रया छोटिकाभिस्ता-लत्रयेण दिग्बन्धनं कृत्वा अस्त्राय फडिति धेनुमुद्रया अमृतीकृत्य मत्स्य-मुद्रया आच्छाद्य चक्रमुद्रया संस्थाप्य लेलिहानमुद्रया जीवन्यासं कुर्यात् ।

तत्र प्रथमं मनोजूतिरिति वैदिकमन्त्रेण प्राणप्रतिष्ठां कृत्वा—ॐ आँ ह्रीँ क्लौं यं रं लं वं शं षं सं हं सः सोहं—तारादेवतायाः प्राणाः इह प्राणाः, एवमेव—ॐ आँ ह्रीँ—इत्यादिना जीव इह स्थितः, ॐ आँ ह्रीँ इत्यादिना ॐ तारा देव्याः—सर्वेन्द्रियाणि वाङ्मनः त्वक् चक्षुः-श्रोत्रघ्राण-प्राण इहागत्य सुखं तिष्ठन्तु स्वाहा । इति विधिवदावाहनं विधाय—

श्रीदुर्गापूजापद्धतिप्रदर्शितरीत्या संपूर्णां षोडशोपचारपूजां सविस्तरं तत्तन्मन्त्रेण कुर्यात् । "दुर्गे देवि" इति स्थाने "तारे देवि"—इति वक्तव्यम् ।

दुर्गापूजापद्धत्युक्तरीत्या विशेषनैवेद्यादिकं समर्पयेत् । निरन्तरं धूपदीपादिकं च वर्तेत ।

ततः आवरणपूजां कुर्यात् । ॐ श्रीँ स्वाहा श्रीमदेकजटे वज्र-पुष्पप्रतीक्ष्ये हुँ फट्—योनिमुद्रां प्रदर्श्य देवि आज्ञापय भगवत्याः परिवारान् पूजयामि ।

आग्नेये—ह्रीँ एकजटायै हृदयाय नमः । हृदयशक्तिपादुकां पूजयामि तर्पयामि नमः ।

ऐशान्यां—ॐ श्री तारायै शिरसे स्वाहा शिरःशक्ति पूजयामि तर्पयामि स्वाहा ।

नैर्ऋत्ये—ॐ वज्रोदके शिखायै वषट् । शिखाशक्ति पूजयामि तर्पयामि स्वाहा ।

वायव्ये—ॐ ह्रैं उग्रजटे कवचाय हुँ । कवचशक्ति पूजयामि तर्पयामि स्वाहा ।

अग्रे ॐ—ह्रौं महाप्रतिसरे नेत्रत्रयाय वौषट् । नेत्रशक्ति पूजयामि तर्पयामि स्वाहा ।

पृष्ठे—ह्रः पिङ्गोग्रैकजटे अस्त्राय फट् । अस्त्रशक्ति पूजयामि तर्पयामि स्वाहा ।

ततः—

ॐ अभीष्टवरदे देवि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इति देव्याः हस्ते जलं क्षिपेत् ।

ततो वायव्याग्नेयेशाननैर्ऋत्यकोणेषु गुरुपंक्ति पूजयेत् । यथा—

ॐ ऊर्ध्वकेशानन्दनाथ वज्रपुष्पं प्रतीक्ष्ये हूँ फट् स्वाहा । पादुकां पूजयामि तर्पयामि नमः ।

ॐ व्योमकेशानन्दनाथ०, ॐ नीलकण्ठानन्दनाथ० ॐ वृषध्वजानन्दनाथ०, ॐ वसिष्ठानन्दनाथ०, ॐ कूर्म्मानन्दनाथ०, ॐ भीमानन्दनाथ० ॐ महेश्वरानन्दनाथ०, ॐ रूपानन्दनाथ०, ॐ सुखानन्दनाथ०, ॐ परमानन्दनाथ०, ॐ पारिजातानन्दनाथ०, ॐ कुलेश्वरानन्दनाथ०, ॐ विरूपाक्षानन्दनाथ०, ॐ फेरविम्बानन्दनाथ०, ॐ तारावत्यम्बा०, ॐ भानुमत्यम्बा०, ॐ महोदर्य्यम्बा एताः गुरुपंक्तयः पूजिता स्नापिताः सन्तु सुप्रसन्नाः वरदाः भवन्तु ।

ततः क्रमशः निम्नाङ्कितदेवान् प्रणवेन सह सम्बोधनपदेनावाह्य चतुर्थ्यन्तपदेन पञ्चोपचारैः पूजयेत् । यथा—

रुद्राणी, उग्रा, भीमा, घोरा, भ्रामरी, महारात्रि, भैरवी, वैरोचन, पद्मनाभ, असिताभ, शङ्खपाण्डुर, नामकण्ठ, यामक, पाण्डुर, तारक, पद्मान्तक, यमान्तक, विघ्नान्तक, नरान्तक, गणपति, वटुकभैरव, क्षेत्रपाल, योगिनी, इन्द्रादिदशदिक्पाल, नवग्रह, खड्ग, कमल, कर्त्री, खर्पर ।

ततः—कामरूपपीठं, पूर्णगिरिपीठं, कामाख्यापीठं, वाराणसीपीठं, अयोध्यापीठं, काञ्चीपीठं, मधुपुरीपीठं, उड्डीयमानपीठं चावाह्य पूजयेत् ।

ततः—रत्नवेदिकां, मणिपीठं, शवं, शवमण्डपं, धूम्रं, ज्ञानं, वैराग्यं, ऐश्वर्यं चावाह्य पूजयेत् ।

ततः ॐ अर्कमण्डलाय द्वादशकलात्मने, ॐ सोममण्डलाय षोडशकलात्मने, ॐ वह्निमण्डलाय दशकलात्मने, सं सत्वाय, रं रजसे, तं तमसे, आं आत्मने रत्यै, प्रीत्यै, कान्त्यै, कामिन्यै, काममानिन्यै, कन्दर्पदलन्यै, भवान्यै, दुर्गायै, परायै, अपरायै, परापरायै, कुलायै, कुरुकुलायै, सदाशिवमहाप्रेतपद्मासनाय—प्रणवसहितसम्बोधनपदेनावाह्य चतुर्थ्यन्तोक्तपदेन पूजयेत् ।

ततः पुनः—श्रीमहाकालीं, श्रीमहालक्ष्मीं, श्रीमहासरस्वतीं, श्रीमहाकालाक्षोभ्यऋषिं, श्रीमदेकजटां, श्रीमदुग्रतारां, श्रीमन्नीलसरस्वतीम्, श्रीतारिणीम् चावाह्य विधिवत् पूजयेत् ।

महासप्तमीकृत्ये दुर्गापद्धत्युक्त–अष्टभैरवाः, नवभैरव्यश्च पूज्याः ।

यथाशक्ति स्तोत्रपाठं, ताराशतनामसहस्रनामादिपाठं मूलमन्त्रजपं च कुर्यात् ।

ततः श्रीदुर्गापूजापद्धतौ प्रदर्शितदिशैव—छागवलिदानं विधिवत् स्थिरचित्तेन कुर्यात् ।

ततो नीराजनं विधाय प्रसादभक्षणादिकं च विधेयम् ।

ततोऽन्नकूटभोजनम् ।

परम्परानुसारमस्यां पूजायां—कृतवलिदानेन सह अतिविस्तृतं सामिषं भोज्यपदार्थमाकलय्य निशीथान्ते (प्रायः त्रिवादनसमये) तत्रैव पूजामण्डपप्राङ्गणे स्वकीयप्राङ्गणे वा समुपस्थितैः सर्वैं जनैः वन्धुभिश्च साकं सकलभेदभावरहितं विशिष्टान्नकूटभोजनं कर्तव्यं कारयितव्यं च ।

पुनः प्रातः सर्वं पूजनं पूर्ववत् विधाय, कुमारिकां यथाशक्ति भोजयेत् ।

आवाहितदेवतां च पूजाक्रमेणैव विसर्जयेत्, प्रतिमां च जले प्रक्षेपयेत् ।

दीपमालासमन्वितायामस्यां कालरात्रावपि नृत्यगीतवाद्यादिभिः जागरणं कुर्यात् ।

इति तारापूजापद्धतिः ।।

श्रीश्यामापूजापद्धतिः

कार्तिककृष्णामावास्यायाः रात्रौ निशीथे इयं पूजा भवति। इयममावास्या निशीथव्यापिनी ग्राह्या। इयमेव कालरात्रिः कथ्यते। अद्यैव दीपावली जायते, इयं सुखरात्रिशब्देनापि व्यवह्रियते।

अद्य सायंकाले श्रीमहालक्ष्मीपूजा च संजायते।

श्रीदुर्गास्थाने स्वगृहेऽन्यत्रापि प्रशस्तस्थाने श्रीकालिकायाः मूर्ति संस्थाप्य चित्रे वा पूजा विधेया।

दीपमालिकाप्रदीप्तसान्ध्यवेलात एव उल्काभ्रमण-लक्ष्मीपूजनादिकं सोत्साहं सम्पादनीयम्।

निशीथे विधिवत् श्री श्यामापूजा कर्तव्या।

तत्र सर्वप्रथमं कृतनित्यक्रियो यजमानः सोपवासः पूजास्थानमागत्य पूजोपकरणमानीय पूजामारभेत।

तत्र अङ्गन्यासकरन्यासभूतशुद्धयादिकं च यथाशक्ति श्रीदुर्गापूजापद्धतिप्रदर्शितरीत्या विधायैव पूजा कर्तव्या।

सामान्यार्घ्यस्थापनं, सति संभवे विशेषार्घ्यस्थापनं च पूर्वोक्तरीत्यैव कर्तव्यम्।

पूजारम्भपूर्वं दुर्गापद्धत्युक्तदिशा सविधि भूतबलिं दत्वा भूतानि निःसारयेयुः। इदमनिवार्यम्।

तदनन्तरं पूर्वोक्तपद्धतिरीत्या सविधि कलशस्थापनं कुर्यात्।

ततो मुख्यपूजामारभेत।

पुष्पमादाय—

ॐ करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम्।
दक्षिणां कालिकां दिव्यां मुण्डमालाविभूषिताम्।
सद्यश्छिन्नशिरःखड्गवामाधोर्ध्वकराम्बुजाम्॥
महामेघप्रभां श्यामां तथा चैव दिगम्बराम्।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्चिताम्॥
कर्णावतंसतानीतशवयुग्मभयानकाम्।
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम्॥
शवानां करसंघातैः कृतकाञ्चीं हसन्मुखीम्।
सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम्॥

घोररावां महारौद्रीं श्मशानालयवासिनीम् ।
बालार्कमण्डलाकारां लोचनत्रितयान्विताम् ।।
दन्तुरां दक्षिणव्यापिमुक्तालम्बिकचोच्चयाम् ।
शवरूपमहादेवहृदयोपरिसंस्थिताम् ।।
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम् ।
महाकालेन च समं विपरीतरतातुराम् ।।
सुखप्रसन्नवदनां स्मेराननसरोरुहाम् ।
एवं संचिन्तयेत् कालीं धर्मकामार्थमोक्षदाम् ।।

इदं ध्यानपुष्पं ॐ दक्षिणकालिकायै नमः । ततो मनो जूतिरिति मन्त्रेण प्रतिमायां प्राणप्रतिष्ठां विधाय ॐ भूर्भुवः स्वः दक्षिणकालिके इह सुप्रतिष्ठिता भव ।

ततः प्रथमं

महाकालं यजेत् पूर्वं दक्षिणे धूम्रवर्णकम् ।
बिभ्रतं दण्डखट्वाङ्गौ दंष्ट्राभीममुखं शिवम् ।
व्याघ्रचर्मावृतकटिं तुन्दिलं रक्तवाससम् ।।
त्रिनेत्रमूर्ध्वकेशंश्च मुण्डमालाविभूषणम् ।
जटाभीषणसच्चन्द्रखण्डंतेजो ज्वलन्निव ।।

इदं ध्यानपुष्पं महाकालभैरवाय नमः ।

ॐ मनो जूतिमन्त्रेण महाकाले प्राणप्रतिष्ठां विधाय पञ्चोपचारैः पूजयेत् ।

ततः दुर्गापूजोक्तविधानेन संपूर्णां षोडशोपचारपूजां विधिवत् विधाय—

दुर्गे दुर्गे महाभागे–इति स्थाने "श्यामे श्यामे महाभागे", तथा "श्यामे देवि महामाये"–इति दुर्गापद्धत्युक्तविशिष्टपुष्पाञ्जलिमन्त्रैः पुष्पाञ्जलिं दद्यात् ।

ततः आवरणपूजामारभेत—

ॐ क्लां हृदयाय नमः, ॐ क्लीं शिरसे नमः, ॐ क्लूं शिखायै नमः, ॐ क्लैं कवचाय नमः, ॐ क्लौं नेत्रत्रयाय नमः, ॐ क्लः अस्त्राय नमः–इति सम्बोधनपदेनावाह्य चतुर्थ्यन्तपदेन पूजयेत् । ततः प्रणवसहितं सम्बोधनपदेनावाह्य चतुर्थ्यन्तपदेन निम्नाङ्किताः देव्यः पूज्याः—काली, कपालिनी, कुल्ला, कुरुकुल्ला, विरोधिता, विप्रचिता, उग्रा, उग्रप्रभा, दीप्ता, नीला, घना, बलाका, मात्रा, मुद्रा, मिता ।

ततोऽष्टमातॄः पूजयेत्—

ॐ ब्रह्माण्यै नमः, ॐ नारायण्यै नमः, ॐ माहेश्वर्यै नमः, ॐ चामुण्डायै नमः, ॐ कौमार्यै नमः, ॐ अपराजितायै नमः, ॐ वाराह्यै नमः, ॐ नारसिंह्यै नमः।

ततोऽष्टभैरवान् नवभैरवोश्च दुर्गापूजापद्धतिविधिना पूजयेत्। ततः—वज्र, शक्ति, दण्ड, खड्ग, पाश, अङ्कुश, गदा, त्रिशूल, चक्र, पद्म-नामकानस्त्रांश्च सम्बोधनपदेनावाह्य चतुर्थ्यन्तपदेन पूजयेत्।

ततः रक्तपुष्पमादाय "ॐ क्लीं हूँ स्त्रीं ह्रीं फट् स्वाहा दक्षिण-कालिकायै कुल्लुकायै नमः" इति मन्त्रेण स्वमूर्ध्नि पुष्पं धारयेत्। पुनः खं खड्गाय नमः, मुं मुण्डाय नमः, ॐ अं अभयाय नमः, ॐ वं वराय नमः, इति पञ्चोपचारैः पूजयेत्।

पुनः पुष्पमादाय-

ॐ तुषारस्फटिकश्याम नीलकृष्णारुणास्तथा।
वरदाभयधारिण्यः प्रधानतनवः स्त्रियः॥

इति ध्यात्वा ॐ हृदयदेवता इहागच्छ इह तिष्ठ-ॐ हृदयदेवतायै नमः, एवंक्रमेण शिरोदेवतायै नमः, शिखादेवतायै नमः, कवचदेवतायै नमः, नेत्रत्रयदेवतायै नमः, अस्त्रदेवतायै नमः इति प्रणवसहितसम्बो-धनपदेनावाह्य पूजयेत्।

ततः ॐ महादेव्यम्ब इहागच्छ इह तिष्ठ-ॐ महादेव्यम्बायै नमः। एवं ॐ महादेवानन्दनाथाय नमः, ॐ त्रिपुरानन्दनाथाय नमः, ॐ भैरवानन्दनाथाय नमः, ॐ पूर्णदेवानन्दनाथाय नमः इति संपूजयेत्।

तदनन्तरं श्रीदुर्गापूजापद्धतिरीत्या सविधि बलिदानं कुर्यात्। बलिदाने सविधिपूजने संक्षेपप्रक्रिया न विधेया।

ततो यथाशक्ति जपं स्तोत्रादिपाठं च कुर्यात्। नीराजनं विधाय प्रसादवितरणं भक्षणं च कुर्यात्।

नृत्यगीतवाद्यादिभि रात्रौ जागरणं विधेयम्।

पुनः परदिने प्रातः नित्यकृत्यं कृत्वा पूर्ववत् संपूर्णां पूजां विधिवत् कृत्वा स्तोत्रपाठादिकं नीराजनं च विधाय यथाशक्ति कुमारीः वटुकान्, ब्राह्मणांश्च भोजयेत्।

ततः आवाहितदेवतामावाहनपदेनैव विसर्ज्य प्रतिमां जले प्रवाहयेत्।

इति श्रीश्यामापूजापद्धतिः॥

———

पद्धतिप्रणेतुः संक्षिप्तपरिचयः

आस्ते मैथिलमण्डलीपरिवृता विद्वज्जनालंकृता
दिव्या माधवनीव मञ्जुलवनो सौन्दर्यवर्या पुरी ।
सत्सङ्गीतकलाकलापकुशलः श्रीनन्दलालाभिधः
तत्पुत्रो यदुनाथ एव समभूत्तन्त्रस्वतन्त्रस्ततः ॥१॥

मार्गे मासि सिते दिने रसतिथौ पक्षेऽवलक्षे शुभे
शाके वेदशशाङ्कनागवसुधाभिख्ये स्वसंख्येऽब्दके ।
श्रीताराचरणारविन्दमधुपस्तारास्तुतौ तत्परः
स्यात्ताराचरणोऽतिमञ्जुलमतिश्चातुर्यचूडामणिः ॥२॥

काव्ये व्याकरणे च तीर्थपदवीं सम्प्राप्य रम्यान्वहून्
ग्रन्थानाशु विधाय भूपतिवराद्धौतप्रतिष्ठोऽभवत् ।
तेनैवाखिललोकमानसमुदे दुर्गार्चनापद्धतिः
श्रीदुर्गाचरणारविन्दकृपया सम्पादिता शोभना ॥३॥

सोऽयं व्युत्पन्नचेताः शिशुसमवयसि ज्ञातशास्त्रार्थतत्त्वः
पूर्वं हाजीपुरान्तर्निजगुणमहिमद्योतितच्छात्रचित्तः ।
पश्चात् शिक्षालये भागलपुरनगरे प्राप्तसर्वप्रकर्षः
स्थाने स्थाने सभानां पतिरयमभवज्जातभूयिष्ठकीर्तिः ॥४॥

चतुर्दश्यां भाद्रे त्रिदशशतषट्त्रिंशदसिते
सनाब्दे श्रीदेव्याः स्मृतिमनुभवन् पद्धतिमिमाम् ।
विरच्य श्रीताराचरणशरणं मोक्षफलदम्
मणिद्वीपम्मुद्रापयनममरत्वं गतवति ॥५॥

तथार्ये संयाते बहुगुणयुते सूरिसुखदे
बहुज्ञे श्रीताराचरणविबुधे नीतिकुशले ।
तदीया श्रीदुर्गार्चनबहुविधैः पद्धतिरियम्
सुविन्यस्ता शश्वत्समभिलषता शान्तमनसा ॥६॥

सेयं सर्वजनोपकारकुशला भव्यार्थदानक्षमा
श्रीकालीचरणेन वेदविदुषा तस्यानुजेनाधुना ।

संमुद्राप्य नृपव्ययेन बहुना लोके प्रकाशीकृता
प्रीत्यानन्दकरी सतां शुभकरी चास्तां महीमण्डले ॥७॥

शश्वद्यस्य हितानुबन्धिवचनं राज्ञः प्रजानामपि
शीलं सर्वजनस्य मोदजनकं बुद्धिश्च सूक्ष्मार्थगा ।
एतद्ग्रन्थनिबन्धनाङ्कनविधौ स्वान्तेन यस्याग्रहः
तारानन्द इतिस्वनामविदितः सोऽयं चिरं राजताम् ॥८॥

———

श्रीसूक्तम्

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदोम आवह ॥१॥

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२॥

ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥३॥

ॐ कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४॥

ॐचन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुषामुदाराम् ।
तां पद्मिनीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ॥५॥

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु अन्तरायाश्च बाह्या अलक्ष्मीः ॥६॥

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥७॥

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥८॥

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि ।
ॐ पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥

ॐ कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले, मातरं पद्ममालिनीम् ॥११॥

ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नीचदेवीं मातरं श्रियं वासय मे कुले ॥१२॥

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३॥

ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्यमयीं लक्ष्मी जातवेदो म आवह ॥१४॥

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥१५॥

श्रीतारास्तोत्रम्

श्रीतारे ज्ञानसारे तव पदविभुतां वर्णितुं कः समर्थः
सिद्धान्ताः साङ्गवेदाः सचकितगतयो नैव जानन्ति पारम् ।
तस्मान्मोहार्तिभावादहमपि भवतीं स्तौमि किञ्चिच्चरित्रम्
मातः शैलेन्द्रकन्ये जनिमृतिभयतः क्षम्यतां पुत्रबुद्धया ॥१॥

त्रैलोक्ये सारभूतां प्रलयघनघटाटोपभीमां करालां
विद्युल्लोलोग्रजिह्वां रविशशिहुतभुग्गर्त्तनेत्रां त्रिनेत्राम् ।
शावे सालीढपादां शतमखफलदां नारमुण्डालिमालां
खर्वां नागेन्द्रहारां हिमगिरितनयां चिन्तयेच्चण्डरूपाम् ॥२॥

मूलाधारे निषण्णां तडिदिव विकसत्सूक्ष्ममात्रातिसूक्ष्मां
हृत्पद्मे द्योतयन्तीं ज्वलदनलशिखां कोटिबालार्कभासाम् ।
श्रीमद्ब्रह्माब्जसंस्थां कलदमृतरसां स्वादतृप्तां महोग्राम्,
नानारूपैः पदार्थैः निरवधिविभवां चिन्तयेच्चण्डरूपाम् ॥३॥

चामुण्डां चण्डहासां हरिहरविधिभिः स्तूयमानां विशालां
हूँ हूँ हूँकाररावां कलिकलुषहरां कालयज्ञोपवीतीम् ।
खड्गं कर्त्रीं कपालं कलयति च परां बाहुभिर्नीलपद्मां
मायाभीष्टार्थदात्रीं मधुमदमुदितां चिन्तयेच्चण्डरूपाम् ॥४॥

तारामोंकारसारां सकलजनहितानन्दसन्दोहदक्षां
श्यामां प्रेतास्थिभूषां त्रिभुवनजननीं कोटिकल्याणभाजाम् ।

विद्यां श्रीनीलभासां निरुपमचरितां प्रेमदाबग्निकाञ्चीं
मध्ये नाचानबद्धां त्रिगुणितबलयां चिन्तयेच्चण्डरूपाम् । ॥५॥

सौन्दर्यानन्दरूपामभयवरकरां पोनवक्षोजकुम्भां
संसाराम्भोधिनौकां दृढतरकुशलां भक्तसंसर्तुकामाम् ।
गायत्रीं नृत्ययुक्तां परिजनसखिभिः किन्नरैश्चाप्सरोभिः
नानावाद्यैः सतालैः पितृवननिलयां चिन्तयेच्चण्डरूपाम् ॥६॥

सर्वेशीं श्रीधरेशीं क्षितिजलदहनस्पर्शनाकाशपोठां,
ब्रह्मादिप्रेमसिंहासनगमविभवां सर्वसिद्धच्यैकधाराम् ।
कृत्वा संसारसृष्टिं स्थितिलयविलयं सिद्धविद्यां विचित्रां,
आत्मीयांस्तोषयन्तीं सततमपि सदा चिन्तयेच्चण्डरूपाम् ॥७॥

मातस्ते ध्यानरूपं परमसुखपदं चेतसा चिन्तयेद्यः
सायं प्रातः कवीन्द्रो भवति निधिपतिः सर्वशास्त्रार्थवेत्ता ।
पूजान्ते स्तोत्रमेतन्निरवधिविभवं योगमोक्षैकहेतुं,
योगीन्द्रः सोऽपि भूयात् क्षितिपपरिदृढो जायते त्वत्प्रसादात् ॥८॥

इति तारास्तोत्रं सम्पूर्णम् ।

सुधाधाराकालीस्तोत्रम्

महाकालरुद्र उवाच

ॐ अचिन्त्यामिताकारशक्तिस्वरूपा
प्रतिव्यक्त्यधिष्ठानसत्त्वैकमूर्त्तिः ।
गुणातीतनिर्द्वन्द्वबोधैकगम्या
त्वमेका परब्रह्मरूपेण सिद्धा ॥१॥

अगोत्रा कृतित्वादनैकान्तिकत्वा-
दलक्ष्यागमत्वादशेषात्मकत्वात् ।
प्रपञ्चात्मसत्वादनारम्भकत्वात्
त्वमेका परब्रह्मरूपेण सिद्धा ॥२॥

असाधारणत्वादसम्बन्धकत्वा-
दभिन्नाश्रयत्वादनाकारकत्वात् ।
अविद्यात्मकत्वादनाद्यन्तकत्वात्
त्वमेका परब्रह्मरूपेण सिद्धा ॥३॥

यदा नैव धाता न विष्णुर्न रुद्रो
न कालो न वा पञ्चभूतानि नाशा ।
तदा कारणीभूतसत्त्वैकमूर्तिः
त्वमेका परब्रह्मरूपेण सिद्धा ॥४॥

न मीमांसका नैव कालादितर्का
न सांख्या न योगा न वेदान्तवेदाः ।
न देवा विदुस्ते निराकारभावं
त्वमेका परब्रह्मरूपेण सिद्धा ॥५॥

न ते नाममात्रे न ते जन्ममृत्यू
न ते कामचेष्टे न ते दुःखसौख्ये ।
न ते मित्रशत्रू न ते बन्धमोक्षौ
त्वमेका परब्रह्मरूपेण सिद्धा ॥६॥

न बाला न च त्वं वयस्या न वृद्धा
न च स्त्री न षण्डः पुमान्नैव च त्वम् ।
न च त्वं सुरो नासुरो नो नरो वा
त्वमेका परब्रह्मरूपेण सिद्धा ॥७॥

जले शीतलत्वं शुचौ दाहकत्वं
विधौ निर्मलत्वं रवौ तापकत्वम् ।
तवैवाम्बिके यस्य कस्यापि शक्तिः
त्वमेका परब्रह्मरूपेण सिद्धा ॥८॥

पपौ क्ष्वेडमुग्रं पुरा यन्महेशः
पुनः संहरत्यन्तकाले जगच्च ।
तवैव प्रसादान्न च स्वस्य शक्त्या
त्वमेका परब्रह्मरूपेण सिद्धा ॥९॥

करालाकृतीन्याननानि श्रयन्ती
भजन्ती करास्त्रादिबाहुल्यमित्थम् ।
जगत्पालनायासुराणां वधाय
त्वमेका परब्रह्मरूपेण सिद्धा ॥१०॥

रुवन्ती शिवाभिर्वहन्ति कपालं
जयन्ती सुरारीन् वधन्ती प्रसन्ना ।
नटन्ती पतन्ती चलन्ती हसन्ती
त्वमेका परब्रह्मरूपेण सिद्धा ॥११॥

अपादापि वाताधिकं धावसि त्वं
श्रुतिभ्यां विहीनापि शब्दं शृणोषि ।
अनासापि जिघ्रस्यनेत्रापि पश्य-
स्यजिह्वापि नानारसास्वादविज्ञा ॥१२॥

यथाबिम्बमेकं रवेरम्बरस्थं
प्रतिच्छायया यावदेकोदकेषु ।
समुद्भासते त्वेकरूपं यथावत्
त्वमेका परब्रह्मरूपेण सिद्धा ॥१३॥

यथा भ्रामयित्वा मृदं चक्रमध्ये
कुलालो विधत्तो शरावं घटं च ।
महामोहयन्त्रेषु भूतान्यशेषान्
तथा मानुषांस्त्वं सृजस्यादिसर्गे ॥१४॥

यथा रज्जुरज्ज्वर्कदृष्टिष्वकस्मा—
न्नृणां रूपदर्वीकराम्बुभ्रमः स्यात् ।
जगत्यत्र तत्तन्मये तद्वदेव
त्वमेकैव तत्तन्निमित्तं समस्तम् ॥१५॥

महाज्योति एकार सिंहासनं वत्
स्वकीयान् सुरान् वाह्यस्युग्रमूर्ते ।
अवष्टभ्य पद्भ्यां शिवं भैरवं च
स्थिता तेन मध्ये भवत्येव मुख्या ॥१६॥

कुयोगासने योगमुद्राभिनीतिः
कुगोमायुपोतस्य बालाननं च ।
जगन्मातरीदृक् तवापूर्वलीला
कथंकारमस्मद्विधैर्देवि गम्या ॥१७॥

विशुद्धा परा चिन्मयी स्वप्रकाशा
महानन्दरूपा जगद्व्यापिका च ।
तवेदृग्विधा या निजाकारमूर्तिः
किमस्माभिरन्तर्हृदि ध्यानगम्या ॥१८॥

महाघोरकालानलज्वालज्वाला-
भिरत्यन्तवासा महाट्टाट्टहासा ।
जटाभारकाला महामुण्डमाला
विशाला त्वमीदृग् मया ध्यायसेऽम्ब ॥१९॥

तपो नैव कुर्वन् वपुः सादयामि
व्रजन्नापि तीर्थं पदे खञ्जयामि ।
पठन्नापि वेदान् जनिं यापयामि
त्वदंघ्रिद्वयं मङ्गलं साधयामि ॥२०॥

तिरस्कुर्वतोऽन्यामारोपासनार्त्रे
परित्यक्तधर्माध्वरस्यास्य जन्तोः ।
त्वदाराधनान्यस्तचित्तस्य किं मे
करिष्यन्त्यमी धर्मराजस्य दूताः ॥२१॥

न मन्ये हरिं नो विधातारमीशं
न वह्निं न चार्कं न चेन्द्रादिदेवान् ।
शिवोदीरितानेकवाक्यप्रबन्धै—
स्त्वदर्चाविधानं विशत्वम्ब मत्याम् ॥२२॥

नरा मां विनिन्दन्तु नामैव श्रुत्वा
त्यजेद् बान्धवा ज्ञातयः सन्त्यजन्तु ।
यमीया भटा नारके पातयन्तु
त्वमेका गतिर्मे त्वमेका गतिर्मे ॥२३॥

———